CC-0. In Public Domain. Digitization by eGangotri

यथाकाल प्रबोधनम्

TIMELY AWAKENING

E.P. BHARATA PISHARODI

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

॥ अद्वैतो महिमालयः सुमनसां
प्रौढात्मनां संग्रहे -
भूच्छ्रायेषु हिमालयस्त्वभिगमे
मन्दानिलो मालयः
सत्सारस्वतसंगमेषु तुलयः
प्रत्यक्षवेद्याश्रयः
स्वामी सौहृदमण्डलस्य जयतात्
स स्वामिनाथश्चिरम् ॥

सादर पुरस्कारः

[signature]
5.4.84

षष्ट्यब्दपूर्तिमहोत्सवदिनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथाकाल प्रबोधनम्

TIMELY AWAKENING

E. P. Bharatha Pisharodi

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथाकाल प्रबोधनम्

TIMELY AWAKENING

(Sanskrit-English)

Essays

E. P. Bharatha Pisharodi

Copies 1000

Price Rs. 30/-

Publishers:

Kamadhenu Publications

P. O. Eranellur, Trichur Dt., Kerala, India

Copy right, with the author

Printed at Ajith Printers, Thriprayar.

First Edition: September 1986.

Published with the financial assistance from the Ministry of Education, government of India.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रास्ताविकम्

समाजेऽद्य सन्दृश्यमानानां, मानविकमूल्यान्युत्सादयतां बहुप्रकाराणां प्रश्नानां, तेषां मौलिकहेतूनां, तत्परिहारमार्गाणां च समाहार एवायं ग्रन्थः ।

मानवः भौतिकजीविते अतितरां प्रगतिमाप्तवानित्युद्घुष्यते खलु । उन्नततले कृतपदानां केषांचन जनानां एतादृशमभिप्रायं नाहमन्धं विश्वसिमि । सेयं धारणा सर्वथा मूढैव । वस्तुत इयं मिथ्याकल्पना केवलमस्मान् दास्यमकर्मण्यतां च नेतुं प्रभवति । यथा यथा मानव ईदृशीं प्रगतिमाप्नोति तथा तथा स नाशोन्मुखमापतति । एतस्या दीनदशाया मोचनं लब्धुं अतिमहत्य अनेका योजना आसूत्रिताः प्रयोगपथमानीताश्च । तासु भूयिष्ठाः सङ्कुलाननेकान् प्रश्नानुत्पादयन्ति, निष्फलाः परिणमन्ति, राष्ट्रस्य सम्पदः महान्तमंशं क्षपयन्ति च ।

भूयांसोऽपि विद्वांसः अतीतस्याराधकां दृश्यन्ते । अद्यतनान् सर्वानपि प्रश्न न् ते निन्दागर्भमेव वीक्षन्ते । यः अतीतस्य मूल्यानि गृहीत्वा वर्तमानेन

Preface

This book deals with the various problems related to the down-fall of human virtues and also points out some of the fundamental causes of such problems and their remedies.

It is claimed that man has already achieved much progress in his material life. I cannot blindly believe such remarks of some persons of higher level. This is absolutely a blind notion. In fact, such a phantom can but lead us towards slavery and inactiveness. The more man advances in this manner the more he is going down and down. To get rid of this miserable condition various projects are planned and implemented on a large scale. Most of them create much more complicated problems and prove fruitless and in the process, they consume a large quantity of the nation's resources.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सह मैत्रीं सम्पाद्य शुभप्रतीक्षया सह भविष्यस्य प्रकाशमभिप्रयाति स एव मानवः प्रगतिरत इति परिगण्यते । सुदृढा शिक्षा, स्वतन्त्रा चिन्ता, आशयानां साधारणीकरणं, सूक्ष्मनिरीक्षणमाधारीकृत्य सुशक्तभाविष्करणं, बोधोदयानन्तरं सत्यस्य सुधीरमुद्घोषणं; एतत् सर्वमपि मानवसंस्कारक्षेत्रे सेवां चिकीर्षो-रावश्यकमेव । तादृशः साधारणोऽपि जनः एतद्गुणविशेषविहीनात् पण्डित तल्लजादपि शतगुणमुत्कृष्टः उपकारकश्च इत्युच्चैस्तरमुद्घोषयितुं न मे शङ्कास्ति । उचितैरुदाहरणैः विवरणैश्च इदं वस्तुतत्त्वमत्र पुस्तके मया अद्भुत व्यक्तीकृतम ।

अस्माकं पौराणिकसंस्कारमाधारीकृत्य अद्यतनजनतासम्बन्धिनः अन्ये केचन विषया अप्यत्र प्रस्तुताः सन्ति । कृषिविमुखता, धार्मिकमूल्यानामपचयः, अतिव्ययप्रधाना आधुनिकी शिक्षारीतिः येयं जनमखिलं कातरमलसं निर्धनं याचकं निष्प्रयोजनं च तनोति । एतादृशान् विषयानधिकृत्य ईदृश्या रीत्या विचिन्तनार्थं पाठकान् प्रचोदयितुं तथा तान् जागरूकान् कर्तुं च इयद् विवरणं पर्याप्तं स्यादिति विश्वसिमि ।

Most of the scholars are seen as mere worshippers of the past and they approach all the problems of the day with a reproachful look. A progressive man must have the habit of accepting the spirit of the past, keeping intimacy with the present and proceeding on with an optimistic view in the light of the future. Deep study, independent thinking, generalisation of ideas, power of expression based on his minute observation, fearless proclamation of truth after realisation: these things are necessary for a man who comes forward to render his service in the field of human culture. I daresay that such an ordinary man is far better and more useful for the society than a scholar who lacks such qualities. This fact is demonstrated in this book with suitable examples and narrations.

Some other facts related to the present generation are also discussed here on the basis of our ancient culture, especially the neglect of cultivation, downfall of virtues, the highly expensive system of the present education that makes the generation timid, lazy, destitute, beggar and good-for-nothing. I believe, it is enough

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जन्तुरिव संस्कारोऽपि जनि स्थिति मृति रूपपरिणामस्य विधेयो भवति। यदा पूर्वकः क्रमशः क्षयमाप्नोति तदा तदनन्तरः जीवचैतन्येनोत्तेजितः जनिं लभते। प्रकृतौ सर्वत्राप्ययं क्रमः प्रवर्तते। वयमस्माकं पूर्वकान् पुनरुज्जीवयितुं नैव प्रभवामः। किन्तु तेषां जीवितमूल्यानि स्वीकर्तुं संरक्षितुं चैव समर्थाः। तथैव अभिरुचिमावश्यकतां कालदेशादिषु जायमानानि परिवर्तनानि च सम्यक् परिगणय्य तदनुरूपमाशयात् मूल्यानि च परिष्कृत्य संस्कृत्य च तानि अनन्तरपरम्परासु सङ्क्रामयितुमेव अस्माभिरुद्योगः करणीयः। अतः पाठकान् पुनरप्युद्बोधयितुं अत्र विवक्षितसारस्य पुनरप्यावर्तनं क्रियते। "अतीतात् जीवितमूल्यानि संगृह्य वर्तमानेन सह विलयनं कृत्वा भविष्यस्य प्रकाशमभि सर्वैरपि प्रयाणं क्रियताम्" इति।

कामधेनुः
१२-१०-८६

ग्रन्थकर्ता

---

to incite the readers to think over similar facts in such a way and to make every body aware of taking them as serious.

Just like a living being the culture also is subject to the process of birth, existence and death. While its predecessor gradually withers, the successor emerges from it stirred with vitality. We see this process in nature everywhere. We can never reanimate our predecessors physically but can accept and preserve their spirit and hand it over to our successors, aptly remoulded and modified according to their needs, taste and circumstances of the time. Therefore I repeat the same words: "take the spirit of the past, assimilate it into the present and march on towards the light of the future."

Kamadhenu
12-10-86

The Author

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षुद्रानाग्रहकरान् विचारनिकषा-
नुच्चाटयद्भ्यो हृद-
स्तत्त्वं सत्यतमं प्रकाश्य दृढता-
मापादयद्भ्यो नृणाम् ।
प्राज्ञेभ्यस्तमसः परत्र विषये
स्वैरं चरद्भ्यः सदा
तृप्तेभ्यः परभद्रचिन्तनरता-
त्मभ्यो गुरुभ्यो नमः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका

1. न वृत्तिः, न भुक्तिः, कुतः ? — 1-10
No Job, No Food, Why ?

2. भारते आंगल्याः प्रभावः — 13-34
Influence of English in India

3. संस्कृतभाषा कथं प्रसारणीया — 35-48
How to popularise Sanskrit ?

4. वेदान्तशोषः — 51-65
Decline of Vedaanta

5. किमयं अस्माकमुत्कर्षः — 67-76
Is it our progress?

6. कथमिदं राष्ट्रं पुष्णीयात् ? — 79-91
How would this nation be prosperous ?

7. चलच्चित्रमाध्यमेन संस्कृतप्रचारणम् — 93-103
Sanskrit propagation through movies

8. शिक्षाया उज्जीवनम् — 105-117
Revival of Education

9. अद्यतनं साहित्यम् — 119-132
Literature today

10. शिक्षायाः चतस्रो दशाः — 135-143
Four stages of education

11. भारतीय संस्कारः — 145-155
Indian culture

12. धर्मच्युतिः — 157-164
Downfall from virtues

13. साहित्ये विदुषां प्रभुत्वम् — 167-181
Domination of scholars in literature

14. शिक्षायां विचारो विकारश्च — 183-191
Intellect and emotion in learning

15. द्वन्द्वानां प्राधान्यम् — 193-197
Importance of pairs

16. ब्रह्मसत्यं जगत् सत्यम् — 199-212
The spirit is immortal; the matter also is immortal

17. तपोवनमहर्षिणा सह मे सम्पर्कः — 215-227
My contact with Swami Tapovanam

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सार:

सर्वेषामपि जन्तूनां जीवसन्धारणार्थं अन्नमावश्यकम् । चिराय तादृशमन्नं प्रदाय अस्मत्पोषणं कुर्वन्तीं अस्मन्मातरं वयं विस्मृतवन्तः । अद्य तु अस्मद्दृष्टौ भूमिः न माता, न वा देवता । तादृशो दिव्यसङ्कल्पः अद्य प्रणष्टः । अद्यतनानां दृष्टौ माता भूमिः केवलं धातुलवणादीनां राशिः परिणता । अस्माकं कार्यालय एव अस्मभ्यमन्नं प्रयच्छति, न खलु भूमिः । अयमस्माकं विश्वासः । कार्यालये दास्यं वयमतिमहितं कर्म कलयामः । हन्त कीदृशीयं मूढता !

THE GIST

Food is the most essential factor for the sustenance of all living beings. We have forgotten our mother who nourishes us by giving such food, long since. Nowadays in our view the Earth is neither a mother nor a Goddess. We have lost such a divine concept. In modern view the mother Earth has changed to be a lump of minerals. We believe that the job gives food, not the Earth. We take the slavery in offices as valuable service in our life. What a foolery it is !

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न वृत्तिः, न भुक्तिः, कुतः?

अक्षैर्मा दीव्यः कृषिमित् कृषस्व
वित्ते रमस्व, बहुमन्यमानः ।
तत्र गावः, कितव तत्र जाया,
तन्मे विचष्टे सवितायमर्यः ॥

(ऋग्वेदः, मं . १०, सू. ३४, मं . १३)

ऋग्वेदान्तर्गतोऽयं मन्त्रः लौकिकजीवितस्य प्राधान्यं प्रख्यापयति । द्यूते नष्टसर्वस्वं निर्माणप्रक्रियाभ्यो विमुखं स्वं जीवितमन्धकारमयं कुर्वाणं कमपि कितवं कवषो नाम ऋषिः एवमुपदिशति । "हे कितव, त्वं द्यूताद् विरम । कृषिं कुरुष्व । सम्पदि आनन्दमनुभव । एवं समाजे आदरणीयो भव । कृषावेव सम्पद् वर्तते । तत्रैव दाम्पत्यजीवितसुखमस्ति । इदं धर्मरहस्यमस्माकमखिलानां दृष्टिगोचरेण भगवता सवित्रा मह्यमुपदिष्टम् ।"

No Job, No Food, Why?

This **Mantra** in **Rigveda**, proclaims the importance of worldly life. The sage **Kavasha** advises a gambler who lost all his belongings in gambling, who was not interested in any creative work and who was making his life gloomy: "Oh gambler, don't play with dice. Be engaged in cultivation of land. Thus enjoy riches. Be honoured by the society. There lies wealth. There lies the worldly pleasure. The Lord Sun enlightened me with this truth.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्र 'अक्षैर्मा दीव्यः' इत्येतत्तु केवलं सामान्यनिर्देश एव। उद्देश्यरहितेषु निर्माणात्मकरहितेषु केवलं विनोदपरेषु कर्मसु व्यापृतो भूत्वा अनघमिदं जीवितं मा वन्ध्यं कुरु इत्यस्याशयस्य उपलक्षकमात्रमेतत्। कृषिरिति पदमत्र मानुष्यकस्य प्रयोजनकराणां उत्पन्नसामान्यानां उपलक्षकमित्यवधार्यम्। 'गावः' इत्यस्य सम्पद इत्यर्थः। वैदिककाले गाव एव नाणकानां स्थाने उपयुज्यन्ते स्म। 'अर्यः अयं सविता' इत्यस्य अन्तर्बहिश्च प्रकाशं ददानः ज्योतिःस्वरूपः सूर्यभगवानित्याशयः।

एवं जीवितस्यामूल्यतां तथा अन्नप्रदात्र्याः धात्र्याः कृषेश्च प्राधान्यं च प्रख्यापयन्तो बहवो मन्त्राः वेदेषु तत्र तत्र दृश्यन्ते।

ऐतिहासिककालेऽपि शिक्षायां कृषेः प्राधान्यमासीदिति महाभारताद् वयं जानीमः। धौम्यमहर्षेः गुरुकुलस्य शिक्षारीतिमधिकृत्य तत्र ग्रन्थे परामर्शोऽस्ति। तत्र शिक्षार्थमागतान् शिष्यान् प्रथमत एव सः कृषिकार्येषु विनियुङ्क्ते स्म। तत एव शिष्या आध्यात्मिकोपदेशपात्राणि परिणमन्ति। धौम्यः कृषी-

---

Here **'Akshaih Ma Deevyah'** is a general indication. It represents an idea that one should not make ones invaluable life fruitless by pursuing aimless and unproductive entertainments. The word **Krishi** is used here in the sense of production in general. **'Gaavah'** means wealth. In vedic period cows were used in the place of coins. **'Aryah Ayam savita'** means the Lord Sun who gives us light externally and internally.

Like this many mantras that stress the importance of cultivation, the grace of mother earth and invaluableness of life, are seen here and there in Vedas.

From Mahabharatha we, understand that in the age of **Itihaasa** importance was given to the agriculture in general education. In the epic there is a reference to the system of education in the **Gurukula** of sage **Dhoumya.** He used to allot some duties to his disciples in his farm during the period of their spiritual education. He was of opinion that then only his disciples would be capable of spiritual study. We can infer that the sage **Dhoumya** himself

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वलोऽप्यासीदिति तस्माद्दुह्यमेव । शारीरिकक्लेशानुभवादेव मानसिकपक्वता सञ्जायते इत्येतत् तत्वं तत्कालीनगुरुकुलेषु प्रयोगे निर्व्यूढमासीत् ।

भूमिः समेषामपि प्राणिनां धात्रीति प्रसिद्धमेव । धात्रीत्यस्य उपमाता माता इति चार्थोऽस्ति ! प्राणिनां भूस्पर्शादारभ्य अन्त्यश्वासपर्यन्तं शरीरधारणाय पोषणाय च अत्यन्तापेक्षितमन्नमेव । जीविनां वैविध्यमनुसृत्य नानाप्रकाराण्यन्नानि या ददाति सेयमुपमाता भूमिरेव खलु ।

प्रपञ्चचक्रचंक्रमणस्वभावं विषयीकृत्य गीता एवमभिप्रैति । 'अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसंभवः । यज्ञात् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः' इत्यादि । ईश्वरार्पणात्मकैः कर्मानुष्ठानैरेव वर्षादि ऋतूनां क्रमिकपरिवर्तनं संभवति । तादृशानि ऋतुपरिवर्तनान्येव अन्नस्य कारणं भवति । प्राणिनामस्तित्वस्य प्रधानहेतुः तदन्नमेवेति च अस्य भगवद्वचनस्य संपिण्डितोऽर्थः । तथा च अस्माभिः क्रियमाणानां कर्मणां ऋतुपरिवर्तनस्य अन्नोत्पादनस्य च परस्परमस्ति कोऽप्यज्ञातो बन्ध इत्यनुमातुं शक्यते । यद्यस्मिन् चंक्रमणे

---

was a good farmer. The truth that the maturity of mind would be obtained by Physical strain and endeavour, was Practically Proved in the ancient **GuruKulas**.

It is well known that the earth is the mother of all creatures. The word **'Dhaatri'** is a synonym of mother and step-mother. Food is most essential for sustaining and improving the body of all creatures from the very birth to the last breath. It is the earth that gives food of different kinds according to the varieties of all living beings.

The holy geeta explains the nature of the rotation of the cosmos. Thus the rotatory motion of seasons occurs in conformity with the deeds that are dedicated to the supreme power. Such changes of season couses the production of food. Food causes the sustenance of living beings. This is the gist of the words of lord krishna in the particular context. So we can infer that there is some kind of unknown relation among our deeds. The rotatory motion of seasons and the production of food. Lord Krishna

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कोपि क्रमभंगः स्यात् तर्हि सर्वमप्युच्चावचं विफलं च भविष्यतीति भगवान् तत्रैव प्रस्तौति च ।

बह्वोः कालादारभ्य वयमेतं क्रममुल्लंघितवन्तः । अस्माकं जीवितास्तित्वहेतोः अन्नस्याधिष्ठात्रीं धात्रीं वयं विस्मृतवन्तः । अद्य तु वयमन्नस्याधारभूतां भूमिमवलम्ब्य न जीवामः । अस्माकं जीवितसाकल्यमद्य उद्योगः अथवा कर्मचारित्वं । तथाहि, कृषिमपहाय यत्किञ्चिदन्यत् कर्म भवतु तदवलम्ब्यैव वयं जीवामः । भूमिस्त्वद्य गृहनिर्माणार्थमेव । अन्नोत्पादनार्थं नैव । येषां न कश्चिदुद्योगो लब्धः येषां कालयापनाय कश्चिदन्योऽवलम्बो नास्ति तैरेव करणीयं किमपि निकृष्टं कर्मैव कृषिरिति काचन धारणापि समाजे रूढमूला वर्तते । क्षेत्रं कृष्ट्वा अन्नमुत्पादयितुः कर्षकस्य तथा कस्मिन्नपि कार्यालये किमपि कर्म कुर्वतः कर्मचारिणश्च समाजस्य दृष्टौ महदन्तरं वर्तते । अन्नोत्पादनार्थं निरन्तरमपेक्षितं शारीरिकप्रयासं समाजः तुच्छतयैव परिगणयति । कर्षकान् सावज्ञमवलोकते च । कार्यालयेषु नियुक्तानां दौवारिकानां स्थानमानादिकमपि समाजे कर्षकाणां न लभ्यते । कर्षकानभिमुखीकुर्वतीनां

---

continues in the same context that if there would be any kind of disorderliness in it, all would become confused and fruitless.

Long Since, we have been transgressing this order of things. We have forgotten our mother who basically produces our food, essential for our existence. Now we no longer depend on the earth which fosters us by food, but on job. The job is the whole of our life now. It may be anything except cultivation. The earth is not intended for cultivation. It is only for construction of houses. In general, there is an understanding rooted in the society that the agriculture is a mean job allotted to those who could not get any other job and who have no other resort in life. we see considerable difference in social status between an employee who lives on salary and a farmer who produces food. Society takes the physical strain which is invariably needed for food production, very insignificant and it looks at a farmer with some sort of contempt. A farmer does not get the status of even a peon employed in an office. Nobody cares for the solution of his problems. Nobody

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समस्यानां परिहारार्थं न कोऽपि श्रद्धामातनुते। तान् न कोऽपि शृणोति च। कर्मचारिणां तु अलीकानपि प्रश्नान् समाजः शासनं च सगौरवं परिगणयति। यदि कर्षकाः यथाकथञ्चिद् हताशताशतमप्यतिजीव्य अतिप्रयासात् किमप्युत्पाद्यते तर्हि तद् हठादाच्छिद्य भोक्तुमावश्यकान् नियमान् शासनं निर्माति च - एवं स्थिते को नाम कर्षकः स्वकीयां परम्परां कुलक्रमागतकर्षककर्मणि व्यापारयितुमुत्सहेत? अस्माकं सन्ततयः कस्मिन्नपि कार्यालये कर्मचारिणो भवन्तु इति ते यदि वाञ्छेयुस्तर्हि किमु तत् तेषां दोषः? नैव। तादृशानवगणस्य स्वार्थं परिगणस्य च वर्तमानं शासनमेव अथवा समाज एवात्र सर्वेषामपि दोषाणां मूलकारणम्।

बहोः कालादारभ्य वृत्तेर्दुर्लभतामधिकृत्य भारते सर्वत्रापि महदाक्रन्दनं श्रूयते। अस्मिन् राष्ट्रे वस्तुतः वृत्तेर्दुर्लभता नास्त्येव। किन्तु समाजस्य दृष्टौ वृत्तिर्नाम कर्मचारितैव। इयं सामान्यधारणैव एतां समस्यां उत्थापयति। वृत्तिः अतीव संकुचितेऽर्थे एवात्र निरुच्यते। प्रतिमासवेतनं यतो लभ्यते सैवात्र वृत्तिः। कृषिकर्म तत्र नान्तर्भवति। राष्ट्रे आयसाकल्यस्य

---

hears him also. On the contrary, government as well as the society take even unreal problems that employees raise, very serious. If the farmers somehow manage to produce something after toils and frustration, the government will be ready to frame rules by which it can own it forcibly. In this position who would wish to throw his off-springs into the field of agriculture which he hereditarily Possessed? As such, is it his fault if a farmer wishes his son to be employed in any office abandoning his hereditary work? Never. The government as well as the society that ignore the perspiration of tillers and consider seriously the selfish issues of the employees' are really responsible for such a situatian

Long since we are hearing the cry of unemployment problem all over India. In fact, in our country there is no such a problem. Because, our society thinks that the employment means a job in an office. This general notion raises much confusion. Here in India the iob is defined in a very narrow sense. It is a job by which one can get monthiy salary; not cultivation which makes the nation

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बहुभूरिभागः एतादृशवृत्त्यर्थमेव व्ययीक्रियते। एतेन किमुत्पादनं राष्ट्रस्य सम्पद्यते? । न किमपि। ये नाम यथाकथञ्चिद् वृत्तिं लब्धवन्तः ते उत्तरदायित्व-शून्यं सुखजीवितमनुभवन्ति। अन्यैस्तु नरकमेवानुभूयते।

कर्मचारिणां तृषा इयताऽपि न शाम्यति। विविधेषु विभागेषु वेतन-वर्धनाप्रक्षोभकोलाहलः प्रतिदिनं वर्धते। यद्यत् तैर्लभ्यते तत्सर्वं तेषां जीवि-ताय न पर्याप्तं भवतीति तेषां आक्रन्दनम्। शासनं तु तत् सगौरवं शृणोति। तदनुसृत्य काले काले वेतनं वर्धयन्ति च। धनलिप्सा तु पामेव यावत् कण्डू-यते तावत् वर्धते!। तद्भिन्नानां सामान्यजनेष्वन्यतमानां कर्षकाणामाक्रन्दनं न कोऽपि शृणोति च। अतः प्रायः सर्वेऽपि कर्षकाः स्वां कर्षकवृत्तिमुज्झित्वा येषु केषुचित् कर्मान्तरेषु व्यापृता भवन्ति। एवं कर्षकाः संख्यया क्षीयन्ते। तेषां स्ववृत्तौ आत्मविश्वासश्च क्षीयते। तदनुसृत्य उत्पादनं च क्षीयते। अत्र भारते कृषियोग्यानि विशालानि स्थलानि प्रभूतं सन्ति। नूतनानि कार्षि-कोपकरणानि च लभ्यन्ते। तथापि कृषिकर्मार्थं न कोऽप्युत्सुको भवति। यतस्ते अनादृता आये हताशाश्च भवन्ति। यथा यथा उत्पादनं क्षीयते

---

prosperous. A large portion of the revenue of the nation is dissipated for such unproductive jobs. What achievement can a nation have by it ? Nothing. Those who somehow get employment, enjoy their job without much responsibility. Others are thrown to the hell.

The thirst of employees does not get quenched with this much. Agitation for increasing their salary is going on day by day in various departments. They shout that what they get is not enough for their living. Government take it as a reasonable demand. Accordingly the scale of pay is increased each time. But nobody hears the cry of farmers, a part of common men. As a result, generally all farmers abandoning cultivation become engaged in some other works. So gradually they become a very small minority. They lose their faith in farming and so the production decreases.. In our country cultivable virgin lands are still available in plenty. New agricultural implements also are available everywhere. Neverthless, nobody comes forward for agriculture, because they are ignored by the society and become desperate in the aspect of their income.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथा तथा तस्य मूल्यं वर्धते च । तदनुसृत्य कर्मचारिभ्य आनुकूल्यं वितीर्यते । तस्य तिक्तफलं तदितरे जना एवानुभवन्ति । 'अक्षैः मा दीव्यः कृषिमित् कृषस्व' इत्युपदेष्टुं न कोऽप्यत्रास्ति । प्रत्युत 'अक्षैर्दीव्यतु कृषिमित् मा कृषस्व' इति तु समाजः परोक्षं उपदिशति च । तथाहि सर्वेऽपि विद्यालयं यान्तु अधीत्य वा अनधीत्य वा परीक्षामुत्तरन्तु । उद्योगं लभन्ताम् । मा निकृष्टे कृषिकर्मणि व्यापृता भवन्तु इति समाजः परोक्षशासनं करोतीति तात्पर्यम् । हन्त सर्वे 'दक्षिणतो वामा वामतो दक्षिणाः' संवृत्ताः ।

देवी भूमिः समेषामपि प्राणिनां स्नेहमयी मातेव । यद्यद् प्राणिनां पोषणायावश्यकं तत्तत् सर्वमपि सा सज्जीकरोति । बीजान्तःस्थितस्य पोषणं सा स्वकीयं कर्तव्यं मन्यते । अधुना तु भूमौ देवीभावनापि नष्टा । सा नवीनवीक्षणे केवलं शिलामृदादीनां पिण्डमेव । प्रणष्टा सा देवीभावना पुनरुज्जीवनीया । अनुकूलवातावरणेषु बीजावाप एवास्माभिः कार्यः । सा शतगुणं फलमस्मभ्यं प्रदातुं सन्नद्धैव । तावन्मात्रं कर्तुमपि मनुजो विमुखो भवति । तथापि सा यावच्छक्यं दत्वा तं पोषयति । किन्तु न किमपि सः तस्यै प्रतियच्छति ।

The more the production becomes poor, the more the price increases. Consequently agitation bursts out and the employees are granted their demands. The commoners have to endure the bitter result of all of them. Nobody is here to advise them "dont gamble, cultivate lands". On the contrary society indirectly advises them to go on with gambling; and not to cultivate. Thus the society indirectly forces all of you to go to school; you may learn or may not learn; some how pass the examination; get job. Don't be engaged in indecent farming. Alas! Everything is upsidedown.

The Goddess Earth is a loving mother of all living beings. She prepares and supplies to them whatever is necessary for their nourishment. She takes it as her own responsibility to foster the gems of creatures. We have now lost the holy concept of the Goddess Earth. In modern view she is a lump of minerals. We have to revive the divine concept, we already lost. We have simply to sow the seeds in favourable conditions; she is always ready to give us returns hundred-fold. Modern man is not prepared to do that much. Still she fosters him giving him food as

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भगवानेतादृशानेवं विशिनष्टि-'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव स' इति। स नियतं स्तेन एव।

एवं भुक्तिः संशयमापन्ना। तथैव वृत्तिरपि। सर्वेषामपि वृत्तिं दातुं कः शक्नोति? लोट्टरी टिक्कट् गृहीतवतां सर्वेषामपि पुरस्कारं दातुं कथं शक्यम्? पाठशालां प्रविष्टानां शतेष्वेक एव उत्तीर्णो भवति। उत्तीर्णानां शतेष्वेक एव वृत्तिं लभते। अन्ये तु यत्र कुत्रापि गत्वा यथाकथञ्चिद् जीवितुं प्रयतन्ते। किन्तु कर्षकवृत्तिं स्वीकर्तुं नोत्सहन्ते। यैः पाठशालायां पदं विन्यस्तं ते कृषिमवज्ञया जुगुप्सया च वीक्षन्ते। कार्यालये कर्मचारितैव सर्वेषामपि लक्ष्यम्। अस्य विपरीतप्रयाणस्य फलमस्माभिरधुनाऽनुभूयते। यया मानविकजीवितस्यावश्यकमुत्पादनं सिध्यति सैव वृत्तिः। सा वृत्तिरधुना अधमा जाता। तदितरा वृत्तिः सर्वेषामप्यभिकाम्या च। ईदृशं प्रयाणं राष्ट्रस्य भूतये न स्यात्।

अथात्र समापतन्तीभ्यो विपद्भ्यः राष्ट्रं रक्षितुं कतिचन मार्गा निर्दिश्यन्ते।

---

she can. But he returns nothing to her. Lord Krishna makes remarks on such ungrateful ones as; "He who eats all things given by others without giving anything in return, is but a thief"

Thus the problem of food has reached a critical stage. The same is the case with the job also. How can all be given job in a nation? How can prizes be given to all who have purchased the lottery tickets ! Among those who got admission in schools, a few percentage may pass in the higher examination. Out of those who pass a few percentage may get job. Most of the remaining ones leave for some place or other and try to live somehow. Even then they do not want to become farmers. All aim at job in some office. We experience the consequence of this reverse process. In fact it is job by which the production needed for the sustenance of mankind, would be accomplished. In this age such job becomes mean, all other jobs are attractive to the present generation. Such a march of life will never be for the progress of the nation.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षार्थं यावद् धनं शासनेन व्ययीक्रियते ततोऽप्यधिकं कृषिविकसनार्थं विनियोक्तव्यम् । कर्षकेभ्यः स्वकर्मनिर्वहणार्थं सर्वविधान्यपि प्रोत्सहनानि देयानि । शिक्षाक्षेत्रे आत्यन्तिकं परिवर्तनमपरिहार्यम् । धिषणया वासनया च अनुगृहीताः छात्राः एव उन्नतशिक्षार्थम् स्वीकर्तव्याः । शिक्षाया विषये अतिबृहतो धनराशेः अपव्ययात् राष्ट्रम् संरक्षितुं अयमेवैकोमार्गः । एवं सति पाठशालाः क्रमशः संख्यया अल्पीभविष्यन्ति । शिक्षा तु अधिकं कार्यक्षमा सफला च स्यात् । शारीरिकशक्तिसम्पन्ना अन्ये सर्वेऽपि तत्तदभिरुचिमनुसृत्य उत्पादनक्षेत्रे विशिष्य भक्ष्योत्पादनक्षेत्रे नियोक्तव्याः । शासनकर्मचारिभिः यदानुकूल्यं लभ्यते तत् सर्वमपि उत्पादकेभ्योऽपि प्रदातव्यम् । एवं चेत् साधारणा जनाः कृषिकर्मस्वाकृष्टा भविष्यन्ति । ते समाजे यथार्हं स्थान मानादिकं लप्स्यन्ते । अद्य तु वयं तथा सभ्याः सञ्जाताः यथा वृत्तेः परतन्त्र भृत्याः अस्मत्स्वामिनः संवृत्ताः । हन्त शोचनीयमेतत् । वस्तुतः अन्नस्य विधातारः कर्षका एवास्माकं स्वामिनः । विचारगतिः परिवर्तनीया । येनकेनापि प्रकारेण राष्ट्रान्तरेभ्यो धनप्रवाहेण अथवा धनस्य पत्ररूपेण वा नाणकरूपेण वा

Here let us suggest some ways to save our nation from the impending calamities. The government should give more importance to the department of agriculture than to that of education. Farmers should be given all kinds of encouragement to continue their work. In the field of education a dynamic change is unavoidable. Only the students, gifted with intelligence and taste, are to be selected for higher education. This is the only way to save our nation from dissipating huge amounts in the name of education. If so, the educational institutions will gradually reduce in number and the education will be more effective and fruitful also. All others endorsed with physical strength, are to be employed in the field of production mainly of agriculture, according to their taste. They are to be provided with all the facilities that a government employee is entitled to. In this way the peop'e can be attracted towards agriculture and they will get deserving status in society. Now we have become so civilised as to honour the slaves of salary. We must change our attitude to respect the real masters of production. A nation will not be rich by producing currency notes or accumulating money flowing from other countries through some

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्पादनेन न . किमपि राष्ट्रं सम्पन्नम् भविष्यति । भक्ष्यवस्तूनां तथा परिष्कृतेऽस्मिन् लोके जीवितं नेतुमावश्यकानामन्यवस्तूनां चोत्पादनेनैव राष्ट्रं सम्पन्नतामाप्स्यति ।

अन्ततः अमुमेव मन्त्रं पुनरपि पठित्वा वयमिमां चर्चामुपसंहरामः ।

अक्षैर्मा दीव्यः, कृषिमित् कृषस्व वित्ते रमस्व बहुमन्यमानः ।
तत्र गावः, कितव ! तत्र जाया तन्मे विचष्टे सवितायमर्यः ॥

---

source or other. It will be rich only by production of food and other materials necessary to live in this civilised world.

Let us conclude this discussion by repeating the same Mantra:

अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहुमान्यमानः ।
तत्र गावः, कितव तत्र जाया, तन्मे बिचष्टे सविताऽयमर्यः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हस्तं प्रेरय मे त्वदर्चनविधौ चित्तं परावर्तय
क्षुद्रेभ्यो ह्यविरामभोगपरिणाहिभ्यः सुखेभ्योऽनिशम् ।
नास्त्यन्यो मम देशिकोऽत्र सकलान्तर्यामिनं त्वां विहा-
यान्धोऽन्धैश्चरं चिरं धृतकरस्तेजोऽध्वतो मां नय ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

भाषायाः द्वावंशौ स्तः। सरलता अनायासता चेति द्वयमेकोंशः। अन्यस्तु धार्मिकसांस्कारिकमूल्याधायकश्च। तयोः प्रथमः बाह्यः। द्वितीयस्तु आन्तरः। एतदधिकृत्य विचिन्त्यते चेद् इदमत्र प्रस्ताव्यं यद् अस्मद्राष्ट्रस्य विविधप्रान्तेषु विदेशेषु च निवसद्भिर्जनैः सह सम्पर्कमाधातुं आङ्गली तथा विश्वसाकल्यस्य धार्मिकतायाः संस्कारस्य चोन्नमनार्थं संस्कृतभाषा चाश्रयणीयेति।

THE GIST

Every language has two aspects. One is ease and simplicity in usage and the other is qualities of promoting cultural and spiritual values. The former is external and the latter is internal. Considering these two aspects, we can say that English has to be resorted to as link- language for dealing with the people of different parts of the country and abroad and Sanskrit as spiritual- language to uplift the human culture and values of the whole world.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भारते आंगल्याः प्रभावः

षष्ठे वयस्येव बाला विद्यालयं प्रवेश्यन्ते। ततः पूर्वमेव तेषां मातृभाषायां भाषणकुशलता स्वायत्तीभवति। तावत्पर्यन्तं स्वकीयान् आशयान् ते शब्दद्वारा प्रकटयन्ति। यथा यथा ते वयसा वर्धन्ते तथा तथा तेषां विचारा विदूरे वर्तमानान् जनान् निवेदयितुमवसरः सञ्जायते। तदैव विचाराणां लिपिरूपाधानस्य अवसरः समापतति। मातृभाषाविषये शब्दानां सङ्केतरूपाः लिपयः, प्रयोगशैली, आशयानां वैविध्यमनुसृत्य पदानां सन्निवेशः इत्यादय संस्काराधायिकाः प्रक्रिया एव तेषां विशिष्य पठनीयाः सन्ति। तावता ते मातृभाषासाहित्यपठनाय शक्ता भविष्यन्ति। ततो वासनानुसारं केवलमर्हैरनुरागिभिश्च छात्रैः भाषायाः सविशेषपठनमारब्धव्यम्। तदितरैः स्वाभीष्टा विषया अध्येतव्याः। एवं च प्रायः छात्रस्य द्वादशे वयसि, तथाहि सप्तमकक्षायामेव मातृभाषाध्ययनमवसाययितव्यम्। तदनन्तरं मातृभाषायाः स्थाने सन्निकर्षं संस्कृताध्ययनमारब्धव्यम्। तदध्ययनं तु न केवलं संस्कृत–

Influence of English in India

Children are admitted in schools at the age of six. Before that, usually they become able to talk fluently in their mother tongue. Upto that stage they express their thoughts by means of sound. The more they grow up the more they become urged to convey their ideas to the people of distant places. Then they would feel the need of converting their sounds into letters. As regards the mother tongue they will have to learn only letters as the symbols of sounds, style of presentation, and proper arrangement of words according to the nature of ideas which are essential for polishing their expression. By this much, they will be able to appreciate the literature of their mother tongue. From that stage the pupils who are deserving and interested to learn more, should start special study in their mother tongue according to their taste. Others can take any subject that they prefer to. Thus in the twelfth age, by the end of seventh standard, study of mother tongue can be terminated. Then in place of mother tongue,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परिज्ञानं वर्धयति किन्तु तत्तद्देश्यानां छात्राणां मातृभाषापरिज्ञानमपि पोषयिष्यति । संस्कृतभाषापरिज्ञानं विना सर्वासामपि प्रान्तीयभाषाणां अध्ययनमपूर्णं विकलं च भविष्यति । अतः अष्टमकक्ष्यातः प्रभृति मातृभाषायाः स्थाने प्रथमभाषात्वेन संस्कृताध्ययनमारभ्यते चेत् इदानीमनुभूयमाना मातृभाषाया संस्कृतस्य च अधोगतिः नैव स्यात् ।

मातृभाषां संस्कृतं च विहाय अन्या भाषाः किमु पठनीयाः? यदि पठनीयास्तर्हि का नाम ताः ? एतदधिकृत्यात्र किञ्चिद् विचारणीयमास्ते ।

अस्माकं स्वातन्त्र्य लाभानन्तरं कोथारि समितिरेव इमं विषयमधिकृत्य निपुणं समालोचयत् । समितिः त्रिभाषापद्धतिमाविश्चकार । दाक्षिणात्यैः मातृभाषा आङ्गली हिन्दी इत्येतास्तिस्रो भाषाः पठनीयाः । औत्तराहैस्तु मातृभाषा आङ्गली तथा दाक्षिणात्यभाषास्वन्यतमा काप्येका भाषा च पठनीया इत्येव तस्याः समितेः भाषापठनमधिकृत्य निर्णयः । एवं च

---

sanskrit has to be taught as the first language. This study not only develops the knowledge of sanskrit but it will further the standard of knowledge in their mother tongue also. Without the knowledge of sanskrit, study of any Indian language is incomplete and imperfect. Therefore right from the eighth standard, if sanskrit study is started in place of regional languages the downfall of the standard of sanskrit as well as of the mother tongue will never occur as we see today.

Other than the mother tongue have other languages to be studied? If so, which are they? we have to discuss this here.

After independence, only the Kothari Commission has efficiently dealt with this matter. The commission has suggested a three language scheme: South Indians must learn their mother tongue, English and Hindi and the North Indians should aiso learn their mother tongue, English and any one of the South indian languages. This is the recommendation of the commission regarding the study of the languages. From this it is clear that English is

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आङ्ग्ली भारते सर्वत्राप्यङ्गीकृता भाषेति सिद्धं खलु। अन्यासां भाषाणां प्रादेशिकप्राधान्यमेवास्ति। समित्या कुत एवं निश्चयः कृतः? अत्र किञ्चिद् विवरणमावश्यकम्।

मानवस्य परिचयपरिधिः अद्य चक्रवालं यावत् विकसितः सञ्जातः। द्वित्रेभ्यो वर्षशतकेभ्यः पूर्वं वृत्तस्य मानवस्य, आधुनिके काले वर्तमानस्य मानवस्य च अस्मिन् विषये महदन्तरं वर्तते। प्राचीनकाले शिक्षा, कर्ममण्डलं, लौकिकबन्ध इत्यादयः केवलं द्वित्राणां योजनानां अन्तः सीमिता आसन्। जनानां सूतिकागृहं श्मशानं च प्रायः एकस्मिन्नेव परिसरे परिमिते आस्ताम्। अधुना तु यान्त्रिकयुगेन समापादितः परिणामः अत्यन्तमद्भुतमावहति। स्तनंधयदशाया आरभ्य शिशुः पितृभ्यो वियुज्य जीवितुमारभते। स्वगृहादधिकं विद्यालयैः, स्वजनादधिकं सतीर्थ्यैश्च तस्य ममता वर्धते। शिक्षाकालानन्तरं उद्योगकार्यालयसहप्रवर्तकप्रभृतिभिः स संबध्यते। एवं शैशवात् प्रभृति तेन स्वजन्मदेशे वस्तुमवसरो न लभ्यते। केवलमशिक्षितैः क्षेत्राजीविभिर्विना सर्वेषामपि इतरदेशैः सह सम्पर्कमाधातुमावश्यकता जायते। येषां

---

a language which has got influence all over india. All other languages in India have only their regional importance. Why did the Commission recommend such a formula ? An explanation is needed for this

Today the sphere of the contact of man has become wide upto the horizon. In this respect there is a vast gap between those who had lived two or three centuries ago and who those who are living in this age. In those days education, circle of activities, secular relations etc. were confined to a limited area. Usually the place of birth and death of man happened to be the same locality. Now the change caused by the mechanical age is too wonderful. Right from infancy a baby starts to live separated from its parents. Its intimacy grows more with friends and classmates than with its parents and other relatives. After education the boy will be connected with his job, office and colleagues. Thus genarally he will not get a chance to live in his birth place. Excepting a few of uneducated tillers most of the people require cont-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केषुचित् विषयेषु कर्मसु वा किमपि नैपुण्यमस्ति तेषां सर्वेषामपीत्थमेव समवस्था वर्तते।

मानवानां परस्परसम्पर्कापादनस्य प्रधानं घटकमाशयविनिमय एव। लोकेऽस्मिन् निवसद्भिः सर्वैरपिजनैः आशयविनिमयार्थं भाषैवोपयुज्यते। यथा यथा मानवस्य व्यवहारमण्डलं आगोलव्यापकं भवति तथा तथा तस्याशयविनिमयमण्डलमपि विकासं प्राप्नोति। एवं सति सार्वलौकिक-व्यवहारार्थं का नाम भाषा अस्माभिः स्वीकर्तव्या ? इयमेवात्र समस्या। प्रायोगिकदृष्ट्या व्यावहारिकदृष्ट्या च भारतीयस्य तद्विषये आंगली भाषा स्वीकरणीया इत्यत्र प्रतिभाति।

अत्र आङ्गली भाषा न खलु केषांचन अङ्गुलीमेयानां हूणानां भाषा। यदि ते तथा अभिमन्यन्ते तर्हि तत् तेषां मूढतैव। भाषा नाम तेषां समेषामपि धनं ये जनाः तया व्यवहरन्ति। भारते सर्वेष्वपि विद्यालयेषु आङ्गलभाषा पाठ्यविषयेष्वन्यतमा। पितरस्तु स्वशिशूनां शिक्षाविषये प्रत्यक्षं परोक्षं च

---

act with people outside their native place. This is the position of all of those who have got some kind of skill in any subject or work.

As regard man the main means of contact with others are communication of ideas. For this purpos all people in the world depend on language. The wider the area of contact, the more extensive the scope of communication too. In this circomstance which language should we accept for communication ? This is the problem here. In this respect if we view matters with a practical outlook it seems that English is the language to be accepted by indians.

Now English is not a monopoly of a few English- people alone. If they think so it is only their ignorance. Language is a property of all those who speak it. English is one of the subjects to be studied in all High Schools in India, Parents give more importance to English directly and indirectly in education

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आङ्ग्ल्याः प्राधान्यं कल्पयन्ति। पाठ्यविषयेषु आङ्ग्ल्याः द्वितीयं स्थानं दत्तम्, तथापि फलतः अध्ययने तस्याः प्राथम्यं प्रकल्प्यते। इदं तु वस्तुतः पाश्चात्यपारतन्त्र्यस्य अवशिष्टोंऽशो नैव। किन्तु तस्या भाषाया घटनालाघवमेव ईदृशप्रचारस्य आकर्षकत्वस्य च कारणम्।

मातृभाषा तु सर्वथा जटिलापि सङ्कुलापि शिशोः करचरणमिव स्वयं वशीभवति पोषं प्राप्नोति च। तदितरा भाषा यदि वशीकरणीया तर्हि मनःपूर्वः प्रयत्न आवश्यक एव। यस्या भाषाया जटिलता अल्पीयसी तस्या अध्ययनं सरलं भवति। भारते सर्वेषामपि समाराध्या भाषा संस्कृतमेव। तां व्यवहारदशामारोपयितुं यः प्रयत्नः कैश्चन क्रियते स कृच्छ्रसाध्य इति प्रतिभाति, यतः व्यवहारभाषाया अनुपेक्षणीया ऋजुता सरलता च बहोः कालात् पूर्वमेव तस्याः प्रणष्टा। पाणिनिः तदानीन्तनीं भाषामपग्रथ्य व्याकरणे विस्मापकं कमपि ग्रन्थमरचयदिति यद् तदुचितमेव। तादृशमपग्रथनं भाषाशास्त्रकारस्य कर्तव्यमेव। किन्तु तस्य शाब्दिकाचार्यस्य अनन्तरकालीनाः

---

of their children. Though only the second place is given to English in syllabus, in fact, it is given the first place in Schools. Certainly this is not a remainder of our dependence on western civilisation. Only the simplicity of the structure of the language is the main factor of attraction towards it.

Though the mother-tongue is difficult and confusing a child will get used to it along with its limbs and it will develop with them. If one wants to get command over any language other than ones mother tongue, a conscious effort is required. The language, the structure of which is less complicated, will be easily accessible to all. In India Sanskrit is the only language which is respectfully approached by all. But the attempt to make it a spoken language, seems to be futile. Because, through ages it has lost its simplicity and straightness, the most essential aspects of a language in spoken stage. It is quite appropriate that Panini had composed a wonderful work on grammar adopting analytic method. Such an analysis is a must as regards a linguist. But the successors of the great grammarian took the

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्कृतिमेव भाषासर्वस्वममन्यन्त। तत्रैव तेषां स्खलितमभूत्। अनन्तरं ते व्याकरणशास्त्रकार्याण्युदाहर्तुम् काव्यं रचयितुमपि साहसमकुर्वन्। अलङ्कारशास्त्रेऽपि सहृदया एवमेव समाकृष्टा अभवन्। एवं च क्रमशः शिक्षायां शास्त्राध्ययननिष्कर्षः वाल्मीकिव्यासादीनां भाषासु विद्यमानं स्वाभाविकं सारल्यं वैशद्यं च निजघान। व्यासभाषातः कालिदासभाषा प्रौढा। तथापि अनितरसाधारणस्य काव्यसौन्दर्यस्य सत्त्वात् तदीयानि काव्यानि सहृदयानाचकृषुः। तदनन्तरं भाषाशास्त्रातिप्रसरेण क्रमशो जटिला सञ्जाता। पाणिनीयविधिवैचित्र्याणामुदाहरणार्थं तथैव आलङ्कारिकसङ्केतवैविध्यप्रकाशनार्थं च यतः प्रभृति काव्यानि रचयितुमारभन्त ततः प्रभृति संस्कृतभाषायाः स्वाभाविकं सौन्दर्यं गौरवं च प्रणष्टम्। कालान्तरे अद्यतनानि कायिकताराणि इव कतिचन पण्डिताः तत्र तत्र परस्परमसम्पृक्ताः अद्भुतजीविनः समाजे प्रभावमविन्दन्त। संस्कृतभाषा केवलं तादृशां पण्डितानां अभिगम्या सञ्जाता। तादृशीं दशां प्रपन्नायास्तस्याः अधुना व्यवहारभाषीकरणं न सुकरम्। सा अस्माकं संस्कारस्य भाषा। अत एव सा गहना आदरणीया च। यदा यदा वयं धर्मभ्रष्टा भवेम तदा तदा आवश्यकानमूल्यान उपदेशान् दत्वा

---

work as the last word of the language. There they committed blunder. Then onwords they began to write poems simply as to demonstrate grammatical rules. Likewise the writers had been attracted by the poetics also. Thus the importance of the study of Shastras in education gradually destroyed the natural beauty and simplicity that we see in language of Valmiky and Vyasa. Though the language of Kalidasa is a little more defficult and matured than that of Vyasa, his works attracted the learned because of their extraordinary poetical beauty. In course of time language became more and more complicated with the attack of Shastras. Whence poets began to compose poems to exemplify the rigid rules of Panini and to display the defferent aspects of rhetorics. Sanskrit language lost its beauty and gravity. Later on, just like the Olympic stars of today, a few scholars living isolated from each other, got a high status in the soceiy as wonderful figures. Sanskrit had been monopolised by such scholars. Now to bring it to the level of spoken language is not easy. It is the tongue of our culture, not the tongue of our day-today affairs. It is deep as well

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वैरप्यादरणीये पितामहीपदे सा विराजताम् ।

आङ्ग्लीभाषामपेक्ष्य संस्कृतस्य सङ्कुलतापि तस्य व्यवहारभाषीकरणे प्रत्यवायीभवति । उदाहरणैः इदं स्पष्टीक्रियते ।

पदानां लिङ्गवचनविभक्तिषु परस्पराश्रयत्वं, प्रकृतिप्रत्ययानां संश्लिष्टता, सन्धिविषयका विकाराः, कालप्रकाराणां अवान्तरभेदं स्पष्टीकर्तुम् विधीयमानानां प्रत्ययानां बाहुल्यं इत्यादयो भाषायाः संकीर्णतायाः प्रयोगक्लिष्टतायाश्च कारणानि । तादृशभाषायाः सम्भाषणावसरे वक्ता बुद्धिपूर्वं क्लेशमनुभवति । ईदृशसङ्कीर्णतायाः सत्त्वेपि मातृभाषाविषये एते कदापि न क्लेशहेतवो भवन्ति । तदितरभाषा अधिकृत्यैवायं प्रस्तावः । अनायासं संस्कृतं भाषमाणाः पण्डिताः सन्तीति सत्यमेव । किन्तु तादृशाः संख्यया अतिविरला एव । ये नाम सन्ति ते संस्कृताध्ययनाध्यापनैकतानाः जीवितसाकल्यं व्ययीकृतवन्तः स्युः । नात्र ते सामान्यवत्करणीयाः ।

---

as adorable as our grand mother. May she live long in the respectable position giving invaluable advice whenever we slip down from the path of Dharma.

Comparing wlth English there are many complications in Sanskrit which really hinder its growth to the stage of spoken language. To make it clear a few examples are given here.

Dependence of words on each other in gender, the mode of functioning of number and case, sticking of suffixes on roots, changes of letters caused by Sandhi, diversity of suffixes prescribed to moods and tenses, all these cause difficulty in the usuage of the language. The speaker feels conscious effort when he speaks it. Though there may be much complications in mother tongue, nobody feels much a difficulty in speaking it. Here, this case is related to the languages other than mother tongue. It is trúe that there are scholars who can speak Sanskrit fluently. But they are vəry few in number. Such scholars are generally seen to have spent the whole of their life in teaching and learning Sanskrit. They cannot be generalised here.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आङ्ग्ल्यां प्रायः धातोः पश्चादुपसर्गयोगेन अर्थपरिणामरीतिः दृश्यते । **Preposition** यदा क्रियाविशेषणतया प्रयुज्यते तदा क्रियायाः सञ्जायमानोऽर्थभेदः भारतीयैर्न तथा परिचितः यथाः- **put, put down, put up,, put on, put to** इत्यादयः । संस्कृते इव आङ्ग्ल्यामपि उपसर्गयोगेन धातोर्विभिन्ना अर्थाः प्रतीयन्ते ।

यथा संस्कृते प्रहारः, आहारः, विहारः, संहारः ।उपहारः इत्यादिषु प्र, आ, वि, सं, उप, इत्यादय उपसर्गाः 'हृ' धातोरर्थभेदहेतवः भवन्ति तथैव आङ्ग्ल्यां **Receive, conceive, perceive, deceive** इत्यादिषु **Re, con, per, de** इत्यादयः उपसर्गाः (**prefixes**) '**ceive**' धातोरर्थभेदं जनयन्ति । किन्तु अयं विशेषः । संस्कृते उपसर्गयोगे सन्धिकार्यैः विविधा वर्णविकारा जायन्ते । आङ्ग्ल्यां तु न तादृशानां वर्णविकाराणामवकाशः । अबलसबलक्रियाभेदः द्वयोरपि भाषयोः साधारणः । **go, be** इत्यादयः **went, was** इति यथा भवति तथैव दा , गम् इत्यादयः यच्छ् गच्छ् इत्येवं रूपं भजन्ते ।

The system of changing meaning of the roots by adding prepositicns, as sufixes, is generally seen in English. When the prepositions are used adverbially, the meaning of roots will change as: put, put down, put up, put on, put to etc. This process is very simple But such usage is not familiar to Indians. As in Sanskrit in English also roots will have different meanings by adding prefixes.

By adding the prefixes **प्र, आ, वि, सं** etc. to the root **हृ**, the words being **प्रहार, आहार विहार संहार** etc. are derived in sanskrit. Similarly by adding prefixes like Re, con, per de etc, to a root ceive, the verbal forms of receive, conceive, perceive, deceive etc. are formed in English, But in Sanskrit when prefixes are added, there will be various changes in letters by Sandhi process. In English no such changes occur. The classification of weak and strong verbs is common in both languages e.g. 'go' ,be' etc change to 'went' 'was' etc in English. Likewise **दा, गम्** etc, change to **यच्छ् गच्छ्** etc, in Sanskrit.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सन्धिकार्याणि संस्कृते अतिसङ्कुलः प्रश्नः । पाठपुस्तकेषु आधुनिकगद्येषु च सन्धिकार्याणि यथाकथञ्चित् परिहरणीयान्येव । किन्तु संस्कृतभाषां प्रविविक्षुभिः सन्धिकार्याणि सम्यक् बोद्धव्यानि । 'अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च' इत्येव वयं वाचयामः । किन्तु तस्यार्थावगमनार्थं न केवलं प्रकरणपरिज्ञानमेव पर्याप्तं किन्तु पदार्थज्ञानेन साकं पदविश्लेषबोधकं सन्धिकार्यज्ञानमप्यावश्यकम् । पदपरिज्ञानं सान्धिकार्यं च परस्परापेक्षिते स्तः ।

आङ्ग्ल्यां ईदृशी सङ्कुलता नास्ति । पदानां रूपान्तरेषु आभ्यन्तराः केचन विकाराः संभवन्तीति सत्यमेव । यथा **Recieve, Reception, Leaf, Leaves, Stop, Stopped** आदयः । किन्तु पदानां परस्परयोजने विकारा न संभवन्ति यतः आङ्गलीसाहित्यं प्रायः गद्यप्रधानम् । तत्र पद्यप्रधाने संस्कृते इव पदेष्वक्षरनियमो गुरुलघुनियमो वा नास्ति । पद्येष्वपि

The process of Sandhi is a matter of many complications. Such process can be somehow avoided in modern prose and school text books. But those who want to enter into Sanskrit must know the process of Sandhi well. We read as अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । But to understand its meaning not only the acquaintance with the context but also the knowledge of process of Sandhi which familiarises the method of splitting words along with the knowledge of the meaning of words is needed. Familiar with words and the process of Sandhi are interconnected.

In English there are no such complications. It is true that if a word takes another form by adding suffixes some internal changes of letters may occur as in, receive-reception, leaf-leaves, stop-stopped, baby-babies etc. But in the joints of words there will be no change of letters as in Sanskrit-Ramah Vadati, Ramo Vadati. The reason is that the English literature mostly contains prose. There are no hard and fast rules to limit letters in a line according to metres as in Sanskrit. In English so many varieties

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आङ्गल्यां संस्कृते इव छन्दसां वैविध्यं न विद्यते । संस्कृते तादृशानियमानां सत्त्वात् अक्षराणामत्यन्तसंहिता अपरिहार्याऽभूत् ।

पदानां परस्परबन्धद्योतकान् प्रत्ययान् उत्सृज्य प्रादिपदिकानां परस्पर-संयोजनमेव समासस्य स्वभावः खलु । यथा गिरेःअथवा गिरीणां श्रृङ्गः इत्यस्य गिरिश्रृङ्गः इति रूपम् । इयं प्रक्रिया अर्थस्य रूपस्य च शिथिलतापरिहारार्थं स्फुटतार्थं च उपकरोति । किन्तु एवं बहूनां पदानां समासः अर्थं स्फुटतां सरलतां च निहन्ति । महाभारतादिषु समासे अयं दोषो न दृश्यते । कादम्बर्यादिषु दीर्घदीर्घसमासैः भाषायाः सरलता चैतन्यं च विलुप्तमनुभूयते ।

आङ्गल्यां भूतकालस्यैव प्रत्ययोऽस्ति । स तु केवलमेक एव । यथा **looked, worked** इत्यादिषु **ed.** वर्तमानकाले केवलं धातुरेव प्रयुज्यते । तत्र कर्तुरेकत्वद्योतनार्थं 's' इति प्रत्ययः संयोज्यते । अयं न कालप्रत्ययः किन्तु

---

of metres, as in Sanskrit, are not available. Such rules cause several changes of letters.

The nature of Samasa is, of course, to join words to each other leaving suffixes that show the relation of words. Instead of 'top of hills' we say 'hill-tops' and 'a boy studying in school' we say 'school-boy'. This process is useful for clarity of ideas and to get rid of looseness of component words. But, to join together several words, in the process of Samasa overturns the simplicity and clarity. We do not see such deffects in Mahabharata. In Kadembari and in some similar works spirit and simplicity of the language seem to be laking due to such lengthy Samasas.

In case of finite verbs only one suffix is seen to be used in past tense in English as 'ed' in the forms as looked worked etc. In present tense the original form of root is used. To show the singular number of the subject 's' is added to it. This 's'is

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वचनप्रत्यय एव। भूतकाले प्रत्ययं विहाय धातोः रूपान्तरीकरणेनापि भूतकालो द्योत्यते। यथा **write wrote, go went** इत्यादि। एवं च अबलक्रियाणां भूतकालद्योतनार्थं एक एव प्रत्यय आङ्ग्ल्यां विद्यते। अन्ये कालप्रकाराद्यर्थविशेषाः अनुप्रयोगेनैव द्योत्यन्ते। यथा **will go, should go, might have gone etc.**

अत्र तु संस्कृते कालप्रकारार्थद्योतनार्थं पुरुष वचन पद भेदात् परश्शताः प्रत्ययाः सन्ति। कालप्रकारार्थद्योतनार्थं कृत् प्रत्यया अपि प्रयुज्यन्ते। यथा–स गच्छन् आस्ते। इदं पुस्तकं मया लिखितम्। एकं गृहं क्रेतव्यमास्ते। तेषां लिङ्गवचनपुरुषेषु कर्त्रा कर्मणा वा बन्धोऽनिवार्यः। अथ च विकरणप्रत्ययानां वैविध्येन एकमेव रूपं विभिन्नं भवति। धातूनां प्रत्ययानां वैविध्यमिव तेषां सन्धौ सम्पद्यमाना विकारा अपि रूपनिष्पादने क्लेशं वर्धयन्ति च।

---

the suffix indicating number: not tense. And also without adding any suffix and by merely changing the form of a few roots, the form itself will indicate the past tense, e. g. write-wrote, go-went etc. So it is clear that only one suffix is seen to show the past tense in English. Meaning of all other tenses and moods are shown by using auxiliary verbs to the roots separately, e.g. will go, must go, would have gone etc.

Here, in Sanskrit to show the tense and moods there are more than one hunbred suffixes prescribed to show the persons numbers and padas. Apart from this, to indicate the sub divisoins of tense and moods some suffixes prescribed in कृत् (participles) are also used e.g. गच्छन् आस्ते। इदं पुस्तकं मया लिखितमस्ति। एकं भवनं क्रेतव्यम् (He is going. This book is written by me. One house is to be purchased) Such forms must be in conformity with their subjects or objects. And also due to **Vikarana Pratyayas** the same form of tense or moods will differ. Changes that take place due to Sandhi like the numerous suffixes cause much confusion in formation of words.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आङ्गल्यां नामपदैः सह विभक्त्यर्थद्योतकानां प्रत्ययानां स्थाने preposition प्रयुज्यते। नामभिः सह असंपृक्तत्वात् तेषां प्रयोगः सुकर एव। संस्कृते तु रामस्य कवेः प्रभोः नद्याः करिणः विदुषः इत्येवं समानविभक्तौ समानवचने च रूपाणां वैविध्यं दृश्यते। आङ्गल्यां एतदर्थं तु of Rama, of the poet, of the Lord, of the river, of the elephant, of the scholar इत्येवं नामपदेभ्यः पूर्वं पृथक् Preposition संयोज्यते। अत्र न क्वापि सन्धिकृतो विकारः समापतति।

विशेषणपदानां प्रयोग इतोऽपि क्लेशकरः। विशेषणविशेष्ययोः लिङ्गवचनविभक्तिषु परस्परबन्धः अनिवार्यः खलु। shining moon, shining dusk, shining star इत्येतत् यदि संस्कृते परिभाष्यते तर्हि लसन् चन्द्रः, लसन्ती सन्ध्या, लसत् तारं इत्येवं परिणमति। अत्र लसत् इति पदस्य परिणामः श्रद्धेयः। एकैकस्यापि विभक्तिप्रत्ययसंयोजने एकैकं रूपं भवति। लसन्तं चन्द्रं, लसन्तीं सन्ध्यां, लसत् तारं। आङ्गल्यां तु न कदाप्येतादृशा रूपभेदाः सम्भवन्ति। यथा by shining moon or moons, by shining dusk or dusks, by shining star or stars.

In English instead of suffixes prescribed to cases, we use prepositions. Since they are completely detached from nouns, their usage is very easy. But in the forms like रामस्य, कवेः, प्रभोः, नद्याः, करिणः, विदुषः in the same case and number, we see much difference. In English in such cases prepositions are used before nouns like of Rama, of the poet, of the Lord, of the River, of the elephant, of the scholar. Here there is no change due to Sandhi process.

Usage of adjectives is more confusing in Sanskrit. Adjectives and nouns must agree with each other in gender, number and case. If we translate "The shining moon, shining dusk and shining star" into Sanskrit, it will be a लसन् चन्द्रः, लसन्ती सन्ध्या, लसत् तारम्। Here we can note the change of word लसत्। When we add suffixes of case the form will be again different e.g., लसता चन्द्रेण, लसन्त्या सन्ध्यया, लसता तारेण। In English there is no such difference. See, **by shining** moon or moons **by shining** dusk or dusks, **by shining** star or stars.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृते दृष्ट लिखित इत्यादि क्तप्रत्ययान्तानां रूपाणां स्थाने आङ्गल्यां **looked written** इतिवत् **past participle** रूपमेव प्रयुज्यते । लिखत् भाषमाण इत्यादि शतृशानच्प्रत्यययो: स्थाने **writing talking** इत्यादि **present participle** प्रयुज्यते । तथैव पाठ्य पठितव्य पठनीय इत्यादि कृत्यप्रत्ययान्तानां स्थाने **readable** इत्यादीन्यपि । एतानि सर्वाण्यपि धातोरुत्पन्नानि नामविशेषणानीत्यत: विशेषणविशेष्ययोरन्योन्यबन्धे निर्बन्धोऽस्ति । अध्ययनेन स्वायत्तीकरणीयानां भाषाणां विषये एतत् सर्वं इतरापेक्षया क्लेशकरमेव ।

लिंगविषये तु आङ्गल्यां सर्वनामसु **He** इत्यस्यैव रूपभेदोऽस्ति । संस्कृते तु युष्मदस्मच्छब्दाभ्यां विना सर्वेषामपि रूपभेदो विद्यते । एवमेव संस्कृते शब्दानामर्थमाश्रित्य लिंगनिर्णयो न क्रियते । तेषां प्रत्ययमाश्रित्यैव । अमुक: प्रत्यय: अमुकस्मिन् लिंगे भवति । अत: तत्प्रत्ययान्त: शब्द: तल्लिङ्ग: इत्येवं निर्धारणं क्रियते । एवं च एकस्मादेव धातोरुत्पन्ना एकार्थका: शब्दा

In place of **Drishta likhita,** which end in suffix त in Sanskrit, the forms of past participle like looked, written etc. are in prevalence in English. Likewise instead of the forms as **Likhat** and **Bhashamana** that end in **at** or **mana,** present participle is used in English. Similarly in the forms of **pathya, pathitavya** and **pathaneeya,** the forms as readable are seen in English. Since all such forms derived from roots come under the section of adjectives they must be agreeing with nouns in all aspects. In the case of a particular language which has to be mastered by special study all this will be confusing in comparison with other languages.

In respect of gender in English only the forms of 'He' in pronouns undergoes change; while in Sanskrit except the pronouns **Yushmad** and **Asmad** all undergo change in gender. In Sanskrit, gender will have to be ascertained by suffixes, not based on the meaning of word. Particular suffix is in particular gender. So word ending that suffix, should be used in the same gender. This is the method to ascertain the gender of words in Sanskrit. As a result, different forms of the same root in the same

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकस्मिन्नेव लिङ्गे प्रयुज्यन्ते। यथा तुष्टिः स्त्रीलिङ्गे। तोषः पुंलिङ्गे। तोषणं नपुंसकलिंगे च। इयं रीतिः सेमेटिक् गोत्रीयाभ्यो भाषाभ्यः संस्कृते संक्रान्तेत्यूहितुं शक्यते। एतादृशो लिङ्गनिर्णयक्लेशः आङ्गल्यां विरलं विद्यते।

संस्कृते नामभिर्विशेषणैश्च सह प्रयुज्यमान एक एव प्रत्ययः विभक्त्यर्थं वचनार्थं च अभिधत्ते। आङ्गल्यां तु तदर्थद्वयार्थं विभिन्ना एव प्रत्यया विद्यन्ते। यथा कविभिः इत्यत्र भिस् प्रत्ययः तृतीयाविभक्त्यर्थं बहुत्वं चाभिधत्ते। आङ्गल्यां तु **by the poets** इति **by** इति विभक्त्यर्थं **s** इति बहुत्वं च सूचयति। क्रियारूपेषु तु एक एव प्रत्ययः कालं, पुरुषं, वचनं च द्योतयति। तथा–लिखति इत्यत्र ति प्रत्ययात् वर्तमानकाले एकेन प्रथमपुरुषेण क्रियमाणं लेखनमित्यर्थः प्रतीयते। हिन्द्यामिव संस्कृते लिङ्गभेदो नास्ति इत्यत्र विशेषः।

---

meaning will be in different gender e.g. **Thushtih** is a Feminine gender. **Toshah** is in masculine, **Thoshanam** is in neuter. This method can be inferred to have come from the languages of sametic family. Such complications are not seen in English.

In Sanskrit, the same suffix added to nouns and adjectives shows the meaning of case and number. But in English there are separate suffixes to show those meanings. e.g. In word **Kavibhih** the suffix **Bhih** indicates the meaning of **triteeya Vibhakthi** plural number together. In English in 'by poet' 'by' shows the meaning of **Vibhakthi** and 's' that of number. In finite verbs the same suffix indicates the tense, number and person. e.g. From the suffix **Ti** we know that the writing is done by a single third person. In Sanskrit there is no agreement between subject and verb in gender as we see in Hindi. Only this is the speciality in Sanskrit in the case of agreement between words.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आङ्गल्यां एकस्मिन्नेव वाक्ये सर्वनाम्ना कर्तृपदस्यावर्तनं भारतीया नामस्माकं नावश्यकमिति प्रतिभायात् । रामः गृहं गतः इत्यस्य **Rama went to his house** इति प्रयोगः । सः तस्या भाषायाः विलक्षणशैल्येव । एवमेव A तथा **the** इति **article** द्वयस्य प्रयोगेऽपि भारतीयानामस्माकं विलक्षणता प्रतिभायात् । सापि भाषाया शैलीविशेष एव । तयोः प्रयोगोऽपि संस्कृतापेक्षया अतिसरल एव । यथा A **man** = कश्चिन्नरः । **In a man** = कस्मिंश्चिन्नरे । **for a girl** = कस्यैचित् कन्यायै ।

द्विवचनप्रयोगो भारतीयभाषासु न दृश्यते । अरेबियन् भाषासु तु अयं सुलभ एव । अन्ये कतिचन विशेषा इव अयं प्रयोगोऽपि सेमेटिक् वंश्यभाषासंसर्गेण जाता इति मन्ये । अस्मिन् विषये "तया गृहीतं नु मृगाङ्गनाभ्यः ततो गृहीतं नु मृगांगनाभिः" इत्येव वक्तुं शक्यते । यत् किञ्चिदप्यस्तु अयं प्रयोगविशेषोऽपि संस्कृते प्रयोगसरलताया प्रतिबन्धकोऽनुभूयते ।

संस्कृते इव द्राविडभाषासु अरेबियन् भाषासु च ईदृशानि क्लिष्टानि बहूनि सन्ति । तासु काश्चन भाषणदशामतीताः । तदितरा अद्य भाषण-

---

We may feel the repetition of subject by using pronouns in the same sentence unnecessary e.g. **Ramah griham gatah**. Rama went to his house. **Seeta Mataram Apasyat.** Seeta saw her mother. This can be considered as a peculiar style in English. The usage of the articles 'A' and 'The' is very simple comparing with that in Sanskrit. See, a man. **Kaschid Narah**. In a man **Kasmimschid Nare**. For a girl **Kasyaichid Kanyayai**.

Usage of dual number is a strange thing in Indian languages. It is common in Arabian languages. Like someother specialities, this usage also has come to prevail due to contact with the languages of semetic family. In this respect it is better to say "Has she practised her look from deer or has the deer practised it from her?" (From Kumarasambhava). Whatever it may be, this speciality also seems to be lessening the simplicity of the language.

Like in Sanskrit, there are much more complications in the languages of Dravidian and semetic families. Some of them

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दशायां वर्तमानाः तद्देश्यानां मातृभाषा इत्यतः तादृशाः क्लेशा तैर्नानुभूयन्ते।

अथ चास्त्यन्योऽपि क्लेशहेतुः। संस्कृते एकस्य पदार्थस्य बहवः पर्यायाः सन्ति। संस्कृतसाहित्ये छन्दोनियमनियन्त्रितानां पद्यानां बाहुल्यात् पद्यानामर्थौचित्यमविगणय्यापि सर्वेषामपि पर्यायाणां प्रयोगः प्रचारमविन्दत। आङ्गल्यां तु प्रायः एकस्य पदार्थस्य एकमेव पदं प्रयुज्यते। अतो बहूनां पदानामर्थाध्ययनक्लेशो न भवति। यथा संस्कृते सूर्यस्य 54 पर्यायशब्दाः सन्ति। तत्स्थाने आङ्गल्यां sun इत्येकमेव पदं प्रचारे विद्यते। तथैव वृक्ष इत्यस्य 13 पर्यायशब्दाः सन्ति। आङ्गल्यां तु Tree इत्येकमेव पदं तदर्थे प्रचलति। अपि च संस्कृतकोशे विद्यमानानां बहूनां पदानां विविधानि गुणितरूपाणि च प्रचरन्ति। यथा वृक्षस्य कोशे महीरुह इति पर्यायो

---

ceased to exist in spoken stage. Those who speak the other ones, do not feel the difficulty, because of being their mother tongues in their respective regions.

And also there comes another difficulty. In Sanskrit *there* are many synonymous words to show the meaning of the same thing. Since the Sanskrit literature mostly contains verses which are strictly restricted by metrical rules, the usage of the synonyms of many kinds became prevelent in use without considering whether they are apt to the context or not. But in English, generally only one word is used to show the same meaning. Therefore there is no difficulty to learn several words to indicate the same thing. For example, in Sanskrit, 54 Synonyms are used to indicate the meaning of the Sun. In English, instead, only one word (Sun) is used. To indicate the meaning of 'tree' are 15 Synonyms in Sanskrit. In English only tree is used. In Sanskrit, also the multiplied forms of many words are used by poets owing to the metrical rules e.g. There is a word **Maheeruha** the synonym

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दृश्यते । स शब्दः भूमेः पर्याय संयोजनेन भूरुहः भूमिरुहः क्षितिरुहः इत्येवं तत्तत्पद्येषु छन्दोनियमानुरूपं कृत्रिमरूपाणि दधाति । भाषाया उद्देश्यं पदार्थज्ञानमेव, न खलु तदुपकरणानां पदानां ज्ञानम् । यदि पदार्थज्ञानमेकेनैव पदेन सिध्यति तर्हि किमर्थं बहुपदज्ञानप्रयासः ? एवं पर्याय बाहुल्यमपि संस्कृत-प्रचारस्य लोपे हेतुरभूत् ।

भारते इतर भाषापेक्षया हिन्दी भाषायाः सङ्कुलता अल्पीयसी । तमिलभाषायामिव हिन्द्यामपि क्रियाया लिङ्गस्यापि निर्बन्धोऽस्तीति सत्यमेव । तथापि पदानि इतरभाषास्विव न संश्लिष्टानि । प्रक्रिया न तावत् जटिला च । भाषायाः प्रक्रिया सारल्यविषये भारते हिन्द्या एव प्रामुख्यं देयम् । किन्तु अन्यान् विविधान् विषयानधिकृत्य यदि विचिन्त्यते तर्हि आङ्गल्या एव व्यावहारिकमण्डले प्रामुख्यं देयम् ।

एतावता प्रस्तावेन आङ्गलीभाषा अतिसरला अतिसुगमा तथा संस्कृत भाषा अतिकठिना दुरधिगमा चेति मा मन्यताम् । अन्यभाषापेक्षया आङ्गल्या

---

of tree in Sanskrit. The same word is artificially multiplied as **Bhoomiruha Bhooruha Kshitiruha** and so on. The ultimate aim of language is to understand the meaning, or idea, not to be familiar with synonyms of words. If we can understand the meaning by one word, why do we take effort to learn so many words for one meaning ? Thus, the plentifulness of synonyms and their multiplicity also adversely affected the spread of Sanskrit.

In India comparing with other languages, Hindi is very easy. It is true that as in Tamil, the agreement in gender between the subject and verb is necessary in Hindi. But words are not so attached as in Tamil and some other languages. As regards the simplicity of the process of structure of a language, Hindi stands first in India. But considering many other aspects English deserves preference.

By the above description you don't think that Sanskrit language is extra-ordinarily difficult and English is remarkably easy.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अध्ययने कतिचन क्लिष्टताश्च सन्ति। तासु विलक्षणवर्णविन्यासरीतिः उच्चारणशुद्धिशून्यता चेति द्वयमतिप्रधानम्। वर्णविन्यास एकथा, उच्चारणं त्वन्यथा च इति चेत् भाषाया व्यवस्था उच्चावचा स्यात्। इयमव्यवस्था आङ्ग्ल्यां दृश्यते। किन्तु संस्कृते न क्वचिदपि इयमव्यवस्थितिः संभवति। आङ्ग्ल्यां crow grow bow cow इत्यादिषु अक्षराणामेकत्वेऽपि उच्चारणं भिन्नमेव। great break seat इत्यादिषु च भिन्नं वर्तते। अथ च उच्चारणे अव्यक्तता आङ्ग्ल्यां अतितरां संभवति। अतः विदूरभूखण्ड वासिभिः सह लेखनद्वारा सम्पर्कः सुकरोऽपि भाषणद्वारा न सुकरः। उच्चारणशुद्धौ तेषां न तादृशो निष्कर्षोऽस्ति यादृशः संस्कृतभाषायां विद्यते। यतः आङ्गल्यां आहृत्य 26 अक्षराणि सन्ति। संस्कृते तु आहृत्य 48 अक्षराणि च। आङ्गल्यां असंहृतरीत्या पृथक् पृथक् लिखितानि तानि संयोज्यैव बहुप्रकारमुच्चारणं वितन्यते। संस्कृते तु एकैकस्योच्चारणस्य एकैकमक्षरं पृथक्पृथगस्ति। अतः उच्चारणस्य स्पष्टता स्वतः संभवति। यथा - क् ष् अ = क्ष। आङ्ग्ल्यां तु ksha. आङ्ग्ल्यां 'construction' इति पदे द्वादश वर्णाः सन्ति। तदेव पदं यदि संस्कृते लिख्यते तर्हि पञ्चाक्षराणि स्युः यथा कण्स्ट्रक्षन् इति।

Comparing with other languages in some aspects we feel much difficulties in English also. Among them the spelling system and want of clarity in pronunciation are most important. If the letters are not in conformity with pronunciation, all aspects of the language will be confusing. We see such a confusion in English. But in Sanskrit we can never see such a confusion. In English though the vowels are the same in words like crow, grow, bow, cow etc. and seat, great, create etc., pronunciation is different. Similarly in English we experience the want of clarity in talk. Therefore, though the contact with the people of different countries it is easy in writing, but it is not easy in talking. The main reason of difference in clarity of pronunciation in English and Sanskrit is: in English we have only 26 letters while in Sanskrit the alphabet contains 48 letters. Different pronunciation in English is made by combining letters written separately. But in Sanskrit each pronunciation of both syllabic and singular characters has its own separate letter e.g. क् ष् अ = क्ष; in English, Ksha. The word 'construction' contains 12 letters. If we write the same word in Sanskrit character it would contain five letters as कण्स्ट्रक्षन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अत्र नेदमभिप्रेतम् यद् भारते आसेतुहिमाचलं सर्वेऽपि संस्कृतं सर्वथा एककण्ठमेकस्वरं च भाषन्ते इति। देश्यभेदे सत्यपि परस्पर भाषणे उच्चारणवैकृताद् जायमानो न कोऽपि दोषोऽनुभूयते इत्येवात्र विवक्षितम्। आङ्गल्यां वर्णविन्यासरीतिः अध्ययने क्लेशमुत्पादयति। तथैव विभिन्न-भूखण्डवासिनां उच्चारणं परस्परं दुर्ग्रहं चेति यत् तत् सत्यमेव। तथापि तदध्ययनेनैव वृत्तिर्लभ्यते तथा आधुनिके युगे तत्तद्विषयेषु देशान्तरवासिभिः सह सम्पर्कमाधातुं शक्यते इति हेतोः छात्राः तदध्ययनं क्लिष्टमप्यक्लिष्टमामनन्ति। अतः आङ्ग्लीशिक्षा भौतिकजीविते अत्यावश्यकी सञ्जाता। अत एव संस्कृता-ध्ययने क्लेशः स्वतोऽप्यधिकतरमनुभूयते च। यत्र अनिवार्यता अस्ति तत्र दुष्करं सुकरं भवति, अन्यथा सुकरं दुष्करं च सम्पद्यते। लौकिकजीवितमिव आत्मीयजीवितमपि मानविकतायाः समुन्नतये आवश्यकमित्येतत् न कदापि विस्मर्तव्यमस्माभिः। यदा इदं तथ्यमस्माभिः साक्षात्क्रियते तदैव आत्मीयमूल्यानां शेवधेरस्याः संस्कृतभाषायाः अध्ययनं सुकरं सरसं च स्यात्। तथैव वृत्तिला-भार्थं संस्काराकरभूताया अस्या भाषाया अध्ययनमनिवार्यमेवेति निर्बन्धः संस्कृतभाषापठनं सुकरं करिष्यति।

Here it is not meant that all scholars are speaking Sanskrit in the same tone and style all over India. What is meant here is only that in spite of dialectical peculiarities, nobody feels difficulty in understanding the ideas of talk of each other. Though the spelling system creates much confusion in study of English, the students do not take it serious or difficult, because they know that they would get job only with its study and are fully aware that they will be able to contact the people belonging to different corners of the world in the modern age. So English study has become most essential for meterial life. It is why they feel that the study of English easier and Sanskrit study more difficult than actually it is. If unavoidable, all difficulties become easy. Other-wise easy becomes difficult. This is a fact. We should not forget that for a healthy and harmonious growth of humanity material and spiritual existence is equally important. If we would be aware of this fact, the study of Sanskrit will become easy and interesting. Similarly a compulsion that all should learn Sanskrit to get employment, will make its study easy.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतत्संबद्धं किमपि अन्यत् वस्तुतत्वमपि अत्र विशदीकरणीयमास्ते। शब्दकोशविषये भारतीयच्छात्राणां संस्कृतं सुगमं भवति। यतः भारतीय-प्रान्तीय भाषासु पञ्चाशत् प्रतिशताद्भ्यधिकं तदभवरूपेण तत्समरूपेण-वा संस्कृतपदानि प्रयुज्यमानानि सन्ति। अतः संस्कृते भूयिष्ठानि पदानि छात्राणां परिचितानि स्युः। विभक्ति-लकार-तद्धितकृदन्त-सन्धि प्रभृतीनां केषाञ्चन व्याकरणप्रकरणानां अध्ययनेनैव सामान्यबुद्धिमतां भारतीयानां छात्राणां संस्कृतं सुगमं भविष्यति। किन्तु तेषां प्रकरणानामध्ययनरीतिः सर्वथा नवीना भवेदित्येतदत्र सर्वप्रधानम्। एवमेव संस्कृताध्ययनं उज्जीवयितुं छात्रानाक्रष्टुं च शक्यं भविष्यति। अथापि तां राष्ट्रभाषापदं अथवा भाषणदशा-मारोपयितुं कृच्छ्रात् शक्यमेव। सेयं भाषा सार्वलौकिकमानुषिकमूल्य साकल्यस्य भाषा भूत्वा लोकेऽस्मिन् अनश्वरं वर्तिष्यत एव।

An important point also has to be explained in this connection. As regards the vocabulary, an Indian student would feel it very easy. Because, all regional languages of India contian more than 50% of vocabulary adopted from Sanskrit either as **Tadbhava** or as **Tatsama**. So, most of the words will be somehow familiar to them. To an average Indian student, Sanskrit will be accessible by learning some details of a few topics of grammar like विभक्ति लकार तद्धित कृदन्त सन्धि etc. But the approach to such topics must be modern; it is most important. Then only Sanskrit study can be revived and made attractive to the students. Even then sanskrit can be hardly promoted to the stage of a spoken language or the national language. It will remain as a tongue of the totality of the human values of the world, forever.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उद्धारणं जगति पापजुषां जनानां
निर्धारणं सुकृतदुष्कृतयोर्गतीनाम् ।
अत्यन्तमन्धतमसांबुधिमज्जितानां-
मुत्तारणं चरणमादिगुरोर्नमामि ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

भाषायाः शास्त्राणां चाध्ययनस्य परस्परमिश्रणमेव संस्कृतशिक्षायाः प्रसारे प्रत्यूहहेतुः। संस्कृते यदि पुराणकाव्याद्यास्वादनार्थं पर्याप्तः भाषापरिचय आवश्यकः तर्हि पाणिनीयादि शास्त्रग्रन्थानामध्ययनं नावश्यकम्। तदर्थमन्यो मार्गो मार्गणीयः। कालानुकूलपाठ्यपद्धतेराविष्करणविषये तदधिकृताः तथा विद्वांसश्च व्यापृता भवेयुः। भाषाप्रवेशनानन्तरमेव शास्त्राध्ययनमारब्धव्यम्। अन्यथा कोटीनां व्यये कृतेऽपि न किमपि प्रयोजनं स्यात्। आशय एवास्माक-मावश्यकः न खलु केवलशब्दः। अतः शब्दस्यानर्हं प्राधान्यं न देयम्। संस्कृतभाषा अस्माकं पूजनीया मातामही। सेयमस्माकं दैनन्दिनकार्येषु न नियोक्तव्या। गार्हिकराष्ट्रीयकार्यव्यवहारार्थं तस्याः प्रौढाः पुत्र्यः प्रपौत्र्यश्च सन्ति। सा मातामही तदर्हे उन्नतस्थान एव तिष्ठन्ती अस्मान् शास्तु। आवश्य-कान् धर्मान् यथाकालमुपदिशतु। तदर्थमेवास्माभिः सा अभिगन्तव्या।

THE GIST

That which impedes the spread of Sanskrit education is to mingle the study of the language with study of Shaastras. If we want a standard of knowledge in the language enough to appreciate kaavyas Puraanas etc. In their original, the study of Shaastras like Paanineeya, Nyaaya etc. is not essential. For that, we should find out another way. The only way is that the authorities and the scholars in the field should be engaged in preparing a new syllabus in conformity with this age. Only after getting a command on the language the study of Shaastras can be started. Otherwise there would be no benefit even though we can spend crores for the purpose. We want ideas, not more words. As such, we should never give much more importance to the words. Sanskrit is our grandmother. She should not be employed in our day-to-day affairs. She has got matured daughters and grand daughters to do all things in political and domestic fields. Our grand mother may advise us sitting in her high seat which she deserves and give us spiritual instructions whenever we would deviate from right paths, in time. Only with this purpose we must approach her.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषा कथं प्रसारणीया

यथा यथा कालः परिवर्तते तथा तथा मानवजीवितस्पर्शि सकलमपि परिवर्तनस्य विधेयं भवति । किन्तु यत् तादृशपरिवर्तनस्य विधेयं न जातं तत् संस्कृतशिक्षैव । अस्मद्राष्ट्रे धिषणाशालिभ्योऽपि जनेभ्यः संस्कृतशिक्षायाः सुदूरमपसरणस्य तदेव कारणम् ।

संस्कृतशिक्षा तु अद्य केवलं प्रहसनभूयमवाप्ता । तत्राभिनय एव प्रधानम् । न खलु तात्त्विकं तथ्यम् । महाभाष्यनिरुक्तादय आश्चर्यजनका महाग्रन्थाः पाठ्यपुस्तकेष्वन्तर्भवन्ति । एतान् सर्वानप्यधीत्य उन्नतबिरुदमादाय बहिरागच्छत उपात्तविद्यस्य सामान्यकाव्यास्वादनार्थमावश्यकी व्युत्पत्तिरपि न दृश्यते । इयमेवाद्यतनी दशा । कोऽत्र हेतुः ।

How to popularise Sanskrit?

The more time advances the more all connected with the life of man becomes liable to change. But what has not become liable to such a change is only Sanskrit education. That is why Sanskrit still remains far away from even intelligentsia in our country.

Nowadays Sanskrit education has become just like a farce. There, only action is important, not expression. The list of text books contains the great works like **Mahabhashya, Nirukta** etc. But a student who comes out of his college after studying all these books and taking the highest degree, is seen lacking. In such a standard of knowledge in sanskrit as to appreciate even simple poetical works. This is the fact. What is the reason for it?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाषाध्ययनशास्त्राध्ययनयोः सङ्कलनमेवात्र हेतुरिति मन्ये । प्रथमत एवास्माभिः किमध्येतव्यमिति निश्चयः कार्यः। पुराणकाव्यादिकं, उत सिद्धान्तकौमुद्यादि शास्त्रम्। यदि भाषाव्युत्पत्तिरावश्यकी तर्हि सिद्धान्तकौमुद्यादिशास्त्रग्रन्थानामध्ययनं नावश्यकम् । यदि शास्त्रव्युत्पत्तिरावश्यकी तर्हि भाषायाः स्वायत्तीकरणानन्तरमेव तदर्थमध्ययनमारब्धव्यम् ।

यद्येवं भाषापरिज्ञानार्थमन्यो मार्गो मार्गणीयः। मातृभाषाणां विषये तु तासां प्रयोगपरिज्ञानार्थं साङ्केतिकनियमानां, तथाहि व्याकरणनियमानां बोधपूर्वपठनं नावश्यकम्। तदर्था शक्तिः करचरणा इव शिशोः क्रमशः पोषं प्राप्नोति। यत् तत्र बोधपूर्वमध्येतव्यम् तत् तासां व्याकरणादि कार्याण्येव। किन्तु संस्कृताध्ययनं इतो नितरां विलक्षणमेव। तस्मिन् विषये भाषायाः स्वायत्तीकरणार्थमपि बोधपूर्वो यत्न आवश्यकः। भाषायाः स्वायत्तीकरणात् पूर्वमेव शास्त्राभ्यासः सर्वथा विफलः कृत्रिमश्च।

I think, the reason for this is that the study of language combined with the study of Shaastras. First of all we should decide what should we study. Is it the language of **Puraanas** and **Kaavyas** in Sanskrit or the **sootras** of **Paanini** ? If we want a grasp of the language, we need not study the works like **Siddhanta koumudi**. If we require knowledge in **shaastras** we should start study of them only after attaining proficiency in language.

As such, we have to find out another way to attain a working knowledge in Sanskrit. As regards the mother tongue, to get a practical knowledge in it, a conscious study of grammatical rules or some other technical aspects of its usage is not required. Capability to tame the mother tongue gradually grows in man from his childhood along with his limbs. What is to be intentionally learnt is only the grammatical aspects. But the study of Sanskrit is entirely different from it. As regards this language, even to tame it, one has to take cautious effort. Before getting command on the language study of **shaastras,** will at any rate, be fruitless as well as artificial.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किन्तु मातृभाषेव स्वयं स्वायत्तीकर्तुमशक्या सेयं संस्कृतभाषा इत्यतः तामध्येतुं केषाञ्चन भाषानियमानां परिज्ञानमावश्यकमेव । किन्तु तत् पाणिनीयसूत्राणां जटिलताद्वारा मा भूत् । भाषां प्रवेष्टुमावश्यकं ज्ञानमेवावश्यकम् । भाषां स्वायत्तीकर्तुमावश्यका मार्गाः संस्कृते पृथगेव मार्गणीयाः । यद्येवमेव संस्कृतं जनसामान्यस्य सम्पत्तिः सम्पत्स्यते । किन्तु ये नाम पाणिनीयद्वारा भाषाप्रवेशरीतिं सर्वोत्तमामामनन्ति तेषां विदुषां ईदृशः कश्चिद् विलक्षणः पन्था सङ्कल्पेऽपि दुस्सहः प्रतिभायात् ।

यथा पाणिनिः शाकल्यशाकटायनप्रभृतीनां प्राक्तनशब्दशास्त्राचार्याणां सिद्धान्तानाहृत्यैव तत् कालीनशिक्षारीतेरनुयोज्यतया अथवा अनुरूपतया भाषानियमान् साकल्यतः सूत्ररूपेण उदग्रथ्नात् तथा पाणिनेः सिद्धान्तान् आहृत्यैव आधुनिककालानुकूलं व्याकरणाध्यापनरीतिं परिष्कर्तुं अस्माभिरपिप्रयतितव्यम् । किन्तु अस्माभिरिदं तथ्यमत्र परिगणनीयम् । पाणिनेः काले संस्कृतभाषा जनेभ्य एतावन्मात्रं सुदूरमपसृता न स्यात् । सा तु किञ्चिन् किञ्चिद् भिन्नरूपेणापि तदानीन्तनानां जनानां

But, as Sanskrit is not a language to tame like mother tongue, we have to acquire a practice to compose sentence and to be familiar with vocabulary, by conscious and intentional effort. But it should not be generated through the complicated method of Paanini. Only a preliminary knowledge is needed to enter in to the language. A new way for it has still to be found out. Then only Sanskrit will be accessible to common man. But those who take Paanineeya as an excellent method for the purpose, cannot even imagine such a new way.

Paanini synthesised the rules suitable to his age touching all aspects of the language then prevailing, respecting the views of the great grammarians like **Saakalya** and **Saahataayana,** his predecessors. In the same manner, respecting Paanini's views we also have to revise the method of teaching according to the taste and limitations of this age. But here we have to consider one fact. In the age of Paanini, Sanskrit would not have been so isolated from the common people as it is now. It can be inferred that it might have been the spoken language of the

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाषा स्यादित्यनुमेयमेव । अतः तदानीं भाषायाः शास्त्रीयोंऽश एवाध्येतव्य आसीत् । तदनुसृत्य पाणिनिः तावत्पर्यन्तं विद्यमानानां वैदिकलौकिकभाषाणां नियमान् समाकलय्य सकलस्पर्शिनं समग्रं च कमपि शास्त्रग्रन्थं व्यरचयत् । सर्वथा प्रामाणिकः स ग्रन्थः अनन्तरकालिकैर्विद्वद्भिः बाढमाद्रियते स्म । पाणिनीयं ननु शब्दशास्त्रम् । नखल्वर्थशास्त्रम् । भाषा नाम शब्दार्थयोः समञ्जससम्मेलनमेव खलु । तयोः शब्दांशस्याधारशिलायामारचितं शास्त्रमेव पाणिनीयम् । पाणिनीयाराधकाः विद्वांसः भाषायाः भावांशं अवगणयाञ्चक्रुः । एवं च शब्दांशप्रधाना काचन भाषा समजायत संस्कृतम् । क्रमशः संस्कृतं सामान्यजनेभ्यः सुदूरमपसृता काचित् पण्डितभाषा परिणता ।

उपर्युक्ताद् विवरणात् इदं सिद्धमेव यद् पाणिनीयस्य लक्ष्यं न खलु भाषावगाहः किन्तु शब्दशास्त्राध्ययनमेव । प्रथमत एव भाषा स्वायत्तीकरणीया । तदर्थं यावन्तो भाषानियमा आवश्यकाः तावन्त एव नियमाः पाणिनीय सिद्धान्तानवलंब्य अथवा स्वतन्त्रतया वा अद्यतनानां छात्राणामभिरुचिमाहृत्य-

---

people of the age possibly with some changes. So, the people of that period had to learn only some aspects related to grammar, when they wanted to learn the language in detail. Therefore, Paanini did such a work on linguistics which deals with all aspects of the language comprising all peculiarities of Vedic and Loukic languages prevailing upto that period. It was an authoritative work and the successors of the great linguist took it as a *final* word in the science of language. **Paanineeya** is a work on linguistics, not on literature. Ofcourse language is a mixture of words and meaning i.e. letter and spirit. **Paanineeya** deals with only words i.e. letter. The spirit of the language had been discarded by the adorers of **Paanini**. Thus gradually Sanskrit became a language giving importance to the aspect of letter. In this manner, Sanskrit got isolated from the common people.

From the above explanation it is clear that Paanineeya is not a work intended to provide a working knowledge in the language, but for study on linguistics. The language has to be mastered first. For that purpose, certain rules, either based on Paanineeya or on any other independent way, have to be

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षणीयाः । तदवलंब्य काव्यनाटकपुराणादिसाहित्यसमुच्चयेषु ते प्रवेशयितव्याः । तत्रैव संस्कृतभाषाध्ययनस्य विरामो भवेत् । ततो यथाभिरुचि शास्त्राध्ययनमारब्धव्यम् । प्रत्युत नैषधे चतुर्थः सर्गः, कादंबरीतो महाश्वेता वृत्तान्तः, सिद्धान्तकौमुद्याः समासाश्रयविधिः मुक्तावल्याः शब्दखण्डं, काव्यादर्शाद् द्वितीय परिच्छेदः इत्येवं परस्परबन्धविरला पाठ्यपद्धतिः पराजयात् पराजयं वैमुख्याद् वैमुख्यं च छात्रान् नेतुमेव पारयति ।

भाषाध्यनविषये भावः अथवा आशय एव प्रधानम् । भावापेक्षया शब्दो ऽप्रधानमेव । भाषणशक्तिरहितानपि उदात्तभाववतो मूकान् वयमाद्रियामहे । किन्तु भावविरलः अथवा आशयेन विना सूतः शब्दः केवलमुन्मत्तप्रलपनमेव । तं न कोऽप्याद्रियते । चतुरः चतुरश्रशोभी चाशयः सभ्येन सरलेन च शब्देन यदाविष्क्रियते तदेव उत्तमा भाषा परिगण्यते । कवेः अथवा वक्तुः अन्तर्गतं भावं पठितुः अथवा श्रोतुः अन्तः संक्रामयितुं उपयुक्तमुपकरण-

---

taught accoding to the taste of the students. Based on this knowledge students can enter into the Kavyas, Natakas, Puranas etc. There the teaching of language should be terminated. After that according to the taste of students, the study of Saastras can be started. But now-a- days, quite contrary to this method, the syllabus is prepared. See, the mode of the list of prescribed text books. The third chapter of **Naishadha, Mahasweta Vrittanta** from **Kaadambari, Samaasaasrayavidhi** from **Siddhaanta Kaumudi, Saabda Khanda** from **Muktavali** second **Pariccheda** from **Kavyadarsha** etc. Such a list of text books according to such a syllabus without any connection with each other, will be enough to lead a student from failure to failure and aversion to aversion.

In the study of a language, **Bhaava** (idea or spirit) is more important than **Shabda** (words or letters). Even dumbs lacking speaking ability, but having noble ideas are respected by us. But words, lacking meaning or idea are taken as madness. Nobody cares for it. The best language is that which expresses noble ideas through chaste and simple words. Words are to be considered as the medium to transit the ideas of a speaker to

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मित्येतद्रूपेणैव शब्दः परिगणनीयः। तस्योपकरणस्य उपकार्यादधिकं प्राधान्यमदीयतेति यद् तदेव संस्कृतशिक्षाया अद्य सञ्जातः पराजयः।

भावसङ्क्रमणस्य अनेके माध्यमाः सन्तीत्यवधार्यम्। कविः स्वमाशयमाविष्कर्तुम् शब्दरूपमाध्यममवलम्बते। चित्रकारः वर्णरेखारूपमवलम्बते। नर्तकः स्वावयवान् तथा शिल्पी शिलादार्वादिकम् माध्यमीकरोति। यत् किञ्चिदप्यस्तु माध्यमम्, भावाविष्करणमेव प्रधानम्। भावाविष्करणार्थमनेकानि माध्यमानि सन्ति। तेषु कविना स्वीकृतो माध्यम एव शब्दः। तस्य तदर्हं स्थानमेव देयम्। शब्दः काव्यस्य बाह्यशरीरमेव। भाव आत्मा च। शरीराडंबरे यथा यथा निष्कर्षोऽधिको भवति तथा तथा आत्मनः प्राधान्यं विस्मर्यते। तदिदमेव मध्यशतकेषु संभूतम्। शब्दाडंबरभ्रान्ताः कवयः स्वकृतिषु शब्दांशस्य आडंबरं बोधपूर्वमङ्गीचक्रुः। तेषां काव्यान्यास्वदितुं पाणिनीयपाण्डित्येनैव शक्यमिति दशा समजायत। मल्लिनाथप्रभृतयो व्याख्यातारः शब्दशास्त्रमलङ्कारशास्त्रं चावलम्ब्य

---

the listener. We gave more importance to letters than spirit. Hence the failure of Sanskrit education today.

We must know that there are various methods to transit one's ideas to another. A poet resorts to words as the medium for conveying his emotions or ideas. An artist takes colours and lines instead of words: An actor resorts to his own limbs. A sculptor takes pieces of wood or stone. Whatever be the medium, the expression of emotions or ideas is the main aim. Thus, we see various kinds of media to express our emotions. Among them the medium adopted by a poet is words. We should give only such importance to it as it deserves. Words are the body of language. The idea is the soul. The more stress is given on make up of our body the more importance of soul is discarded. This is what happened in the mediaeval period in the field of Sanskrit education. Poets, who were made after show of words, intentionally welcomed ostentatiousness in their works. They established such a notion among scholars that to appreciate the works of poets one should attain a thorough knowledge in paanineeya. Mallinatha wrote comment-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कालिदासकृतीरपि व्याचख्युः । एवं च विद्वान् इत्यस्य व्याकरणन्यायादिशास्त्रपण्डित इति, काव्यास्वादनमित्यस्य मल्लिनाथव्याख्यावगाह इति च काचिद् धारणा रूढमूला जाता । शब्दशास्त्रे पाणिनिः व्याख्यामार्गे मल्लिनाथश्च अस्माकं सर्वथा आदरणीयावेव । तयोः क्षेत्रे तावजय्यावेव । किन्तु संस्कारोन्नमनविषये पाणिनिः मल्लिनाथश्चास्माकं तथा नावश्यकौ यथा व्यास वाल्मीकिकालिदासादयः ।

वस्तुतः काव्यास्वादनार्थं विविधा अंशाः अपेक्ष्यन्ते । तेष्वेक एव शब्दव्युत्पत्तिः । मानसिकपक्वता, भावनाशक्तिः, तन्मयीभावपाटवं इत्येवं विविधा अंशाः काव्यास्वादनार्थमावश्यकाः । एवं च पदपरिचयप्रक्रिया बाह्यैव । किन्तु तां विना तदनन्तरगम्यं भावलोकं प्रवेष्टुमशक्यं च । अत्रोदाह्रियते ।

---

aries even on works of Kaalidaasa based on mainly Paanineeya and Alankaara Saastra. Thus, a general understanding had rooted among the people that a scholar is meant a man of deep knowledge in Saastras like Vyaakarana, Nyaaya etc. And appreciation of Kaavyas is meant the depth of knowledge in **Paanineeya** and **Mallinatha's** commentaries. Of course we must adore the great **Paanini** who contributed an immortal work to the linguistics and **Mallinatha** who did such a work in the field of commentaries. But in respect of uplifting our culture, **Paanini** and **Mallinaatha** are not so essential as **Vyaasa, Vaalmeeki** and **Kaalidaasa**.

In fact, to appreciate a creative work like peoms many factors of mental resource are needed. Only one among them is to be familiar with words' meaning. Mental maturity, power of conception, ability of assimilating other's emotions; like this many things are needed to appreciate a poem. Among them the process of being familiar with the words' meaning is merely external. But without the knowledge of word's meaning, one will not be able to enter into the region of emotions. For example:

Kirtikant Sharma Collection, Najafgarh

CC-0: In Public Domain. Digitization by eGangotri

मरणं प्रकृतिः शरीरिणां
विकृतिर्जीवितमुच्यते बुधैः ।
क्षणमप्यवतिष्ठते श्वसन्
ननु जन्तुः किल लाभवानसौ ॥

इदं पद्यं विविधान् सविशेषभावान् अस्माकं हृदयेषु उत्पादयति। कदा ? पदपरिचयं तेषां परस्परबन्धं च सम्यक् विज्ञाय वाक्यरूपेण पदानां संयोजनादनन्तरमेव । तदा तु तस्माद्दितस्य भावस्य प्रकाशः गांभीर्यं च वर्धते । सः सविशेषः सन्दर्भः, वक्तुश्चितवृत्तिः, आशयस्य तात्पर्यमात्मसात् कर्तुं पर्याप्ता आस्वादकस्य मानसिकपक्वता, महतस्तस्य तत्त्वस्य संवेदनक्षमता, तत उत्स्रवन् जीवितस्यामूल्यताबोधः एते सर्वेऽपि तस्य भावस्य गौरवं महत्त्वं च वर्धयन्ति । एते सर्वेऽपि शब्दबोधादनन्तरा प्रक्रियैव । स भावलोक एवास्य सारांशः । न कदापि शब्दपरिचयः । एवं सति काव्यास्वादनार्थं शब्दशास्त्रविषये तावत् प्राधान्यं न देयम् । अतः अस्माभिरस्मिन् विषये विशिष्य बोधव-

---

"The real nature of living being is death. Life is mere change of it. Thus say the wise men. But how long a man lives, may it be for a few minutes, he can be proud of having some sort of achievement."-**Kaalidasa**.

This verse raises various feelings in our mind. When ? After understanding the meaning and relations of words and then joining words in their proper order. Then only the emotion grows grand and illuminated. The particular context, sentiment of the speaker, his mental maturity to grasp such ideas, capability of assimilating such noble thoughts, the vision of invaluability of life that oozes from it, all these things increase the magnificence and grandeur of the idea. But we experience it only after the process of becoming familiar with the word's meaning. Appreciation of the idea is the main aim of study of language, not to know mere words' meaning. As such, importance to such aspects of grammar need not be given when we appreciate the poems. Therefore, we should be particularly aware of the following fact. "If we want to teach Sanskrit, we should not

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्भिर्भवितव्यं, यद् संस्कृतभाषा यदि शिक्षणीया तर्हि पाणिनीयं न शिक्षणीयम्। यदि शब्दशास्त्रं शिक्षणीयं तर्हि पाणिनीयमवश्यमेव शिक्षणीयम्।

संस्कृतं देवभाषेत्युद्‌घोष्य तस्या अलौकिकपरिवेषाधानात् तथा तस्यामृतभाषाव्यवहाराच्च साधारणजनानां मध्ये तां प्रति अनभिगम्यताबोधः अवज्ञा च कैश्चन याथास्थितिकैः तथा भाषाशास्त्रिभिश्च समुत्पादिता। तत्तु तत्तत् क्षेत्रेषु विदग्धंमन्यानां केषाञ्चन बुद्धिशून्यानां रसनाविलसितमेवेति बहुधा समर्थितम्। ईदृशमृषावादप्रचारणात् संस्कृतशिक्षाया बहुधा महदधःपतनं सञ्जातम्। यत् संभूतं तत् संभूतमेव। अथास्मिन् विषये तदुद्धारणं कथं करणीयमित्येवात्र प्रश्नः। अस्मिन् विषये कालानुसृतायाः पाठ्यपद्धतेः आविष्करणात् तस्याः प्रयोगपथमानयनाच्च विना नान्यः कश्चन मार्गोऽस्माकं प्रतिभाति। भारते अद्य विद्यमानाः प्रायः सर्वा अपि संस्कृतपाठसरण्यः पाणिनीयपरतन्त्राः तदवलम्बिन्यश्च। पाणिनीयद्वारा भाषाया अन्तःप्रवेशः अतीव दुष्कर एव। प्रथमंभाषावगाहः, ततः यथाभिरुचि शास्त्र-

---

attempt to teach **Paanineeya;** and if we want to teach grammar with linguistic view, the study of **Paanineeya** is most essential."

Proclaiming that Sanskrit is the language of gods and so creating a supernatural halo around it and also calling it as dead language, some sort of unapproachability and aversion were created by some orthodox scholars and linguists. We have already established the fact several times that all this is the outcome of the immature thoughts of some dull-minded scholars. Because of such a false propagation, the downfall of Sanskrit education happened in various ways. What happened has already happened. Now the problem is how to uplift it. It seems that there is no other go than introducing a new method of teaching suited to modern age and bringing it into force. All methods to teach Sanskrit now prevailing in India are more or less based and dependent on **paanineeya.** To enter into Sanskrit through **paanineeya** is too difficult and not effective also. First we must tame the language. Then according to the taste, one can learn **shastras**

Kirtikant Sharma,Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रवेशः अयमेव स्यात् क्रमः। तादृशी काचित् पद्धतिरेवास्माभिराविष्कर्तव्या। तादृशं व्युत्पत्तिज्ञानं विना पण्डितसहस्राणां प्रयत्ने सत्यपि लक्षाणां व्यये कृतेऽपि संस्कृतं सामान्यजनानां हृदयं न कदापि प्रवेष्टुं प्रभवति। छात्राणां जिज्ञासावर्धनेनैव अध्यापनं सफलीभविष्यति । वर्तमानाः प्रायः सर्वा पद्धतयः जिज्ञासां निघ्नन्तीत्यनुभवसिद्धमेतत् । संस्कृतं निर्बन्धपाठ्यविषयं कर्तुम् कदाचित् शक्येत । राष्ट्रभाषापदमारोहयितुं च शक्येत । छात्रेभ्यः प्रभूतां छात्रवृत्तिं प्रदाय प्रोत्साहयितुं च शक्येत । अध्यापकान् यथाकथञ्चिदपि सृष्ट्वा सर्वास्वपि पाठशालासु तान् नियोक्तुं शक्येत। वेतनं वर्धयितुं च शक्येत। सर्वमपि कर्तुम् शक्यमेव । किन्तु संस्कृतं यदि जनहृदयेषु प्रवेशयितुमिष्यते तर्हि पाठपद्धतिः कालानुकूलं परिवर्तनीया । दश पञ्चदश वा वत्सरान् संस्कृतमधीत्य बहिर्निर्गत उन्नतबिरुद सम्पन्नो विद्वान् वाल्मीकिरामायणस्य भाषामप्यवगन्तुं न प्रभवति चेत् तादृश्यामध्ययन पद्धतौ कापि गणनीया न्यूनता अस्तीति स्पष्टमेव। तां न्यूनतां सम्यग् निरीक्ष्यावबुध्य च तत् परिहारार्थमस्माभिः सन्नद्धैर्भवितव्यम् । इतः पर्यन्तमुक्तानभिप्रायाननुसृत्य संस्कृतशिक्षापद्धतेः परिष्करणे आलोचनार्हाणां केषाञ्चन विषयाणां केन्द्रबिन्दवोऽत्र निर्दिश्यन्ते ।

---

like **paanineeya.** This must be the order. We should introduce such a scheme. We can spend lakhs and thousands of scholars can contribute their scholarship, but if we could not introduce a syllabus which fails to create curiosity among students none of our efforts will be successful. Almost all the present syllabus annihilate the curiosity of the learners. Sankrit can be made a compulsary subject in schools. It can be promoted to be our notional language. Students can be encouraged by giving sizable amount of stipend. Teachers can be appointed in all schools. Scale of pay can be increased. Everything can be done. But if we want to make Sanskrit enter into the heart of the people of this generation, we should follow a syllabus suited to the modern age. Based on these facts shown above, we give some suggestions on the matter to revise Sanskrit syllabus for consideration of the experts in the field.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

1. संस्कृतभाषा मानवसंस्कारस्य भाषेति सिद्धमेव । तामस्माकं दैनन्दिन-कार्यार्थमुपयोक्तुमस्माभिः साहसं न करणीयम् । तदर्थं प्रान्तीयभाषा एव पर्याप्ताः । संस्कृतभाषा संस्कारमयी पूजनीया मातामही खलु । सा न कदापि साधारणेषु गार्हिककार्येषु नियोक्तव्या । तदर्थं तस्या पुत्र्यः पौत्र्यः प्रपौत्र्यश्च प्रभूतं सन्ति । यदा यदा वयमपथेषु सञ्चरेम तदा तदा सा अस्मान् तेभ्यो निवर्तयतु, सङ्कीर्णेषु जीवितप्रश्नेषु आवश्यकानुपदेशान् सा दिशतु । मानविकमूल्यानि सा अस्माकं हृदयेषु वर्धयतु । एतावदेवास्माभिः अस्मन्मातामह्याः सकाशात् प्रतीक्षितव्यम् । तदर्थं सा भक्तिपूर्वमेवास्माभिरभिगन्तव्या । प्रत्युत, तामस्माकं गृहकर्मसु नियोक्तुं न कदापि साहसं कार्यम् ।

2. देशीयैक्यदार्ढ्यार्थं संस्कृतस्य राष्ट्रभाषापदप्रतिष्ठापनं कथमपि करणीयम् । तथापि वर्तमानपाठरीतिमवलम्ब्य संस्कृताध्ययनेन तद् आकाशकुसुममेवावशिष्येत ।

---

1. Sanskrit is a language of human culture. We should not venture to draw it down to our daily use. For that purpose our regional languages are easy and enough. Sanskrit is our grand mother; the embodiment of our culture and so she is adorable to us. She should not be employed in our domestic affairs. For that, there are her own daughters, grand daughters and their daughtes also. She may give necessary advice whenever we would face complicated problems and when ever we deviate from right paths. She may simply illuminate human values and fortify them in our heart. This much is what we should expect from our grand mother. Only with this purpose we should approach her with a sentiment of veneration. We should never venture to engage her in our domestic duties.

2. Sanskrit can somehow be promoted to the status of our national language for the sake of fortification of the unity of our nation. But by continuing the present system, it will remain a mere concept ?

Kirtikant Sharma Collection, Najafgarh.

CC-0. In Public Domain. Digitization by eGangotri

3. अस्माकं गार्हिककार्यव्यवहारार्थं मातृभाषा, सार्वलौकिकव्यवहारार्थ-माङ्गलभाषा, धार्मिकमूल्याधानेन जीवितं संस्कर्तुम् संस्कृतभाषा, एवं भाषात्रयं भारतीयैरवश्यमध्येतव्यम् ।

4- वाल्मीकि व्यास भासकालिदासानां कृतिषु प्रयुक्ता भाषैव शुद्धा संस्कृतभाषा । सैवास्माभिरादर्श भाषात्वेन स्वीकरणीया ।

5. भाषायाः स्वायत्तीकरणानन्तरमेव शास्त्रशिक्षाप्रवेशः कार्यः । तस्याः स्वायत्तीकरणार्थं वर्तमानरीतेर्विभिन्ना कापि पद्धतिराविष्करणीया ।

6. पञ्चषेभ्यो दशाब्देभ्यः पूर्वं इयन्तो विविधा विषया अध्ययनाय नासन् । संस्कृतभाषा तदनुबद्धानि वैद्यज्योतिषादि शास्त्राण्येव पुरा प्रायः अध्ययनविषया अगण्यन्त । अधुना तु छात्राणां अनेके नवीना विषया अवश्यमध्ययनार्थं निर्धारिताः सन्ति । तेष्वन्यतमं नातिप्रधानं च संस्कृतम् । अतः अन्यविषयेष्विव संस्कृताध्ययनेऽपि लाघवमाधातव्यम् ।

---

3. Mother-tongue for our day to day use; English for contact with other states and countries; Sanskrit to purify our life by strengthening human values. Thus three languages are invariably to be learnt by an Indian.

4. Pure Sanskrit is the language seen in the works of **Vyaasa Vaalmeeki** and some other similar poets. We should take it as model of the language.

5. Study of **Shaastras** should be started only after getting command on language. For that a new scheme for study entirely different from the present system must be prepared and it must be introduced.

6. A few decades ago there were no such various subjects for study as we see today. Only Sanskrit and certain **Shaastras**, had to be studied. Now a student is forced to learn various subjects prescribed for study. Sanskrit is one among them. When we prepare syllabus this fact also has to be taken into account.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

7. संस्कृत शिक्षायामधुनातनशास्त्रीय सिद्धयः यथाशक्यमङ्गीकरणीयाः । शब्दलेखनी रूपलेखनी मुद्रिताः पाठा इत्यादिद्वारा लोकस्य कोणे कोणे अनायासमेव संस्कृतं प्रचारयितुं प्रयत्नः कर्तव्यः ।

8. पाठ्यपुस्तकरचनायामेवास्माभिर्विशिष्य सावधानैर्भवितव्यम् । नर्सरीगानानि एकाङ्कनाटकानि कथाः कथाकथनार्हा रचनाः सरलपद्यानि ललितगानानि पौराणिककथानामन्वाख्यानानि एवं छात्राणां वयोवासनानुरूपमायोजिताः समाहारा एव स्युः पाठपुस्तकानि ।

9. बालहृदयरोचकानि ललितगानानि, कथाः, दृश्यप्रधाना लेखा इत्यादिभिः सहितानां सचित्रबालसाहित्यग्रन्थानां प्रकाशनं चारब्धव्यम् ।

10. नूतनपाठपद्धतिमनुसृत्य संस्कृतमध्येतुकामानां सर्वेषामपि सौकर्यार्थं चातुर्मास्यशिक्षाशिबिराणि देशे देशे समायोजनीयानि ।

---

7. In Sanskrit teaching modern scientific methods should be adopted as far as possible. With the help of cassettes, television, printed lessons, movies etc. we should go forward to propagate Sanskrit in each and every corner of the world.

8. We must be careful in preparing text books. They should be some complications of nursery songs, one-act-plays, stories, Pieces for story-telling, simple poems and songs, adaptation of puranic stories etc. suited to the present generation.

9. A branch of children's books with attractive illustrations containing simple stories, songs, stageable articles, should be started.

10. Courses of four or five months' duration should be conducted in important centres according to the **gurukula** system.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

11. पोस्टल् द्वारा स्वस्वगृहेषु उषित्वा संस्कृतमध्येतुं संविधा समायोजनीया। अस्माकं भौतिकजीवितसन्धारणार्थं यदावश्यकं तत् आयुर्वेदज्योतिषादिशास्त्रेभ्यो लभ्यते। मानसिकसंस्काराधानार्थं तथा जीवितविशुद्ध्यर्थं च यदावश्यकं तत् सर्वं काव्येतिहासपुराणादिभ्यश्च सञ्जायते। व्याकरणन्यायवेदान्तादीनि शास्त्राणि बुद्धेस्तीक्ष्णतोद्दीपनार्थमेवोपयुज्यन्ते। न खलु धार्मिकमूल्यैः सह हृदयस्य सात्म्यीभावाय संवेदनाय वा। तदर्थं पुराणकाव्यनाटकादिसाहित्य समुच्चय एव प्रयोजकीभवति। अतः संस्कृतशिक्षाविषये काव्यनाटकादि साहित्यग्रन्थानां आयुर्वेदादिशास्त्रग्रन्थानां च प्रामुख्यं देयम्।

---

11. Facilities are to be made to learn Sanskrit staying at home through correspondence course.

We can get all that are necessary to pull on our material life, from **Saastras** like **Aayurveda**, **Jyotisha** and so on. And everything that can improve our cultural and spiritual values and to purify our life, is attained from **Kaavyas**, **Puraanas**, **Natakas** and the like. **Shaastras** like **Vyaakarana**, **Nyaaya**, **Vedaanta** etc. can only develop one's intellectual sharpness, not it would be one's experience or assimilation of spiritual Values. For that the works on literature like the works of **Vyaasa**, **Kaalidasa** and so on. are mostly needed. So, in Sanskrit education, importance should be given to the books on literature and **Shaastras** like **Ayurveda**.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शून्यं मे सकलं, यदस्ति भगवन्
दत्तं समस्तं त्वयै-
वाप्तं यत् प्रातिभात्मकं दिनकराद्
वृक्षात् पराराधनम् ।
वैशाल्यं जलधेर्गिरेरचलता
वायोस्सदा जगृति-
स्तत्तत् पुष्टिमवाप्नुयादनुदिनं
प्रीत्यै परेषां मयि ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

शास्त्रीयविज्ञानं बुद्धिविकासद्वारा मानवस्य भौतिकाभिवृद्धौ पर्यवस्यति। सर्गात्मकसाहित्यास्वादनं तु आत्मगुणान् विकास्य विकारान् शुद्धीकरोति। द्वयमपि मानसिकप्रक्रियैव। तथापि आद्यं चिन्तात्मकं द्वितीयं तु आस्वादनात्मकम्। विचारविकारयोरनयोः समतुलना अस्माभिः पालयितव्या। आत्मानात्मनोः विवेचकं किमपि शास्त्रमेव वेदान्तः। किन्तु क्रमशस्तत् तत्त्वांशं विहाय वाचाटोपप्रधानं संवृत्तम्। अतो विपश्चितोऽपि ततो विमुखा जाताः। अथ चान्यो हेतुः। जन्तूनां शरीरमात्मा च समप्रधानौ। एतयोरन्यतरस्य स्वयमस्तित्वं नास्ति। शरीराद्विनाभूतो जीवः परमात्मनीव जीवेन विनाभूतं गात्रं पञ्चभूतेषु च विलीयते। अतः एतयोरन्यतरस्य प्राधान्याधिक्यकल्पनं प्रकृतिविरुद्धमेव। यतः प्रभृति शास्त्रक्षोदननिरताः पण्डिताः आत्मनः प्राधान्यमधिकं शरीरस्य स्वल्पं च कल्पितुं प्रवृत्ताः ततः प्रभृत्ति वेदान्तमण्डलं सङ्कुचितं जनानामरोचकम् च सञ्जातम्।

THE GIST

Scientific knowledge results in the progress of material aspects of man through intellectual development while the knowledge in creative literary works sanctifies his emotions by awakening his spiritual qualities. Though both are mental operations, the nature of the former is intellectual and that of the latter is appreciative. We must keep up an equalibrium between these two, i.e., thoughts and emotions. **Vedaanta** is a science that discriminates spirit and matter. But in course of time it became more bombastry ignoring its real spirit. So even the intelligentia began to turn away from it. Another reason is: for a living being both the soul and the body are equally important. Both of them have no existence, when separated. Just as **Jeeva,** separated from body, absorbs in **Paramatman,** the body, parted from **Jeeva,** merges in the five elements. Hence, to give more importance to one of these two is quite contrary to the universal truth. Whence we began to give more importance to soul and less to the body the scope of **Vedaanta** became narrow and unrelishable to the common man.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेदान्तशोषः

सर्वाण्यपि शास्त्राणि मनुष्यजीवितं क्रमीकर्तुम् सुगमीकर्तुम् च समाजे समुद्भूतानि। यदा तानि जीवितात् पृथक्भावं भजन्ति, शाश्वतमूल्यानि संक्षोद्य निरङ्कुशं पुरो गच्छन्ति तदा तानि निश्चेतनानि जायन्ते। तानि मानवजीवितात् अपसृत्य केवलं प्रदर्शनवस्तुरूपं प्राप्नुवन्ति। प्रायस्तानि मानवस्याभिवृद्धेः प्रतिकूलानि च भवन्ति। इदं तु स्वाभाविकं, यद् वस्तु यथा चैतन्यहीनं सम्पद्यते तदा तत् समाजे परिहीयते। प्राकृतिकदेवताना मद्भुतप्रभावं दृष्ट्वा आश्चर्यपरतन्त्रो मानवः यान्युद्गायति स्म तान्येव खलु वेदसूक्तानि। तस्यां दशायां तेषां चैतन्यमासीत्। यदा प्रभृति तेषां भावसौन्दर्यं

Decline of Vedaanta

All **Shaastras** are derived from the commonsense of man to make his existence in society more systematic, effective and easier. When they have no connection with his life or deviate from it and advance crushing all perpetual human values, they become lifeless. Swerving away from their spirit they become mere materials of exhibitions, the residues of the past .Then they become unfavourable or quite contrary to the progress of man. It is natural that whenever a thing becomes lifeless, it would be ignored by the society. The vedic hymns are such a collecion of creative works which were sung by the pious ones who had become wonderstuck with various divine manifestations of nature like **Savita, Indra, Varuna** and so on. In that stage they had their spirit. When they were monopolised by a particular

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुणीकृत्य यज्ञांगतया विनियोक्तुमारभन्त ततः प्रभृति तेषां चैतन्यं क्षीयमाणमजायत। यावद् जीवितस्यान्तरं बाह्यं वा कमपि लाभं जनयेत् तावत् तत् शास्त्रं सजीवं सन्तिष्ठते। नो चेत् तद् सन्ध्येव अन्धकारे विलयं प्राप्नोति। वैद्यशास्त्रस्यास्ति जीवितसंबन्धः। अतः तच्छास्त्रमधुनापि प्रवर्तते प्रवर्धते च। वेदाङ्गानां शिक्षादीनां प्रायो जीवितेन न तावान् बन्धोऽस्ति, अतस्तेषां प्रचारो विलुप्तोऽभूत्। तत्तच्छास्त्रप्रवर्तकैः तत्तच्छास्त्राध्ययनं जीवितस्य परमलक्ष्यमिति यदुद्घुष्यते तत् न खलु परिगणनामर्हति। वैयाकरणः स्वशास्त्रस्य महिमानमेवमुद्घोषयति। "एकः शब्दः सम्यक् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति" इति। किन्तु शब्दसहस्रं सम्यग् ज्ञात्वा सुष्ठु प्रयुज्य च शब्दशास्त्रे लब्धप्रतिष्ठाः पुरुषाः "नेहामुत्राः" क्षीणचेतनाः सङ्कुचितात्मानश्च कृच्छ्रम् जीवन्तीत्यनुभवविदितमेतत्। प्रत्युत धातुप्रत्ययविवेचनाशक्ता अपि कति पुण्यात्मानः श्रेयसा तेजसा च

---

caste and restricted to be an item of sacrifice ignoring their emotional beauty, their vital aspect began to diminish. As long as any work stands for any gain either external or internal, it remains lively. Otherwise it will disappear in darkness like dusk. **Vaidyasaastra** has connection with human life; therefore it is still popular and prosperous. In general **Vedaangas** like **Shiksha, Vyaakaranam** etc. have no close connection with life, hence their popularity has diminished. The commendations on the respective **shaastras** by respective scholars are not worth considering. e.g. The scholars of **Vyaakarana** proclaim their glory of their **Saastra** "One word, the derivation of which is known well and which is used well, gives all desires and pleasures in this world and that world". But we see that a man who is well established in **Shabdashastra,** who knows the derivation of thousands of words well and uses them well, is seen pulling his life somehow, being narrow-minded and proud, with no spiritual stamina and having neither this world nor 'that' world. On the other hand, how many pious men, who have no idea about the roots and suffixes, are seen

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लोके समाजैरादृताः समाजस्योपकारकाश्च दृश्यन्ते। तादृशाः स्वयंपूताः समाजं पावयन्ति च। अत एतादृशानां शास्त्रनिष्णातानां प्रवचनानि न खलु प्रमाणानि। किन्तु केवलमर्थवादा एव।

वयमद्य वैदिककाले न जीवामः। पुरातनकालीन जीवितप्रश्नाः नैव सन्त्यस्माकमद्यतने काले। चातुर्वर्ण्यव्यवस्थामधिकृत्य प्रौढाः बाढं प्रभाषणं कुर्वन्ति लिखन्ति च। तथापि भारतेऽस्मिन् द्विसप्ततिकोटिषु वैदिककालीनाव्यवस्था अविलुप्तमाचरन् कः पुरुषोऽस्तीत्यस्माभिरत्र पृच्छ्यते। अस्तीत्युत्तरति चेत् तत् न कदापि सत्यं भवति। कुतश्चेत्, तादृशंवर्तनमद्य न शक्यम्। भक्षण शिक्षा विचार विकार कुटुंबबन्धादयः सर्वेऽपि परिवर्तिताः। प्राचीनतापुनरुद्धारणमिति सङ्कल्प्य कति कति निर्जीवाः कर्मप्रकाराः अस्माभिरद्य वितन्यन्ते। यागः तादृशेष्वन्यतमः योऽद्य प्रदर्शनार्थः परिणतः। तस्य कर्मकलापा अद्य निर्जीवाः परिणताः। याज्ञिकेषु नवतिः प्रतिशतं मन्त्रतन्त्रेषु निलीनं निगूढार्थं न जानते। बाह्याभ्यन्तरशुद्धेः कणिकापि

---

assets for the society, respectable to others and enjoying glory and happiness in this world. Such great persons sanctify the society. Therefore the remarks made by scholars on their **Shaastras** cannot be taken as authoritative. They are mere eulogistic expressions.

We are not living in vedic period. Today we have various problems different from that we had in early days. We fervently speak and write on the systems of **chaaturvarnya**. But let us ask, is there anyone among seventy two crores in India who observes the whole systems of vedic period without any omission? If you answer positively "there is" it will never be a truth. Because such a life is quite impossible today. Everything like food, habit, education, family relations, emotions, thoughts etc. have, to a large extent, changed now. In the name of renovation of ancient culture how many activities are we doing now! The performance of **Yajna** is one among them which has become a thing for more exhibition. Activities related to it are seen lifeless. 90% of the priests are ignorant of the meaning implied in **Mantras**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत्र नास्ति । केवलं शब्दायमानता चेष्टमानता चावशिष्टा । पौराणिकताया अस्थिकूटं नास्माभिः स्वीकरणीयं, प्रदर्शनीयं च । किन्तु तस्याः चैतन्यमेव । पापपङ्किलैरस्माकं करैः यदि तद् गृह्यते तर्हि तदपि पङ्किलं स्यात् । प्रथमतोऽस्माभिरस्मत्करा: शुद्धीकरणीयाः । तत एव तच्चैतन्यं स्प्रष्टव्यम् । तदेव वरम् ।

अद्य तु संस्कृतमहापाठशालासु साहित्यं वेदान्तः न्यायः व्याकरणं मीमांसा इत्येतद्विषयाणामेव कक्ष्याः प्रचलन्ति । एतेषु कानि कानि शास्त्राणि जीवितेन सह संबद्धानि इत्येतदत्र पर्यालोचनीयमस्ति । ततः प्रागेव एकैकस्याप्यस्य शास्त्रस्य मूलतत्त्वमधिकृत्य विवरणमावश्यकमिति प्रतिभाति । अद्य यथा सर्वकलाशालासु विविधा विषयाः अध्ययनार्थं प्रकल्पिताः तथैव पुरातने काले भारतीयविद्याकेन्द्रेषु चतुर्दश विद्याः पाठ्यविषया आसन् । ते तु,

---

and **Tantras**. They do not maintain even a bit of internal and external purity that ought to have. Only spiritless words and gestures are left in rituals. We should not accept and exhibit mere skeleton of ancient culture, but mainly the spirit. If we touch it with our sinful hands, it also will be impure. First we should purify our hands. Then we can take them. That is desirable.

At present in Sanskrit **Paathasalas,** in the country the courses mainly for Sahitya, Vedaanta, Nyaaya, Vyaakarana and Meemamsa are running. Here it is to be considered which **shaastras** among them are connected with our life. Before that, an explanation regarding the fundamentals of each of the **Shaastras** seems to be necessary here. Today we see various subjects prescribed for study in universities. Likewise fourteen subjects were prescribed for study in educational centres in ancient India. They were scheduled as:- six subsidiaries of Vedas i.e., **Shiksha,**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अङ्गानि वेदाश्चत्वारो
मीमांसा न्यायविस्तरः ।
पुराणं धर्मशास्त्रं च
विद्या ह्येताश्चतुर्दश ॥

इति परिगण्यन्ते । तथाहि शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं कल्पः इत्येतानि षड् वेदाङ्गानि । ऋक् यजुः साम अथर्वा इति चत्वारो वेदाः मीमांसा न्यायः पुराणं धर्मशास्त्रं चेत्येते आहत्य चतुर्दश । एतानतिरिच्य उपवेदाश्च चत्वारः सन्ति । ते तु आयुर्वेदः धनुर्वेदः गान्धर्ववेदः स्थापत्य-वेदश्च । चतुर्दशविद्यानां उपवेदानां च भेदः केवलमधिकारिभेदादेव रूढमूलः सञ्जातः । चतुर्दशविद्यानामधिकारिणो ब्राह्मणाः उपवेदानामधिकारिणः प्रायः तदितराश्च । आद्याः बुद्धिप्रधानाः अन्ये चत्वारः शरीरप्रधाना इत्येतदपि चतुर्दशविद्यानां उपवेदानां च पृथक्त्वे हेतुः स्यात् ।

अथ एतेषु के के समाजस्य सामान्यत उपयुक्ता आसन् । सामान्य जन-जीवितेन सह अविच्छबन्धः केषामासीत् । के के सामान्यजनाद् विदूरं गताः इत्यादीनधिकृत्याप्यत्र विचारणीयमास्ते ।

Vyaakarana, **chandas**, **Nirukta**, **Jyotisha** and **Kalpa** and four **Vedas Rig**, **Yajus**, **Saama** and **Atharva** and also **Meemamsa**, **Nyaaya**, **Puraana** and **Dharmashastra**. There are fourteen **Vidyaas** in total. Besides these there are four **upavedas** i.e., **Aayurveda** **Dhanurveda**, **Gaandharvaveda** and **Sthaapatyaveda**. The difference between fourteen **Vidyaas** and four **upavedas** was based one their masters. The masters of fourteen **Vidyaas** were **Brahmanas** and those of four upavedas were also non-**Brahmanas**. The **upa-vedas**, perhaps, were differentiated from the fourteen **Vidaas** on the basis of that the former are mainly intellectual while the latter is more or less physical.

Now we have to discuss some other aspects related to the matter i.e., among them which are useful for the life of common people; which are invariably connected with their life which have less connection with life.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेदाभ्यासः ब्राह्मणैरेव करणीयः। वेदमन्त्रास्तु यागादिकर्मस्वेव विनियोक्तव्याश्च इत्यतः तेषां परिधिः क्रमशः सङ्कोचमवाप। किञ्च अर्थावबोधं विना उच्चारणमात्रे निष्कर्षाधिक्यं प्रकल्पितमित्यतः वेदाभ्यासः प्रायो विरसः सञ्जातः। एवं वेदाः वेदाङ्गानि च अतिन्यूनसंख्यस्य कस्यचिद् जनवर्गस्य एकाधिकारे यन्त्रिताः। अतस्ते साधारणजनेभ्यो बहुदूरमपसृताः। ब्राह्मणेऽपि अत्यल्पसंख्या एव वेदाधिकारिण आसन्। वेदविद्यास्वद्वितीयः लोकैकसमाराध्यः श्रीशङ्करो ब्राह्मणोऽपि जन्मना वेदाधिकारी नासीदिति प्रसिद्धमेव। यज्ञकर्मोपयुक्ताः ऋग्यजुस्सामवेदमन्त्राः तदधिकारिभिर्ब्राह्मणैरेव अर्थावबोधं विनापि कण्ठस्थीकृताः। अतस्ते मन्त्राः तेषामेव जिह्वासु विलयं प्रापुः।

वेदास्तु ऋग्वेदादयश्चत्वार एवेति प्रसिद्धं खलु। तेषु ऋग्वेदः जन्तुसाकल्यजीवसन्धारणापत्यावश्यकानां मनुष्यनियन्त्रणादतीतानां प्रकृतिशक्तीनां सङ्कल्परूपान् इन्द्रवायुवरुणादीन् अधिकृत्य छन्दोनिबद्धानां स्तुतीनां समाहारः

The restriction that **vedas** should be chanted only by **Brahmanas** and practised only on the occasions of spiritual performances, made their scope too narrow and limited. Another reason is that the study of **vedas** was insisted on mainly chanting not on comprehension of their meaning. Hence it became gradually monotonous. In this manner **vedaas** and **vedaangas** came under the control of monopoly of a small minority of the society. They turned back from the common man in course of time. Even among Brahmanas there were only a few who had the right to learn **vedas**. It is well known that even Sri Sankara, the incompetable personality in **vedic** literature, was born in a lineage of **Brahmanas** which had no right to learn **vedas**. **Rig**, **Yajus** and **Saama** were got by-heart by **Brahmanas**, of higher lineage without understanding their meaning. So the Mantras got absorbed in their tongues themselves.

Here we have to be familiar with the nature of the contents of four **vedas**. The **Rigveda** in general is a collection of hymns of praise to the gods like **Indra, Varuna, Vaayu,** etc. the conce-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खलु। यजुर्वेदस्तु कर्मविधिपरः गद्यभूयिष्ठ इति विशेषः। सामवेदस्तु सुखगेयानां केषांचन ऋग्वेदमन्त्राणां समाहार एव। ते एव मन्त्राः गानात्मकतया आविष्क्रियन्त इत्यतः सोयं ऋग्भिन्नो वेदः परिगण्यते स्म। किन्तु अथर्ववेदस्यास्ति विलक्षणता। तत्र आभिचारमन्त्राणामिव औषधप्रयोगाणामपि प्राधान्यं दत्तमिति हेतोः सामान्यजनस्यावश्यक आयुर्वेदः ततः प्रादुरभूत्। त्रयी तु स्वर्गादिसाधिकेत्युद्घुष्यन्तीनां यज्ञशालानामन्तः सङ्कुचिताऽभूत्।

इयमेव वेदाङ्गेषु भूयसामपि कथा। तत्र शिक्षा नाम वेदमन्त्राक्षराणां उच्चारणरीतेः शिक्षणमेव। सा तु प्रतिशाखं भिन्ना च। मन्त्रोच्चारणे सम्पद्यमाना उदात्तानुदात्तस्वरितादिभेदाः आचार्यमुखादेव साक्षात् शिक्षणीया इत्यतः शिक्षाशास्त्रं क्रमशो लुप्तप्रचारमभूत्। व्याकरणं नाम शब्द प्रक्रियारूपम्। तस्य शास्त्रस्य समग्रता तु पाणिनेरष्टाध्याय्यामेवो-

---

ptive figures of manifestation of nature, untameable by human beings. Yajurvede contains mainly the manner and means of the sacrificial performance. The former contains prose and the latter, verses in main. The contents of **Saamaveda** are, to a large extent, the same hymns selected from Rigveda which can be sung rhythmically as an attractive performance in **Yajnasalas**. **Atharvaveda** has some peculiarities. In the **Veda** importance is given for both spell and medicines. **Aayurveda** has derived from **Atharva** which advanced to be useful for the common man. **Rig Yajus** and **Saama** came to be confined to the **Yajnashaalas** which were proclaimed to be the only path to the heaven.

The same is the case with most of **Vedaangas** also. Among them **shiksha** contains the laws of euphony, the rules of practising proper pronunciation of letters of Vedic Mantras. It was different in each school of vedic masters. In course of time **shikshaashaastra** lost its prevalence because the minute changes in pronunciation like **udaatta, Anudaatta, Swarita** etc. being practised in chanting of **Mantras**, had to be learnt from the masters directly. The contents of **Vyaakarana** are etymology, the deriuation of words based on their meaning. We can see the fullness of the

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पलभ्यते । छन्दश्शास्त्रं प्राक्तने काले केवलं वैदिकछन्दसां मानशास्त्रमासीत् । कालान्तरे तु विविधरूपाणां लौकिक छन्दसां आविर्भावात् लौकिकसाहित्य मण्डलमपि तस्य विहाररंगोऽभूत् । निरुक्तं तु वेदे प्रयुक्तानां पदप्रकृतीनां निर्वचनमेव । ज्योतिषं तु अन्तरिक्षचारिणां तेजसां भूमौ लब्धजन्मनां प्राणिनां च परस्पर बन्धः, तमनुसृत्य शुभाशुभनिर्णयश्च वितन्यते । कल्पस्तु यज्ञानुबद्धतन्त्राणां अथवा क्रियाक्रमाणां विवरणमेव । मन्यते, मननं क्रियते अनेनेति मन्त्रः । तन्यते अवयवैः विस्तीर्यते इति तन्त्रश्च । तथा च मन्त्रो मानसिकः तन्त्रः कायिक इति भेदः । एतानि खलु वेदाङ्गानि ।

अथ मीमांसा न्यायः पुराणं धर्मशास्त्रमिति चत्वारि विवरणमर्हन्ति । तेषु मीमांसाविषयस्तु वेदमन्त्राणां अर्थविचार एव । न्यायस्तु तर्कशास्त्रमित्यपरनाम्ना प्रसिद्धः । वेदप्रामाण्यमङ्गीकृत्यैव भौतिकाभौतिक

Shaastra in **Ashtaadhyaayi** of Paanini **Chhandas shaastra** is metrical science and it had developed to distinguish Vedic Mantras from each other by measuring letters and their metres in stanzas. Gradually it extended its scope to the realm of **loukic chhandas** also. **Nirukta** is the definition of the words used in Vedas. **Jyotisha** deals with the relation between the human beings born on the earth and the planets moving in the sky and gives suggestions about fortune and misfortune based on their relation. **Kalpa** is the treatise teaching mystical formularies with bodily performances for the worship of deities. The word **Mantra** is derived from the root **'Man'** meaning to think. Likewise the word **Tantra** is derived from the root **'Tan'** meaning to do. So **Mantra** means the mental act i.e. contemplation and **Tantra** is the bodily ritual formularies. This is the difference. These are the six **Vedangas**.

Now an explanation about the nature of **Meemaamsa, Nyaaya, Puraana** and **Dharmashaastra** is necessary here. Among them **Meemaamsa** is the discussions and settlement of the meaning of vedic **Mantras; Nyaya,** known as **tarkasaastra,** contains the

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदार्थानधिकृत्य चर्चा पूर्वपक्ष सिद्धान्तादय एव तत्र प्रतिपाद्यो विषयः। पुराणं तु वैदिकसङ्कल्पानवलम्ब्य तदुपबृंहणार्थं आयोजितानां कथानां तथा कमप्यवतारपुरुषमवलम्ब्य धार्मिक मूल्यानां व्याख्यानरूपमाख्यानमेव। अस्मिन् विभागे इतिहासोऽप्यन्तर्भवति । धर्मशास्त्रं तु मनुस्मृत्यादयो स्मृतिग्रन्थाः खलु। तेषु चातुर्वर्ण्याश्रमव्यवस्थामवलम्ब्य कर्तव्याकर्तव्ये विधीयेते ।

अतः परं आयुर्वेदः धनुर्वेदः गान्धर्ववेदः स्थापत्यवेदः इति चत्वार उपवेदाश्च सन्ति। अत्र तु काव्यनाटकादि सर्गात्मकरचनाः चतुर्दशविद्यासु उपवेदेषु वा न परिगणिता दृश्यन्ते । अतः वाल्मीकेः प्राक्तनीयं व्यवस्थेत्यनुमातुं शक्यते। अथवा प्रतिभाप्रसूतिभ्यः सर्गात्मकरचनाभ्योऽप्यधिकं बुद्धिव्यायामपराणां शास्त्राणां परमप्राधान्यं प्राक्तने काले प्रकल्पितमासीदित्यनुमातुं शक्यते ।

---

objecting arguments and establishment of the reality of the things including both material and non-material taking Vedas as the authority. **Puranas** contain the stories, the elaborate forms of some concepts interpreting the inner meanings of the Vedic Mantras or interpretation of spiritual values based on incarnation of God. Itihaasa also can be included in this section. **Dharma-Shaastra** means the works like **Manusmriti**. They describe the duties of man on the basis of **Chaaturvarnya**.

Besides this four **Upavedas** also were in prevalence. They were **Aayurveda, Dhanurveda** (The science of archery), **Gaandharva veda** (Music) and **Sthaapatya veda** (Sculpture). Here it is to be particularly noted that creative works like **Kaavya, Naataka** etc: were nof considered as **Vedyas** or **Upavedas**. So we can infer that this system had been established before the age of **Valmeeki** and that in those days the intellectual faculties were counted more important than the creative power.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उपवेदेष्वतिप्राधान्यमर्हत्यायुर्वेदः। अथर्ववेदाल्लब्धजनिरायुर्वेदः आरोग्यरक्षार्थम् साधारणजनानामप्यावश्यकमित्यतः तस्य शास्त्रस्य उपज्ञातारः परिष्कर्तारः आचार्याः प्रचारकाः ग्रन्थाश्च क्रमशः अवर्धन्त। उन्नतस्मन्यैरनेकैरवगणितोऽप्यथर्ववेदः अस्मिन् विषये अन्यवेदेभ्योऽपि जनानामधिकमुपकारकोऽभूत्। केवलप्रलोभनात्मकात् सङ्कल्पकल्पितात् स्वर्गसुखादपि इहलोके जीवितुमावश्यकमारोग्यमेव साधारणजनानामभिलषणीयमावश्यकं च। ततः तच्छास्त्रमधुनाप्युत्तरोत्तरमभिवृद्धिमयते।

धनुर्वेदः जनानां मध्ये अतीव प्रचारमाप्नुवन् अवर्ततेति पुराणेतिहासेभ्यो वयमनुमिनुमः। राजशासनकाले युद्धं साधारणमासीदित्यतः आयुर्वेदादप्यधिकं तस्मिन् काले स वेदः प्रचारमविन्दत। धनुर्वेदे विविधा गवेषणा अद्भुता बह्वा आविष्काराश्चासन्। आग्नेय वायव्य वारुणादीन्यस्त्राणि न कदापि केवल सङ्कल्प कल्पितानि स्युः। धनुर्वेदः तावद्विकाससमाप्तं किमपि शास्त्रमभूदित्येतदेव तत् सर्वं प्रख्यापयति। एवंविधस्याद्भुतप्रयोगबहुलस्य

Among these **upavedas** the most important was **Aayurveda.** Having sprouted from **Atharvaveda** it flourished with its literature, propagators, teachers, revivers and patrons. The **Atharva veda,** which was ignored by the people of highest level in the society became more useful than the others in this aspect. The ordinary people require the health essential for living in this world than the imaginary heavenly pleasures. Therefore Ayurveda continues to be more and more prosperous even today.

We can infer from **Puraanas** and **Itihaasas** that the **Dhanurveda** was very popular among the public than the **Aayurveda,** because during the period of Kings' rule, war was a common affair. Researches of various kinds and wonderful inventions took place in Dhanurveda. weapons like **Aagneya, Vaayavya, Vaaruna** etc. would never be mere imaginary concepts. All these proclaims the **Dhanurveda** was a science which was well-developed in those days. Because of practical difficulties to master such a **vidya** which had various miraculous usages and because of ease

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धनुर्वेदस्य स्वायत्तीकरणं कृच्छ्रसाध्यमिति हेतोः अनन्तर काले परिष्कृतयुद्ध सामग्रीणां अनायासेन सौलभ्याच्च धनुर्वेदस्य प्रचारः क्रमेण क्षीयते स्म।

उपवेदेष्वन्यतमः खलु गान्धर्वः। तदेव संगीतशास्त्रम्। सामान्य जनान् हठादाक्रष्टुम् तथा मनोविकारान् विशुद्धीकर्तुम् मनः परमानन्दे विलाययितुं शक्तमित्यतः संगीतशास्त्रस्य परिधिः वैपुल्यमवाप। तदद्यापि शाखोपशाखबहुलं अधिकाधिकं विकासमाप्नोति। अयमेवात्र हेतुः। मानवमनः अनेकेषां भावानामिव तालमेललयानामप्याकरः खलु। तत् त्रितयमुद्दीपयितुं नाद एव प्रभवति। मनस्यन्तर्लीनान् हर्षादिभावान् साहित्यरचना यथा जागरयति तथैव मात्रालापादिसम्मिश्रो नादः तालमेल लयानप्युद्दीपयति। तत् सर्वं मानवं कालध्यलौकिकानुभूतिं नयति। इयमनुभूतिः सामान्यजनानामपि

---

in usages of modern weapons the popularity of **Dhanurveda** ceased to exist in India.

The other among the **upvedas** is **Gaandharva Veda** i.e. the art of music. The scope of music became wider and wider, because it could attract the mind of ordinary people easily and absorb them in the supreme delight by purifying their emotions. Therefore even now it is flourishing more and more with many branches of its style. Why is it so? You know the human mind is a storage of **Taala, Mela** and **Laya** like that of many other things. Only the voice is capable of kindling these three factors. Just as the creative literary works kindle the emotions like delight, sorrow etc., implied in the heart of man, the voice accompanied by **Maatra** and **Aalapana** awakens the sense of **Taala, Mela** and **Laya**. All this leads a man to a divine experience. Since this experience can be easily had by

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आवश्यकतया सुलभतया च गान्धर्ववेदः सनातनं सर्वव्यापकं च प्रचार समविन्दत, विन्दते च ।

स्थापत्याभिधे उपवेदे शिल्पकला चित्रकला नाट्यकला च अन्तर्भवन्ति । ताः साधारणजनाकर्षकत्वात् कालदेशसाधारणं परिष्कारमवलम्ब्य उत्तरोत्तरमभिवृद्धिमाप्नुवन्ति ।

उपर्युक्तेषु पूर्विकैः परिकल्पितेषु शिक्षाविषयेषु के के अधुना प्रचरन्ति के के विलुप्तप्रचाराः परिणताः अथ च तैरनुक्ताः कति कति विषया अद्याध्येतुमधिकृतैः परिकल्पिता इत्येतदधिकृत्यापि अत्र किमपि वक्तव्यमास्ते ।

पूर्वनिर्दिष्टेषु विषयेषु वेदोपवेदान्तर्गतेष्वन्यतमानां व्याकरणन्याय ज्योतिषायुर्वेदानां पृथक्तया पठनप्रणाली अधुनापि वर्तते । छन्दः शिरुक्तं

---

an ordinary man the Gandharva veda got perpetual and universal popularity. It continues to be prosperous even today.

Sthaapatyaveda is known as fine arts. it contains sculpture, picturing and acting, Since it attracts the ordinary people, it is progressing even now with some necessary modifications according to regional and periodical interest.

Here we have to consider which among the subjects of study suggested by our ancient teachers as mentioned above, are still prevailing and which are not prevailing and how many subjects are prescribed in this modern age that were not suggested by the masters of ancient period.

The syllabus of the modern universities contains the subjects like Aayurveda, jyotisha Nyaaya and Vyaakarana as main which the fourteen **Vedas** and **Upavedas** contained. **Chhandas,**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मीमांसा पुराणं धर्मशास्त्रं च अन्येषां पाठपद्धतीनामङ्गतया निर्धारितानि दृश्यन्ते। अलङ्कारशास्त्रं वेदान्तश्च प्राचीनैर्न निर्दिष्टौ। तद्द्वयमधुना शिक्षायां मुख्यविषयतया अङ्गीकृतम्।

साहित्याचार्यपरीक्षायाः मुख्य विषयस्त्वलङ्कारशास्त्रम्। काव्यनाटकादीनामास्वादनमध्ययनं वा तत्र न प्रधानं। उद्ग्रथनात्मकस्य काव्यस्यापग्रथनमेवालङ्कारशास्त्रस्य प्रतिपाद्यम्। तत् तावन्मात्रमेवावश्यकम्। कालान्तरे ते नैयायिकसहोदरा भूत्वा खण्डन मण्डन भूषण दूषणादिनिरताः जाताः। काव्यतत्त्वसमर्थनं तु वैयक्तिकं परिणतम्। काव्यास्वादनार्थमन्या शक्तिरेवावश्यकी। एतेषां खण्डनमण्डनविलुण्ठनेन जन्मसिद्धं सहृदयत्वमपि कृत्रिमरूपमापद्यते।

Nirukta, **Meemaamsa**, **puraana** and **Dharmashaastra** are prescribed as subsidiaries of some other courses. **kaavya**, **Alankara** and Vedaanta were not prescribed in the old school. But these three are taken as main in modern syllabus.

Alankaarashaastra (Rhetoric) is the main subject prescribed for **saahityaachaarya** course. In that course it is not important to study or appreciate kaavys, Naatakas etc. The contents of **Alankaara saastra** are analysis of creative literary works which are synthetical by nature. Such a process is essential to appreciate the literary works, but it must be only to that extent. In course of time, the rhetoricians, being fascinated by the style of **Naiyaayikas**, became mad after the argumentative skill ignoring the spirit. Instead of establishing the vital aspect of the work, they became very particular to criticise everything with subjective outlook. It is a fact that apart from all these things 'something' is most essential for appreciation of the creative works. By merely learning such criticism one's inborn faculties become artificial.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इयमेव दशा वेदान्तस्यापि दृश्यते। शास्त्रेषु मीमांसैव मुख्यम्। सा तु पूर्व-मीमांसा उत्तरमीमांसेति द्वेधा विभज्यते। तत्र पूर्वमीमांसया सर्वथासंबद्धाः ब्राह्मण यज्ञादयः। तथैव उत्तरमीमांसया संबद्धा आरण्यकोपनिषद् वेदान्ताश्च। तथाहि मीमांसाशास्त्रं शाखाद्वयेन विभक्तम्। तत्र आद्या पूर्वमीमांसा यज्ञादिकर्मफल विचारमण्डले विकासमियाय। सा वसिष्ठादिषु याज्ञिकेषु यागशालासु च परिमिता आसीत्। उत्तरमीमांसा तु आत्मानात्मविवेचनात्मके विचारमण्डले प्रवर्तमानेषु याज्ञवल्क्यादिषु यतिवर्येषु आश्रमेषु च सीमिता जाता।

आत्मबोधनं खलु वेदान्तस्य लक्ष्यम्। तद् बोधनं यथा यथा सरलं सरसं कृत्रिमताया वाचाटोपाच्च निर्मुक्तं भवेत् तथा तथा तद् जनानां मनः अक्लिष्टं प्रविशति। तदेव मनः पक्वं पवित्रं च तनुते। यथा महाभारतादि ग्रन्थेषु तत्र तत्र प्रस्तुतानि आत्मीयतत्त्वानि मनुष्यस्य धार्मिकमूल्यमुद्दी पयन्ति न तथा उपनिषदो ब्रह्मसूत्राणि वा इत्येतदनुभवसिद्धमेव। उपनि-

---

The same is the case with **Vedaanta** also. Among **shaastras, Meemaamsa** stands first. it is divided in to **poorva meemaamsa** and **uttara meemaamsa**. The works like **Brahmanas, Yajna** etc. are related to **poorvameemaamsa**. Likewise **Aaranyakas, Upanishads, Brahmasootra** etc. are pertaining to **uttara meemaamsa** which is known as **vedaanta** today. In other words **Meemaamsa** developed into two branches. The aim of **poorvameemaamsa** is performing Yajna and the similar rituals and it has confined itself to the **Yajnashalaas** and the priests like **Vasishtha** and the others. **Uttarameemaamsa** confined to the hermitages and hermits investigating the existence and non-existence of supreme spirit.

The aim of Vedaanta is the identification of soul. The more the method of identification is simple and free from bombastic style and artificiality in expression, the more it easily will enter into the heart of people. Mind becomes pure and perfect with such a realisation. We see the human values awakened by the spiritual virtues discussed in various contexts in epics like **Mahaabhaarata**. We do not feel such an emotional experience when we go through the **Upanishads** or **Brahmasootras**. The works

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

षदादयो ग्रन्थाः तानवलम्ब्य प्रपञ्चिताः भाष्यादयश्च आध्यात्मिककार्यमेव परामृशन्ति । नतु जीवितसाकल्यम् । ते अस्माकं बुद्धिं विकासयन्तीति सत्यमेव । किन्तु ते न कदापि स्वानुभूतयो भूत्वा अस्मन्मनसि विलीयन्ते । पुराणकाव्यनाटकादिषु चित्रीकृतानां पात्राणां लौकिकालौकिकसमाश्लिष्टमाख्यानं न केवलमाध्यात्मिकं कार्यं किन्तु लौकिकालौकिक बन्धसाकल्यं स्पृशति परामृशति च । अतस्तद् जनानां हृदयमाकर्षति उन्नमयति च । तत्त्वज्ञानं तु खण्डनमण्डनादि वाक्कोलाहलादपि सरलतया सरसतया च धार्मिक कथा पात्राणां सात्मीकरणेन सिध्यति । अन्तःसत्त्वं विना यत्र वाचाटोवः तत्र तात्त्विकता न स्यात् । तत्त्वभ्रंशे सति न कोऽपि तत् श्रद्धास्यति । अयमेव हेतुर्वेदान्तशोषस्य ।

---

like **Upanishads** and their interpretations deal with only the philosophical facts, not the whole life. It is true that they widen the scope of our knowledge, but never they absorb in our mind as an experience. The narrations on material and non-material life of characters pictured in **kaavyas**, **Naatakas** and **epics** touch and inspire not only mere spiritual aspect but whole of our life. Therefore such narration attracts and elevates the human mind more effectively. The realisation of the truth can be had more easily and interestingly by assimilation of emotions of spiritual characters than heated arguments. There will be no truth or spirit where the bombastic expression dominates them. That which lacks spirit will be ignored by all. That is why Vedanta diminished.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

धार्मिकाभ्युदयार्थम् यदावश्यकं तत् सर्वमप्यस्माकं प्रणष्टम् । वैदेशिकानामाक्रमणानि अस्मानेतां दशामनयत् । प्रायो माहम्मदशासकानां इदं राज्यमापोषयितुमावश्यकं विशालवीक्षणं नासीत् । आङ्गलशासकास्तु स्वार्थिनोऽपि, चूषणस्य उपोत्पन्नरूपतया भारतस्याभिवृद्धये तैर्बहु प्रदत्तम् । वयमस्मानेव विक्रीतवन्तः । मूढा वयं तेषां दास्ये अभिमानिनो जाताः । अमूल्येनास्माकं जीवितेन व्यापारं कर्तुम् वयं प्रवृत्ताः । दास्यभावं विहाय अर्पणबुद्धया कर्माणि कर्तुम् किं न शक्यम् ? नियतमेव तच्छक्यम् । तदर्थमस्माभिरन्तः प्रबुद्धैर्भवितव्यम् । इदं तथ्यमभिज्ञातुमयमेव समयः ।

THE GIST

We have lost every thing essential for our spiritual progress. Foreign invasions dragged us towards this stage. Mohammadan rulers, in general, had no wide vision for the development of the country. Though the English rulers were selfish. they had contributed much more for us as the negative gain of their exploitation. We sold ourselves to them for a few coins. We, the fools, became proud of being their slaves. We were running business with our valuable lives. Is it not possible to do every deed with a sentiment of dedication, instead, that of mere servitude? Definitely it is possible. For that we should refined internally. Now it is the time to realie the fact.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

किमयं अस्माकमुत्कर्षः ?

अद्यतनो मानवः स्वप्रतिच्छायातोऽप्यधिकं विकसितुमशक्तः सञ्जातः। यथा यथा अह उदीयते तथा तथा प्रतिच्छाया सङ्कुचति । तथैव यावद्
मानव उन्नतिमाप्नोति तावत् स क्षुद्रः परिणमति। कुत एतत् ? नान्यत् कारणमस्ति। वर्षशतकेभ्यः प्रभृति भारतं स्वीयसंस्कारात् प्रभ्रष्टं वर्तते। अधुना तु भारतं रिक्तशुक्तिरिव शून्यं सञ्जातम् । प्रायः पञ्चवर्षशतकपरिमितं वैदेशिकशासनं एतद्राष्ट्रमेतादृशीं दशामनयत् । तथाहि वर्षशतकत्रयपर्यन्तं मुगलानां शासनं वर्षशतकद्वय परिमितं आङ्ग्लसाम्राज्यशासनं च। तदिदं द्वयं भारतस्य महत्त्वक्षये हेतुरासीत्।

Is it our progress ?

Modern man could not grow more than his shadow. The more the day advances the more shadow shrinks. Similarly, the more the man progresses the more he becomes narrow. Why? The reason is nothing else. India has lost its own soul and culture since centuries. Now India is left an empty shell. The reign of foreign powers for a period of nearly five centuries threw this country into such a miserable condition. i. e. about three hundred years of Mughal reign and two hundred years of ruling by the British Empire. this has caused the deterioration of the significance of our country.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अद्य तु वयं मरुप्रदेशे जललिप्सया भ्राम्यामः । शून्यतायां जीवामः । दुर्बलतां श्वसिमः । अन्धकारे अन्विष्यामः । यदस्माकं जीविते अपरिहार्यं तद् प्रणष्टम् ।

नादिरशाह, मोहम्मदगोरी, तुग्लक आदीनां केवलोपप्लविनां अवस्कन्दसंबद्धाः तिक्तानुभवाः अस्माकं हृदये अधुनापि जाग्रति । किन्तु ते राष्ट्रस्यास्य शासका नाभूवन् । भारते विद्यमानानां अमूल्यवस्तूनां वनितानां चापहरणे एव ते श्रद्धालव आसन् । ते अद्यापि अस्माकं स्मृतिमण्डले दुःस्वप्नायमाना वर्तन्ते । तदनु मुगलवंश्याः अस्माकं राष्ट्रम् शासितुमारभन्त । अस्मन्मातृभूमिं वन्ध्यीकर्तुमेव तेषां शासनं प्रभवति स्म । सत्यमेव यद्, महात्मा अक्बर अस्याः परम्पराया अपवाद आसीत् किल । माहम्मद संस्काराधिपत्यद्वारैवास्तु नाम, यथाकथञ्चिद् भारतमिमं समृद्धं कर्तुम् तस्य संकल्पा जाग्रतोऽवर्तन्त । किन्तु तस्यानन्तरपरम्परा तमनुसर्तुम् न प्राभवन् । मुगलशासनेन किमस्माकं तत्त्वत उपलब्धम् ? "विश्वविस्मयेषु अन्यतमं ताजमहल" इति कदाचिदुत्तरं लभ्येत । किन्तु तन्निर्मा-

---

To day we wander in search of water in desert. We live on "nothingness". We breathe weakness. We grope in darkness. We have lost what we ought to have.

We had bitter experience of invasions of some cruel looters like Nadirshah, Mohammad Ghory, Tughlak and so on. But they were not the rulers of the country. They were desirous to loot only invaluable treasures and women of India. They lie in our memory as dreadful dreams even today. After their period Mughal lineage began to rule over the country. It was a government which had sterilised our mother land. Of course, Akbar, the great, was an exception of the lineage whose concepts were to make the country prosperous though under the domination of Islamic culture. But his successors could not follow him. After all what did we achieve by the reign of Mugals in total? You may answer "A Tajmahal, one of the great wonders of the would". But who

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

णस्य नेपथ्ये संवृत्ता दयनीयाः कथाः कः शृणुयात् ? स्वकलत्रस्य मरणानन्तरं तस्याः स्मारकमारचयितुं स सम्राट स्वप्रजानां धिषणाशक्ति वित्तं ओजश्च चिराय चूषितवान् । तत् स्मारकसौधं न खलु अनुत्तमाभिः मणिशिलाभिरारचितं, किन्तु तत्साम्राज्ये निवसतां पौराणां सहस्रसंख्यानां कलत्राणां च बाष्पकणिकामौक्तिकैरेव । एतावान् प्रयत्नः धिषणाशक्तिश्च सम्पन्न राष्ट्रेऽस्मिन् कतीनांचन उत्पादनपद्धतीनां साधनार्थं यद्युपायोक्ष्यन्त तर्हि अस्य राज्यस्य अभिवृद्धयर्थं तद् नियतमेव प्राभविष्यत् । किन्तु ते न तादृशं किमपि कर्तुमुद्युक्ता अभवन् । तस्य सुन्दरस्मारकस्य रूपरेखामारचयितुः कलाकारस्य हस्तं कृत्तवान स सम्राट् आग्राकिलायाः प्रकोष्ठे आसीनः तत् स्मारकमभीक्षमाणः स्वप्रियामनुस्मृत्य विलपन्नासीत किल । कथमेतादृशे क्रूरपुरुषे वयमनुकम्पिनो भवेम? कथं तानाद्रियेमहि ये नामैवं स्वात्मसन्तृप्त्यर्थं उल्लासार्थं च स्वप्रजाः तत्त्वतः किङ्करानकुर्वन् अपीडयन् च? न केवलं ते भारतस्य संस्कारमुन्मूलितवन्तः किन्तु ते बहूनि क्रूराणि कर्माण्यपि रचितानि । तानि तु चिराय अस्माकमितिहासेषु प्रतिबिम्बितानि च दृश्यन्ते ।

---

would care for the miserable stories behind it. To erect a monument of his wife after her demise, the king exploited the energy wealth and talent of his subjects for a long period. The momument was built not by the precious marbles but by the pearls of tear-drops of thousands of men and women in the empire. If the effort, talent and wealth had been untilised for the development of the nation by implementing some projects for human welfare, the country would have been benefited better. But they did not come forward to do such things. The merciless emperor who cut off the hand of the designer of the beautiful monument was lamenting on his beloved looking at the tomb, sitting in his room in the Agra fort. How can we sympathise with the cruel man and respect such rulers who factually enslaved and annoyad their subjects for their own merriment and satisfaction ? Not only they annihilated the then culture of India, but also they did many inhuman deeds that do reflect in our history for ever.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतः मुगलसम्राजः भारतस्य सम्पदः स्वकीयराजकीयाडंबरार्थं लौकिक सुखानुभवार्थं च विनियुञ्जते स्म। ते भारते न स्निह्यन्ति स्म। अस्य राज्यस्याभिवृध्यर्थं ते किमपि नाकुर्वन्। तेषां शासनकाले तु भारतमतितीक्ष्णं दारिद्र्यमनुभवदवर्तत। स्वसाम्राज्यान्तर्गतानां ग्रामाणां रोदनं ते नाशृण्वन्। तेषां शासनस्य यथार्थस्त्वभावस्तु प्रजाभिः दास्याचरणं, अन्यै राजभिः सह युद्धाय निर्बन्ध प्रेरणं तेषां तत्रैव वीरमृत्युलाभश्च। इयदेव। शिक्षाकृष्यादिक्षेत्रेषु सफलां पद्धतिमवतार्य भारतं सम्पन्नं समृद्धं च कर्तुम् ते नैव तत्परा आसन्। प्रत्युत स्मारकसौधानि मस्जिदानि दुर्गांश्च निर्मातुं ते अतितरां तत्परा आसन्। प्रजासु स्वाधिकारं समर्थयितुम् ते शासनं प्रयोजकीचक्रुः। ते भारतस्य हृदयं नाजानत। तथ्यतः जीवितादधिकं मरणमपूजयन्। एवं संक्षेपतः मुगलसाम्राज्यं अस्मद्राष्ट्रमुन्मूलयांचकार निर्जीवयाञ्चकार च।

आङ्गलशासनं भारतस्य हिताय अहिताय चाकल्पत। इदं तु सत्यमेव यद् भारतस्य चूषणेन स्वकीयं राज्यं सम्पन्नं कर्तुम् ते सततं तत्परा

In fact the Mughal rulers utilized the wealth of India for the sake of their own majestic show and to enjoy worldly pleasures. They did not care for the progress of the country. India was acutely suffering from severe poverty during that period. They could not hear the cries of poor villagers under their sovereignty. The ultimate nature of their ruling was to compel their subjects to do slavery and to fight with other kings and die for them. That was all. They had no idea or even interest to make the country rich and affluent by introducing any scheme in the field of cultivation and education or in any field of welfare of the country except erecting gigantic forts mosques and monuments.. They took the reign as to exercise their domination over the people and to tame them as their slaves. They could not find the heart of India. In fact they ignored life and worshipped death. Thus, in short, Mughal dynasty devastated our country and made it lifeless.

British reign had caused many advantages and disadvantages to the country. It is a fact that they were keenly interested in

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आसन्निति । किन्तु मुगला इव ते केवलमाडंबराणां विषयसुखानां च दासा नासन् । ते साहसिका अवर्तन्त । केवलं स्वार्थहेतोः ते अस्मद्राष्ट्रम् अभिवृद्धं चक्रुः । विविधविषयाविशेषज्ञुषो नरान् प्रोत्साहयामासुश्च । विविधान् मार्गानवलंब्य बहुभ्यः शताब्देभ्योऽनन्तरं भारतस्यैक्यसम्पादने ते प्रमुखा अवर्तन्त । शिक्षायां आङ्गलभाषायाः प्राधान्यं प्रकल्प्य जातिवर्ण धर्मादिविभागं विनैव सर्वेषामपि जनानां नवीनरीत्या शिक्षासौकर्यविधानं तैः कृतम् । अतो राज्यस्यास्य सकलेषु प्रान्तेषु निवसतां जनानां परस्परसम्पर्कस्यावकाशोऽजनि । व्याकरणनियमानां सरलता, आशयाविष्करणे लाघवं, साधारणजनानामभिगम्यता उद्योगविषये आवश्यकता इत्येतैर्विशेषैः आङ्गली भाषा सामान्यजनानाचकर्ष । अस्तु नाम, भौतिकविषयेषु आङ्गलभाषा किमपि ज्ञानप्रकाशमस्मभ्यमदादिति सत्यमेव । अपि च सा अस्मद्राज्यस्य अमूल्य चिन्तानां विश्वस्मिन् विश्वे सन्देशवाहिका चासीत् । पाश्चात्य शासनस्य महानयं लाभः । वस्तुतस्ते कदापि नास्मान् दासीचक्रुः । वयं स्वेच्छयैव तेषां दासीभवितुं सन्नद्धा जाताः । अस्मच्छि-

---

enriching their mother country by exploiting India. But they were not slaves of shows and pleasures like Mughals. They were adventurers. Even out of that selfishness and as a negative ga... of the process of exploitation, India attained development in various fields to some extent and those who were gifted with talent in many ways got encouragement also. They took initiative in the integration of India after many centuries by adopting various measures. First of them was to popularise education among all people irrespective of caste and creed giving importance to English So the people of all parts of the country could establish contact with each other. Simplicity of grammatical rules, easiness in expression, approochability of common people, necessity for job, all these in English attracted the ordinery man. English gave us an enlightenment, though materially and was a messenger of invalu able thoughts of our country, all over the world. It is a great advantage of the British reign. In fact English men did not make us slaves, but we offered ourselves to become slaves under them.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षारंगे आङ्ग्लशासकैराविष्कृता योजना रीतिश्च वयं स्वागतीकर्तुमुद्युक्ताः संवृत्ताः। तेषां दासत्वमारचयितुं न वयमजिह्लीम। भक्षण वसनधारणादिषु वयंताननुचक्रम। तैराविष्कृता शासनरीतिश्च अस्मभ्यमरोचत। आयोजनार्थं तासां निर्वहणार्थं च ते अस्माकं बुद्धिशक्तिं ओजश्च उपायुञ्जत। केषांचन नाणकानां कृते वयं द्रव्यभाण्डानीव स्वानेव तेभ्यः क्रीतवन्तः। मूढा वयं तु तदभिमानहेतुं मेनिमहे च।

अथ च मध्यशतकेभ्योऽनन्तरं भारतीयाः प्रायः आत्मविश्वासविषये स्वभावगुणविषये च क्षीणाः सञ्जाताः। जनाः स्वकीया वृत्तीः कर्तव्यानि च त्यक्त्वा अन्येषां साहाय्यं कार्यालयेषु कर्मचारिपदं चार्थयितुमारभन्त। कर्मचारिपदं तेषां जीविते प्रमुखं लक्ष्यमासीत्। सर्वेऽपि तद् गौरवपूर्णमाकलयन्। कस्मिन्नपि कार्यालये कर्म लब्धवन्तः समाजे माननीया अभवन्। ततस्ते समाजस्योपरि प्राभवं प्रकटीचक्रुः। अनया रीत्या कर्मकराणां दुष्प्रभुत्वं अथवा अधिकारमदः भारते अङ्कुरितोऽभूत्। वस्तुतः वयमेवास्य

We welcomed the systems and schemes introduced by the British rulers in all spheres. We felt no shame to accept their servitude. We limitated them in eating, dressing and everything. The mode of functioning of the government put into force by them also was appreciated by us. They made use of our energy and prudence for planing projects and their exicution. we sold ourselves to them like goods for a few coins. We, the fools, became proud of it.

In fact, from fhe middle age the people of India began to grow weak in respect of their character as well as of confidence. People abandoned their own duties and rasponsibilities and began to beg for employment and help from others. To get a job became the primary aim of their life. All took it as a prestige. Those who got job in some office were respected among the society and they began to dominate it. Thus bureaucracy began to sprout out in India. Factually we gave birth to bureaucracy in our country. Those who became the slaves of British officers, tried to make others

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दुष्प्रभुत्वस्य जन्मदातारः खलु । आङ्ग्लकर्मचारिणां ये दासीभूताः ते तु स्वविधेयानपि दासीकर्तुम् प्रायतन्त । ईदृशा रीत्या भारतीयानां धिषणाशालिनामपि आत्मविश्वासः चकम्पे । तेषां आत्मशक्तिः चिक्षिये च । अस्मिन् विषये भारतीया वयमेव पाश्चात्याधिकारिभ्योऽधिकं नन्वपराधिनः।

अधुना तु बहोः कालात् प्रभृति अस्माभिरेव परिपोषितः अधिकारमदः स्वकीयं भीषणं फणमुत्स्फारितमिव दृश्यते । समाजस्यैकैकोंऽशः अनेन विषमयः परिणतः । फलतः सर्वमपि उच्चावचं जातम्, विपरीतं फलति च । पश्यत । सामान्यजनानां अधिकाधिकं सौकर्यमाधातुं तथा जनसेवनमतोऽप्यधिकं सफलं कर्तुम् च कार्यालयानां कर्मकराणां च संख्या अनुदिनं वर्धते। अथापि जनानां क्लेशः द्विगुणीभवति । अविहित धनादानलोभात् अधिकारमदाच्च जनाः पीडिता जायन्ते च । एवमेव जनानां संस्कारस्य शुद्धीकरणार्थम् धिषणाशक्तेः विकसनार्थं च बहुसंख्याः पाठशालाः कलाशालाश्च समारब्धाः । सर्वत्रापि आचार्याः प्राचार्याश्च दृश्यन्ते । तथापि आधुनिकजनतायां शिक्षायाः

---

also slaves under them. In this manner self - confidence of Indian intelligentia dimmed and their spiritual strength diminished. In this aspect we, Indians commited more wrong than the British rulers.

Now the scope of bureaucracy, which is being brought up by ourselves since a long period, is seen to have spread out its terrific hood. Each and every part of the soceity is poisoned by it. Consequently we see everything resultingadversely. See, to create more convenience for the public and to render more effective service, the number of offices and staff is being increased day by day. But still the commoners are put into trouble more and more. They are annoyed with bribery and bureaucratic behaviour of the officers. Similarly for the mental and cultural development schools and colleges were started. They are increasing in number and every where we can see teachers lecturers and professors also. Nevertheless the culture and standard of education of the present generation is decreasing day by day

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कारस्य च स्तरः प्रतिदिनं क्षीयमाण आस्ते, अपि च छात्राः सर्वेषामपि दुर्गुणानां आकराश्च जायन्ते । गृह्यतामन्यदप्युदाहरणम् । राष्ट्रे प्रशस्ततरं शासनं संस्थाप्य जनान् सेवितुमेव राष्ट्रीयपक्षाः जनिमलभन्त । किन्तु अधुना राष्ट्रीयपक्षाणां स्वभावस्तु चूषणात्मकतया परिणतः । अन्येषामुपरि आधिपत्यप्रकटनवासनां वर्धयितुमेव ते प्रभवन्ति । एवं तेऽपि अर्थशून्या अभवन् । सन्यासिनस्तु स्वजीवितेनैव आध्यात्मिकमूल्यान्युदाहृत्य आत्मीयतत्त्वानि उपदिश्य च कालयापनं कुर्वन्ति । किन्तु अनुभवस्तु तद्विपरीत एव । तेष्वनेके अहङ्कारस्य स्वार्थतायाः मूर्खतायाः आसक्तेश्च मूर्तभावा उपलक्ष्यन्ते । पश्यताधिकरणानि । तैः सत्यस्य नीतेश्चायतनैः खलु भवितव्यम् । तथापि सत्यधर्मादीनां तत्रादरो न विद्यते । यथेष्टमितस्ततः परिवर्तयितुं निपुणा अभिभाषकाणां जिह्वाः उन्नताधिकारिणां स्वाधीनशक्तयश्च सत्यमसत्यं कर्तुम् असत्यं सत्यं कर्तुम् च शक्ता भवन्ति । सद्गुणानन्यथाकर्तुम् तथ्यमवगणयितुम् तेषां नास्ति सङ्कोचः । अथ च पश्यत ईश्वराराधनाविधिम् । स तु

---

and they are seen to have become the store-houses of all vices. Take another example. To serve the public by establishing a better government, political parties came into existence. But now the nature of service of parties became some sort of exploitation and to create a tendency of domination over others. So that also became devoid of its spirit. The sages are expected to serve the world exemplifying their own life for spiritual characteristics and to teach the common people the philosophical truths. But quite contrary to it, except a few, all of them look as embodiment of attachment, selfishness, ignorance and arrogance. See the courts which ought to be the shrine of truth and justice. No truthfulness and morality are valid there. The tongues of advocates which could be twisted to and fro according to their will and skill and the influence of high level, can change truth into falsehood and falsehood into truth. They have no hesitation to ignore spirit and dispel virtues. Again see the mode of worship of God.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केवलमवयवचलने पर्यवस्यति। मानवहृदयेन तु तस्य कोऽपि बन्धो नास्ति। प्रार्थनाभारस्तु कासेट् मैक् आदिषु भक्तजनैः निक्षिप्तः। ईश्वरविषया भक्ति-विश्वासश्च वाङ्मात्रे स्थगित आस्ते। देवालये तु ईश्वरं विना सर्वमप्यु-पलभ्यम्। एवमेव पश्यत चिकित्सारङ्गम्। आतुरालया भिषजश्च यथा यथा वर्धन्ते तथा तथा मानवा रोगग्रामाकरा भवन्ति। अत्र को हेतुः ? हेतुरेक एव, यद् मानवस्य एकैकं कर्म एकैकं चलनमपि आत्यन्तिकतया वित्ते सीमितमास्ते। नान्यत्र क्वचिदपि। ते सन्तु विद्वांसः सन्यासिनः भिषजः राष्ट्रीयनेतारो वा अथवा यत्र कुत्रापि क्षेत्रे प्रवर्तमानो यः कोपि वास्तु। सर्वेऽपि धनमिच्छन्ति। सर्वेऽपि स्वार्थनिरता स्वकार्यालयपरिधौ गार्हिकमण्डले च सङ्कोचं प्रपन्नाः प्रतिभान्ति। सर्वेषामपि तेषामुन्नमनेच्छा तत्रैव पर्यव-स्यति। वेश्याः स्वजीवसन्धारणाय स्वं मांसं विक्रीणन्ति। कर्मचरास्तु स्वधिषणाशक्तिं स्वजीवसन्धारणार्थम् विक्रीणन्ति। तथा सति द्वयोरेतयोः को नामात्यन्तिको भेदः। ते अत्युन्नतानामाशयानां वक्तारः खलु। किन्तु तेषां वाच आशयान् नानुवर्तन्ते। अतो वाक्कर्मविचारेषु ऐक्यमाधातुं ते न

It lasted in mere bodily movement. It does not touch the heart of man. The task of prayer is entrusted with cassettes and mikes. Devotion and faith upon Almighty are arrested in words. Everything except God is available in temples. Take the medical field. The more the doctors and the hospitals are increasing in number the more the man becomes victim of diseases. What is the reason for this ? The reason is: Each work and movement of man is ultimately aimed at money; nothing else. May be scholars, saints, doctors, political leaders or persons working in any field, all want money; all become selfish and confined to their job and family. The aims and ambitions of the man of today are limited in this circle. A prostitute sells her flesh for her livelihood. An officer trades with his intelligence for his axistence. What is the ultimate difference between them ? He utters words of highest ideas, but, words do not follow them. So he cannot maintain a harmony in

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शक्नुवन्ति । तादृशो मानव आत्मीयगुणेभ्यः भ्रष्टो भवति । फलतः तस्य आत्मविश्वासः सत्यसन्धता कर्मतल्लीनता च नश्यन्ति ।

संक्षेपतः विदेशीयाक्रमणं भारते दारिद्र्यं वपति स्म । तत्र आङ्ग्ल-शासनं तु स्वार्थदूषितमपि भारतस्याभिवृद्धिविषये बहूपकृतम् । किन्तु अस्मन्निष्ठं महत्त्वं अस्माभिरवज्ञातम् । अन्येषां दास्यं स्वयमङ्गीकृतं च । अस्माकमेतावदधः पतने इदमेव कारणम् ।

अस्मद्दशामधिकृत्य बोधवन्तो भवत । अस्माकमधःपतनं प्रति साव-धाना भवत । अस्मद्भविष्यं प्रति उत्कण्ठिता भवत! ।

---

his thoughts, words and deeds. Such a man naturally loses his spiritual qualities and becomes devoid of self-confidence, truthfulness and devotion to his duties.

In short generally foreign invasions sowed poverty in India. British Empire though selfish, contributed much more for the development of India. But we discarded our greatness hidden within us and welcomed servitude of others. That is why we have reached this downfall.

Be conscious of our position. Be causious of our downfall. And be anxious of our future !

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तावद् धनं तावदभीष्टमन्नं
तावद् बलं तावदनामयत्वम् ।
प्रयच्छ मे देव, यतः परेषां
हितास कर्माऽऽचरितुं क्षमः स्याम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

भारतस्य अमूल्यपुरस्काररूपा भौतिकात्मीय सिद्धयः चिराय क्षयमापद्यमाना दृश्यन्ते । विविधानां संस्थानां शासनविभागानां प्रतिष्ठानानां च समायोजनेन तादृशसिद्धीनां फलं रक्षितुं पोषयितुं च विविधाः उपायाः अस्माभिरवलंब्यन्ते । किन्तु तादृशप्रयत्नेषु किमु वयं विजयिनःस्मः ? नैव । कुतः? यदर्थं तादृश्यःसंस्थाः स्थापिताः तासां तात्पर्यं संरक्षितुं अवश्यमपरिहार्यया अन्तस्सत्तया विहीनाः ताः प्रायः समीक्ष्यन्ते । अस्मिन् विषये अस्मत् पुराणपुरुषेभ्यः इतिहासेभ्यश्च बहवः पाठाः पठनीयाः सन्ति । वयं तेषां अनन्तरपरम्पराः खलु । अद्य वयं कीदृशीं दशां प्रपन्नाः? सांस्कारिकोन्नततलात् वयं अधुना सकरुणं निपतिताः स्मः ।

THE GIST

Material and spiritual achievements, the invaluable contributions of India, are facing a terrific decline since a long period. We are always taking various measures to protect and preserve the outcome of such achievements by constituting establishments of several kinds. But, are we successful in such endeavours? No. Why? Very often, we find such establishments devoid of the spirit and sincerity to serve the purpose for which they stand. In this regard we must learn lessons from our mythology and epic characters. We are their successors. But what stage we have reached now? Alas! we have pitiably fallen down from the realm of our cultural elevation.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कथमिदं राष्ट्रं पुष्णीयात् ?

भारतमधुना स्वतन्त्रराष्ट्रमिति ३९ वर्षात् आरभ्य वयं साभिमानं ब्रूमः। अद्य वयं न राज्ञः प्रजाः किन्तु राष्ट्रस्य पौराः स्म इत्यभिमानविजृम्भिता जाताः। वस्तुतस्तु वयं तत्त्वतो न पौराः परिणताः। न वा भारतं राष्ट्रं परिणतम्। अधुनापि वयं भाषाप्रान्तीयतादि पक्षपातमवलंब्य विभिन्ना वर्तामहे। द्राविडपक्षाः पाञ्चालपक्षाः गुर्जरपक्षाः वंगपक्षाः केरलपक्षा इत्येवमस्मिन् राष्ट्रे प्रान्तीयतामुग्धाः विभिन्नाः समीक्ष्यन्ते। वयमधुनापि प्रान्तीयतापरतन्त्राः स्मः। भाषाणां क्रीतदासाः स्मः। मानवं वन्ध्यं कुर्वत्या शिक्षया विलुब्धाः स्मः। मतस्य धनस्य स्थानस्य मानस्य जातेश्च आज्ञा-

---

How would this nation be prosperous ?

We say proudly that India has become an independent nation since thirty nine years. Today we are not the subjects of kings, but the citizens of a nation. Thus, we are puffed up with pride. But we have not actually become citizens; nor our India yet has become factually an independent nation. Even now we seem to be devided into many ways with various aspects like language, religion, province etc. We see the people are fascinated by provincialism with different attitudes like Tamilians Punjabies, Gujaraties, Bengalies, Malayalies and so on. We are even now not free from provincialism. We are slaves of our languages. We are infatuated by such a system of education that makes a man unproductive and good for nothing. We are enslaved by caste self-conceit social

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नुर्वर्तिनः स्मः । मम राष्ट्रमित्यस्य अद्यतनस्य भारतीयस्य संङ्कल्पः स्वगृह गृहिणी पुत्र पौत्रादिषु सङ्कुचितः सञ्जातः । स्वराष्ट्राभिवृद्धिरित्यस्य स्वस्याभिवृद्धिरित्येवार्थः परिणतः । तदर्थमेव ते प्रयतन्ते च । अन्ये सर्वेऽपि जीवन्तु अथवा म्रियन्ताम् । कस्य का नाम हानिः ? । अद्य न वयं भारतीयाः, किन्तु कम्यूणिस्ट्पार्टीयाः कोणग्रेस्पार्टीयाः, आर. एस्. एस्. पार्टीयाः अथवा यत्किञ्चिदन्यपार्टीयाः इति स्वयमभिमन्यामहे । वयं सवर्णा अथवा अवर्णाः । वयं हैन्दवाः माहम्मदाःक्रैस्तवाः सिखा वा, न कदापि भारतीयाः । अस्माकमीश्वर एकः, युष्माकमीश्वरोऽन्यः, अन्येषामीश्वरा अन्ये च । एवमस्माभिरीश्वरोऽपि बहुधा विश्लेषितः । केन्द्रशासनं प्रान्तीयशासनानि च ईदृशीः चित्तवृत्तीः सगौरवं न परिगणयन्ति । इदं राष्ट्रस्य हानिकरं परिणंस्यति । वस्तुतः शासनानि अस्मिन् विषये किमपि कर्तुम् न शक्यम् । अस्माकं राष्ट्रे एकैकोऽपि पौरः अस्मिन् विषये प्रबुद्धो भवितुमर्हति । स्वार्थिनां कतिचन स्वेच्छाप्रभूणां मुष्टिभ्यः अस्मन्मातृभूमेर्मोचनविषये कतिचन महान्तः पूर्णविजयमवापुः । तेषामुज्वलपुरुषाणां केचन स्फुलिङ्गाः अद्यापि न सर्वथा निर्वाण-

---

status, money and religion. The concept of a citizen of India today about his nation has confined to the pricincts of his house and kiths and kins. The prosperity of the nation in his view is his own enrichment. Except a few, all try for only that. Let others live or die. It doesn't matter. No harm. Actually now we are not Indians. We claim to be Communist, Congress, R. S. S or any other similar party. We are **Savarnas or Avarnas**. We claim to be Hindus, Muslims, Christians Sikhs, not to be Indians. My god is one, your god is another, others, gods are some others. Like this we have split up even god into pieces. Central and state governments do not take such attitudes as serious which would be harmful for our nation. Ultimately the government can do little in the matter. Each and overy person of our nation should be conscious about the matter. A few of the great personalities of our country have achieved a great success in releasing our mother land from the clutch of some selfish monarchs. Some sparkles of such brilliant persons are not

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मवापुश्च । किन्तु ते तन्महत्त्वं संरक्षितुं अधुना न शक्ताः, यतः ते अद्य तदनन्तरगामिभिः पश्चात्कृताः ।

तारतम्यतः सच्चरितधनेभ्यो राजभ्यः तद्विहीनाः स्थानमानधनतृषिताः सामान्यजनाः शासनं हठादाचिच्छिदुः । वर्णशबलैरसत्यप्रस्तावैः जनान् सम्मोह्य ते स्वेच्छानुरूपं अथवा स्वसंस्कारानुरूपं शासनं कुर्वन्ति । जनानां मध्ये भेदबुद्धिमावपतां विविधोपाधीनां संख्या वर्धते च । पुरातने काले प्रायः धर्मनिष्ठया नियन्त्रिताः खड्गाः राज्यस्य शासनमकुर्वन् । तदनन्तरे काले विषयासक्त्याः अधिकारतृष्णायाश्च विधेयाः खड्गाः शासनमारभन्त । अद्य तु धर्मनिष्ठया न किमपि बन्धमापद्यमानाः यथावसरं यथेष्टं च परिवर्तयितुं शक्ताः जिह्वाः एव राष्ट्रं शासति ।

अद्य राष्ट्रे अतिगुरुतरः प्रश्नः शिक्षाविषयक एव । अस्मद्राष्ट्रे लब्धजनुषां पौराणां नित्यदासीकरणार्थं अत्यन्तं प्रयोजनकरी काचन पद्धतिरेवाधुनिकी

---

yet completely put off. But they are helpless to keep up the grandeur because they are left behind today by their followers.

Now the common men who are always thirsty of money prestige and status in the society and who are lacking character, have snatched up the ruling power from the kings better in character than this rulers of to day. Having faseinated the mass with attractive promises and colourful interpretations they rule over the country according to their culture, will and pleasure. The number of tricks that creates different understanding among the people increases day by day. In old ages country was ruled by the swords which were controlled by virtue and charity. Later on the swords were subjugated to the thirst of domination and sexual pleasures. Now the country is ruled by only tongues which can be twisted to suit the occasions and which has no, connection with the reality or sincerity.

Nowadays the serious problem that faced the country is education. The present education is an excellent project very useful

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षा। "सर्वेषां शिक्षा, सर्वेषां वृत्ति" रिति समुद्घुष्य केचन छात्रसंघाः राष्ट्रे इतस्तत उद्भिन्नाङ्कुरा दृश्यन्ते। का नामैषा शिक्षा। किं तस्याः तात्पर्यम्? पञ्चवयस्कस्य शिशोः पाठशालाया गर्भे प्रवेशनं. तत्र दशवत्सरीं ततोऽधिकं वा यत् किमपि कृत्वा समयं विनीय बहिर्गमनं च। तदेवाद्यतन-शिक्षाया नग्नस्वरूपम्। भविष्यजीविताय यदावश्यकं तत् किमपि तत्र नोपलभ्यते। तदार्जितुं न कोऽपि प्रयतते च। अथ यदि प्रयतेत तर्हि न तत् तत्र लभ्यं च। भविष्यजीविते अपथसञ्चारार्थं यद्यदावश्यकं तत् सर्वं तत्र लभ्यते च। इयदेवास्माभिः शिक्षेति कथ्यते। ईदृश्याः शिक्षायाः किं नाम लभ्यम्। राष्ट्रस्य साकल्यतो हानिरेव।

अथ का नाम वृत्तिः। किं तस्याः स्वरूपम्ः? तस्याः स्वरूपं तु इतस्ततो भ्रमणचणं सिंहासनम्, परिष्कृतवेषविधानानि, पत्रसम्पुटानि, प्रतिमासवेतनम्, वेतनवर्धनम्, अधिकारमदः, अकर्मण्यता इयमेवाद्य कार्यालयेषु प्रवर्तमाना वृत्तिः। राष्ट्रसेवा नाम स्वपरिवारपोषणम्। राष्ट्रे यावानायोऽस्ति तस्य बहुभूरिप्रतिशतं

---

for enslaving the man power of our nation. Now some students associations are seen sprouted out shouting "Education for all job, for all". What does the education mean? A child of five years or earlier enters into the womb of a school and spends ten or more years there and comes out. This is the real picture of present education. Nothing is gained from there which is necessary for their future life. Nobody tries to gain it. If somebody would try, it is not available there. All that are needed for failure in life, can be accumulated from there. What is the gain of such an education? complete destruction of the nation. Nothing else.

What is the job? what is the nature of it? The real picture of it is an oscillating chair and table, modern dresses, files, monthly salary, increment, superiority, inactiveness; this is the nature of job which is seen in offices. Service means to foster family. A large portion of revenue of the state is swallowed by those who

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तैरेव भुज्यते । अत्र विभवसमृद्धमातिथ्यं सज्जीक्रियते । तत्र रोचकं मधुरं च सर्वमातिथेयाः एव ग्रसन्ति । बुभुक्षव अतिथयः तदुच्छिष्टैरेवातृप्तिं भजन्ति । इयमेव दशा अस्मद्राष्ट्रस्य । यद्यद् विभागेषु यावानायोऽस्ति तत् सर्वमपि भोक्तुं तत्तद्विभागकर्मचारिण एवार्हा इति तेषां सिद्धान्तः । यथा- वैद्युतीविभागादुत्पन्न आयः वैद्युतीविभागकर्मचारिभ्य एव विभक्तव्य इति ते परिकल्पन्ते । वन्य सम्पत्तेर्यल्लभ्यते तत् सर्वं वन्यविभागकर्मचारिणामेव स्वायत्तमिति तेऽभिमन्यन्ते । कम्पनीनामायः तत्कर्मचारिभ्य एव । एवंविधा धारणा अधिकाधिकं तान् लुब्धानातनुते। एवं शरीरायासं विना राष्ट्रस्यायं स्वयं भुक्त्वा राष्ट्रं दरिद्रयितुं विहितः कश्चन मार्गं एव वृत्तिः । कथमीदृश्या शिक्षाया वृत्या वा अस्मद्राष्ट्रं सम्पन्नं भविष्यति ? कार्यालयानां कर्मचारिणां पत्रसम्पुटानां संख्यावर्धनेन कथं राष्ट्रमभिवृद्धिमाप्स्यति ?

---

belong to the offices. Here we arrange a feast pleanty of delicious items. A major portion is swallowed by the hosts. The hungry guests become satisfied with their remnants. This is the position of our country. The employees of each department seem to be keeping an understanding that the income of their department is entitled to them alone. see; The income of the electricity department has to be divided and distributed to the employees of that department. Likewise the income of the forest department is entitled to the employees of that department and so on. Such an understanding makes them more and more greedy and mean. Like this a job is an easy way to enjoy the natianal income without paying much effort and so to devastate our nation. How does our country be prosperous with such jobs and education? How would a a nation progress by increasing posts and files in offices as we do now? As such how can a wise society favourabaly respond to the shouting "Education for all job for all"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं स्थिते विचारशीलः को नाम समाजः सर्वेषामपि शिक्षा, सर्वेषामपि वृत्तिः इत्युद्घोषणं श्रद्धास्यति ? भक्ष्योत्पादनमेव राष्ट्रं सम्पन्नं कर्तुम् प्रभवति । यदि तद् समृद्धं स्यात् कला संस्कार शिक्षा सम्बन्धीनि सर्वाण्यपि परिपोषं प्राप्स्यन्ति । तद् समाजक्षेमाय च स्यात् । अन्यथा, यथा आधुना दृश्यते, सर्वमपि दूषितं भविष्यति । अस्माकमद्यतन परम्परा शिक्षिता वर्तते यस्याः राष्ट्रे क्षेमः प्रतीक्ष्यते । किन्तु ते कृषिक्षेत्रेषु पदं सकृदपि विन्यसितुं सङ्कुचन्ति, यतस्तेषां पादतलं पङ्किलं भविष्यति । डिटेक्टीव् नोवल उज्झित्वा कथं ते हलं खनित्रं च धर्तुमुत्सहेरन् ? ते क्रमशः परिष्कृतवेषविधाना मोषणे चूषणे च वैदग्ध्यं प्राप्नुवन्ति । राष्ट्राभिवृद्धि विषये तेषां न कोऽपि संबन्धो भवति ।

ग्रामसभाः नगरकल्पाः भवन्ति । ताः नगरसभाः परिणमन्ति । नगरसभाः महानगरसभारूपेण च परिणमन्ति । किमिदं राष्ट्रस्य पुरोगतेः सूचकं ? न कदापि । सौधसहस्राणां निर्माणेन महापाठशालानां स्थापनेन आतुरालयानां स्थापनेन वा राष्ट्रं पुरोगतिं प्राप्स्यतीतीयं धारणा अलीकैव । भूमौ कृषिकर्म

We must be awake of the fact that the main factor of enrichment of a country is production of food. If it is in plenty, art, culture and everything like that, will be for prosperity of a nation and so it will also be beneficial for the society. Otherwise every thing will be spoiled as we see now. The present generation is educated. We expect prosperity of the nation from them. But they hesitate to step into the fields because their foot would become dirty. How would they be prepared to hold spade and plough in their hands who deal with only detective novels. They will gradually become clever in exploitation and robbery in up-to-date methods. They have no concection with the progress of the country.

Panchayaths become townships, townships change into municipalities, municipalities into corporations. Is it an indication of the progress of a nation? Never. It is a false concept that a nation will progress by simply extending shopping centres, metelling roads,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कृत्वा धान्यादीन्युत्पादयितुं तत्पराः कृषीवला एवावश्यकाः। तदैव राष्ट्रं पुरोगतिं प्राप्स्यति। तत्र कर्मसु प्रोत्साहनीयान् यूनो यथाकथञ्चित् आकृष्य कार्यालयेषु कर्मचराणां पदे प्रतिष्ठाप्यन्ते चेत् तत् पीठं कृषिभूमिश्च सममेव नङ्क्ष्यतः। अधुना लुप्तप्रायं ब्राह्मणक्षत्रिय वैश्य शूद्रभेदमधिकृत्य नायं प्रस्तावः। उपवीतधारीत्यतः ब्राह्मणस्य कृषिर्नैव निषिद्धा। उपवीतविहीनस्य ज्ञानसम्पाद-नार्हता नास्तीत्यपि न निर्धारणीयम्। यदि बुद्धिशक्तिरस्ति तर्हि चण्डालेनापि शिक्षा सम्पादनीया। तदर्थमनुपेक्षणीयाः सर्वा अपि सुविधाः तस्मै प्रदातव्याः। बुद्धिशक्त्या विहीनो यदि ब्राह्मणोऽप्यस्तु, स नियतं कृषिकर्मणि व्यापार-यितव्यः। कर्मविभजनं मनुष्यस्य बौद्धिकशारीरिक शक्तिमवलम्ब्य कल्पनीयम्। राष्ट्रस्यान्नोत्पादकः कृषीवलः कार्यालये अथवा कम्पनीषु कर्मचारी इव

---

inaugurating hospitals, startnig collages erecting buildings and so on. Here, at present, farmers are more needed who could produce food materials by cultivating lands. Then only the nation would progress. If the youths who are interested and ought to be encouraged in farming, would be appointed in offices attracting them by some or other way, the posts will be polluted and the land will be spoiled simultaneously. The reference made here is not based on the classification of the castes as Brahmana, Kshatriya, Vaisya and Soodra which is almost extinct now. Because of wearing sacred thread Brahmin should not hate farming. Likewise because of not having sacred thread Soodra is not prohibited from acquiring knowledge. If gifted with intelligence every one is entitled to be given proper education though he may be a Chandala. For that, all necessary facilities are to be given to him. A man who is lacking the intellectual power, though he may be a Brahmin, must be engaged in cultivation, which requires mainly physical strength. Allotment of work has to be made based on capability of intellectual and physical qualities. Producers of food for the nation should be given equal consideration as to the employees in goverment offices companies etc. Now they are taken as the lowest

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समाजे समादरणीयः। अद्य तु स समाजे अधमः परिगण्यते। स स्वचूषकान् कर्मचारिणः कम्पनीव्यवस्थापकांश्च उन्नतानामनुते। कर्षक एव तेषां मूलम्। तस्याभावे समाजस्याङ्कुरणं पल्लवनं च न स्यादिति ते न जानन्ति।

का नाम कृषिः? भूमौ प्ररोहत्सु वृक्षलतासस्येषु सञ्चरत्सु पक्षिमृगेषु च मनुष्यजीवसन्धारणायावश्यकान् कतिचन निर्धार्य तेषां सनिष्कर्षं प्ररोहणं प्रपोषणं तत्फलग्रहणं चैव कृषेः प्रकृतिः। को नाम व्यवसायः? यद्यत् भूमावुत्पाद्यते तेषां असंस्कृतवस्तूनां मानवोपयोगार्थं संस्काराधानमेव तस्य स्वभावः। किन्नाम वाणिज्यम्? एतादृशानां संस्कृतपदार्थानां मानवोपयोगार्थं तत्तत् केन्द्रेषु विनिमय एव तस्य स्वरूपम्। किं नाम शासनम्? सर्वेषामपि पौराणां स्थित्यर्थं अभिवृद्ध्यर्थं च यद्यत् साहचर्यं सौकर्यं चावश्यकं तेषां संविधानमेव शासनस्य प्रकृतिः। आसु व्यवसाय शालासु शासनकार्यालयेषु

---

in the society. But the farmers take the employees, in offices who are actually their exploitors as higher than them. In fact the farmers are the real basis of the existence of all the mankind. They do not know the seriousness of the fact that in absence of farmers the society cannot sprout, grow and bear fruits.

What is cultivation ? The nature of cultivation is this: There are various kinds of living beings both animates and inanimates on the earth. Among them, useful for sustenance of human being are reproduced nourished and harvested. This is cultivation. What is industry ? To change raw materials produced by farmers into their refined form so as to make it useful for man directly. What does the trade mean ? It is to transit the goods come out of the farms and industries to the customers living in different parts of the country. What is the government? The nature of functioning of the government is to provide with necessary arrangements according to the requirements and environments of the people and to maintain protection and progress of nation. The ordinary people

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अथवा तदङ्गीकृतसंस्थासु च वृत्तिं लब्धुमेव समान्यजना अभिलषन्ति। यत्किञ्चिदप्यस्तु, एतेषां सर्वेषामपि मूलकारणं कृषिरेव।

तादृशी अतिमहत्त्वपूर्णा कृषिरस्माभिरधुना अवगण्यते। व्यवसायशालानां स्तंभान् कर्मचारिणोऽधुना प्रकम्पयितुं प्रभवन्ति। अतो व्यवसायिनोऽधुना सम्भ्रान्ताः। वणिजस्तु लाभादधिकमपहरणं कुर्वन्ति। राष्ट्रीयाधिष्ठितानां शासनव्यवस्थानां इन्द्रचापस्यायुरेवास्ति। तत्तु उत्तरदायित्वलेशं देशस्नेहं च विना राष्ट्रीयनायकानां अपहरणकेंद्रं परिणतम्। शासनकर्मचारिणां प्रायोऽधुनास्ति किमप्यलिखितं शासनम्। प्रतिमासवेतनं तु परिवारनिर्वहणार्थमेवास्ति। आत्मनो नित्यवृत्तिनिर्वहणार्थं अन्यथा यथाकथञ्चिदादातव्यम्। नित्यवृत्तेः परिमाणस्तु तत्तद्विभागीयकर्मचारिणां उत्तमाधमभावमनुसृत्य स्यात्। संक्षेपतः राष्ट्रस्यायमर्थः। बहुविधानां व्यवसायिनां वणिजां राष्ट्रीयसेवकानां कर्मचारिणां सर्वविधमलीमसचर्याणां किमपि केन्द्रम्। तदेवाद्य राष्ट्रम्।

---

want to get employment in companies or in the offices under government or in any institution controlled by it. What ever it be; we see, the ultimate basis of all these things is cultivation.

Now we have become so civilised as to hate such a blessing job. Since the employees are now able to shake the pillars of the companies, the industrialists are seen almost perplexed in many aspects. Business man stands not for gaining profit, but to practise robbery. The government controlled by politics appears and disappears like rainbows. It has become a centre for exploitation by politicians who have no responsiblity towards the people nor love towards the nation. Some govt. employees have some unwritten rules framed by themselves as their monthly salary is intended for their family expenses. Their personal day to day expenses has to be met by some or other ways. The quantity of that amount is fixed according to the position of the persons working in the respective departments. In short, the nation is moulded and controlled by officers, politicians, businessmen and Industrialists according to their interest. This is the actual situation of the country. The government takes the problems of such persons very seriously

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतेषामेव प्रश्नान् अर्हानर्हविवेचनं विना शासनं सगौरवं परिगणयति। शासनदृष्टौ पौरजनः एतेष्वेव पर्यवस्यति। कर्षक एतेषां दृष्टौ न किमपि वस्तु। मानवप्रयत्नं विनैव यथाकथञ्चिद् यत्र कुत्रापि प्ररूढानां आम्रपनसादीनां फलं वयमनायासमनुभवामः। तदर्थं न किमपि वयं व्ययं कुर्मः। केवलं स्वप्रभुताप्रख्यापनार्थं गृहाङ्गणे प्ररोहयतां निष्फलानां परिष्कृतशबलवृक्षलतानां कृते कति धनं वयं व्ययीकुर्मः। कियद् बुद्धिशून्यताविलसितमेतत्।

शासनस्यास्ति कश्चन कृषिविभागः। तस्य कृषीवलैः कृषिक्षेत्रैः वा सह न कोऽपि संबन्धोऽस्ति। ते परिष्कृतवेषविधानैः सह विराजमानाः कृषिप्रवृध्यर्थं विभक्तं धनं सुखं भुञ्जते। ग्रामीणेषु स्वप्रामाणिकत्वानुसूत्यर्थं प्रतिग्रामं ते पर्यटन्ति। आकाशवाणीनिलयेभ्यः प्रभाषणं च कुर्वन्ति। तेषां कृषिविकसनमेतावति पर्यवस्यति। फलतः कृषिकर्मसु न कोऽपि निरतो भवति। प्रायः कृषीवलः समाजे कार्यालयेषु द्वारपालकस्य स्थानमानमपि न

---

without discrimination. In view of government the meaning of the word "citizen" lasts there. The farmers are nothing in their view though all of them are fundamentally depended on them. We easily enjoy the fruits of the trees grown here and there without any effort. For that we spent nothing. But at the same time a lot of money to maintain colourful gardens which yeilds nothing for us. What a foolery it is!

The government has an agricultural department. It has little interest with farms as well as farmers They shine in their offices dressed decently and enjoy the allotments for the progress of their department. They conduct frequent tour from village to village to enjoy the honour of villagers. They broadcast serious discussions from A. I. R. and prepare plans. With this their activities for development of agriculture are put to an end. In fact. the farmers do not get any encouragement that they actually deserve. As a

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लभते। स द्वारपालकः विनैव स्वेदकणिकाप्ररोहं प्रभूतं वेतनमादत्ते। कर्षकस्तु अहोरात्रं प्रयतमानोऽपि द्वारपालकस्यार्धमपि आयं न लभते। स कथं स्वीयान् पुत्रान् कर्षकान् कर्तुमभिलषेत् ? स तेषां पादं पङ्के निधातुमवसरमदत्त्वैव परिष्कृतवेषविधानैः सह परिष्कृतपाठशालां प्रवेशयितुं सर्वथा प्रयतते। तेषु धिषणाशालिनो द्विता एव उन्नतबिरुदमादाय वैदेशिकानां क्रीतदासीभवन्ति। कतिचन स्वदेशेष्वेव केषुचित् कार्यालयेषु कर्मकराः पाठशालासु अध्यापका भूत्वा जीवितं नयन्ति। कतिचन राष्ट्रीयाः परिणमन्ति। केचन अध्यात्मिकप्रचारकाः सुखमनुभवन्ति। कतिचन व्याजनाणकनिर्माणादिषु कृत्रिमव्यवसायेषु कुशला विराजन्ते। यत्किमप्यस्तु, क्षेत्रेषु कृषिकर्म कर्तुम् न कोऽप्युत्सहते। एवं सति राष्ट्रं कथमभिवृद्धिं यास्यति ?

अत्र एतद्विभिन्नवीक्षाकोणे स्थित्वापि अस्माभिः किमपि चिन्तनीयमास्ते। राष्ट्रीयनेतृजनस्य अनपेक्षितसम्पर्कः ग्रामीणानामज्ञता च समर्थं आर्जवयुक्तमपि

---

result nobody becomes interested in cultivation. Generally a farmer does not get the status of even an attender in office. An attender gains plenty of money without perspiration. But a farmer, though he is striving throughout day and night, does not get even half of it. How would he wish to bring up his children as his successors ? He tries to get admission in any residential school with up-to-date make up avoiding chance to put their foot in mud. All of them grow with hatred towards cultivation. A few of them gifted with intellectual power, pass higher examinations and become slaves of the foreigners. -Some of the rest start their life as teachers or employees in government offices or companies. Some shine being politicians: Some enjoy, their life in the spiritual field. Some shine in their own business in black money-market. What ever may it be, nobody comes for cultivation of land. In such a position how would a nation grow prosperous ?

Here we should consider some facts standing on another point of view. Interference of political leaders and illiteracy of villagers make an efficient and sincere officer helpless to do any thing for

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कर्माधिकारिणं समाजक्षेमाय यत् किमपि कर्तुम् असहायं तनोति । ग्रामसम्बन्धि सकलमपि क्षेत्रं राष्ट्रीयनेतारः दूषयन्ति । ग्रामनेतृजनस्य अनावश्यकसंसर्गेण शासनात् लभ्यमानस्य साहाय्यस्यापि दुर्विनियोगाय च ग्रामीणा निर्बद्धा भवन्ति । किन्तु महानंशः राष्ट्रीयनेतृगणस्य सञ्चिकासु प्रविशन्ति ।

अधुना राष्ट्रीया एव राष्ट्रं नियन्त्रयन्ति । राष्ट्रीयस्यार्थस्तु येषां बहवोऽज्ञाः पश्चात् अनुधावितुं सज्जाः सन्ति, ये नाम केवलजिह्वा व्यायाम बलतः समाजे उन्नातपदमाप्तवन्तः तेषां गण इत्येव । तेषां स्वाधीनतामवलम्ब्यैव सर्वेऽपि निर्णयाः क्रियन्ते । ईदृश्यां दशायां को नामाधिकारी स्वकीये विभागे किमपि सर्गात्मकं कर्म कर्तुम् उत्सहेत?

सर्वेऽपि जीवितुमर्हन्ति । तेन सह तथैव अन्येऽपि जीवनार्हा इत्ययं बोधोऽपि समेषामपि भवेत् । तादृशो बोधोऽपि न प्रायः कस्यापि विद्यते । यदि केषांचनास्ति

---

welfare of the society. The politicians pollute all fields related to the villagers. They become compelled to misuse financial assistance from the govt. by unnecessary interference of some leaders of their villages. For development of villages government has sufficient allotment. But a considerable portion of the amount flows to the pockets of the political leaders of the villages.

Now party rules over the country. party means a gang of leaders who have come up to the top in the society by mere tongue's exercise and who got success in getting some ignorant followers. All decisions are taken based on their influence. In such a position how could an officer dare to do any constructive work in his department?

All have right to live. But at the same time we must be aware that let others also live as we do. Nowadays very few are seen having such an attitude. If somebody is possessing such a tendency

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत् परिपालयितुमुचितं वातावरणमपि नाधुना विद्यते । अद्य तु अस्माकमीदृशी दशा वर्तते ।

भाषा धर्म वसु प्रान्त
वर्णादिभिरुपाधिभिः ।
एकसूत्रोच्चितेऽप्यस्मा-
स्वेकैकोपि विभाजितः ॥

---

he does not get such an atmosphere to maintain it and implement it in his life. Today we have reached such a condition by our civilization.

We are divided among ourselves by many
discriminatary properties like language,
religion, wealth, province etc. though
strung together on the same thread.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

वयं आधुनिकशास्त्रीययुगे जीवाम इत्येतत् तथ्यं न कदापि निषेद्धुं शक्यम्। एवं सति संस्कृतप्रचारणक्षेत्रेऽपि तादृशीः सिद्धीः स्वागतीकर्तुम् अस्माभिः कुतो न शक्यम्? बहुभ्यः शतकेभ्यः प्रभृति संस्कृतं स्वकीये क्षेत्रे बहुधा सङ्कोचमवाप। संस्कृतभाषा न खलु केवलं केषांचन पुरोहितानां जिह्वासु संलग्ना अथवा केवलं केषांचन स्तोत्राणां समाहाररूपा वा। मानवस्य जन्मनः प्रभृति मृत्युपर्यन्तं सर्वमपि तत्रान्तर्भवति। संस्कृतरूपकाणां पुराणकथानां च रूपान्तरतया संस्कृतसंभाषणमवलंब्य सिनिमा चित्राणि निर्मातुं शक्यते। साधारण जनानामपरिचितायामपि भाषायां निर्मितान्यपि तादृशानि चित्राणि द्रष्टुं जनाः तत्परा भवेयुः यतः चित्राणां इतिवृत्तं तेषां सुपरिचितं स्यात्। नटानां अभिनयात् चलनाच्च भाषणमवगन्तुं शक्यते च।

THE GIST

The fact that we live in the age of modern science, can never be denied. As such, why couldn't we welcome such achievements into the field of propagation of Sanskrit also? Since centuries Sanskrit has shrivelled within its scope in many ways. We should be aware that Sanskrit is not a language consisting of a few Stotras or clinging to the prattling tongues of a few priests. It contains all aspects of the life of man from birth to burial. We can produce pictures with Sanskrit dialogues as adaptations of Sanskrit dramas as well as puranic stories. Public will take interest to see such pictures, though produced in a strange language to them, because their plots would be familiar to them and the dialogues could be grasped by the movements and actions of the cast.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चलच्चित्रमाध्यमेन संस्कृतप्रचारणम्

नवनवानां शास्त्रीयाविष्काराणां उपलब्धेः अधिकाधिकं प्रभावितो नरः
प्रतिदिनमभिवृद्धिमाप्नोतीति यद् तद् न प्रत्याख्यातुं शक्यम्। अस्माकं
पौराणिकसिद्धीनां प्रचारणार्थं अनवरतमतीव प्रयतमानानां, सर्वाण्यपि लौकि-
कसुखानि परित्यक्तवतां अद्यतनानां यतिवर्याणां जीवितेऽपि अयं प्रभावो
दृश्यते। तथा सति, साधारणजनानां विषये का कथा? यद्यप्ययं शास्त्रा
तिप्रसरः मानुष्यकस्योपरि जायमानं किमप्याक्रमणमिति स्पष्टमेव, तथापि
मानवसमुदायस्यायं शापादधिकमनुग्रहायैव कल्पते। यथाशक्यम् यथानुयोज्यं
च सर्वेऽप्येतमनुग्रहमनुभवन्ति। वार्तानां विज्ञानांशानां च परस्परविनिमयार्थं
तथा तेषामुत्कर्षार्थं च विश्वस्यास्य कोणे कोणे निवसद्भिर्जनैः सह सम्पर्कमाधातुं
एतादृश्यः शास्त्रीयसिद्धयः अस्माभिरखिलैरप्यवलम्ब्यन्ते। एवं सति संस्कृतस्य

Sanskrit propagation through movies

The fact that the man is progressing day by day being more and more influenced by the achievements of the up-to-date scientific inventions, cannot be denied. This influence is seen in the life of even sages of today who are striving for propagation of our ancient spiritual achievements and who have relinquished all worldly plea-sures. As such, what is the case with the ordinary people. Though it is some kind of encroachment of science upon man it is a blessing to the mankind more than a curse. As far as possible and as far as applica-ble, all enjoy this blessing. We depend on such scientific achievements for contact with the people of each and every corner of the world for mutual exchange of news and knowledge and for its advancement.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रचारणार्थं प्रसारणार्थं च यदि वयं तादृशान् शास्त्रीयलाभान् स्वागतीकुर्मः तर्हि का नाम हानिर्भविष्यति ? तत् सर्वथा स्वागतार्हमेव ।

युगोऽयं शास्त्रायत्तः । अस्मत्पौराणिकपैतृकं तत्परिशुद्धिमनपहायैव संरक्षितुं अस्माभिर्दत्तावधानैर्भवितव्यम् । अस्मद्विचारा अभ्युपपत्तयोऽपि एतद्युगानुरूपं रूपवत्करणीयाः । आधुनिकमाध्यमैः तदेतत् प्रवाहणीयमिति यावत् । एतया दृशा संस्कृतशिक्षाप्रचारणक्षेत्रे आवश्यकान् परिष्कारान् अङ्गीकर्तुमस्माभिः सन्नद्धैर्भवितव्यम् ।

संस्कृतशिक्षायाः सर्वेष्वपि मण्डलेषु यथासाध्यं कासेट्ट उपयोक्तव्यमितीदमत्र सर्वप्रधानमेव । अयं कासेट्टप्रयोगः संस्कृतं गृहे उषित्वा अध्येतुकामानां सर्वेषामपि यथावसरं आचार्यवत् प्रयोजकीभविष्यति ।

अद्यतनशास्त्रीयसिद्धीराश्रित्य चलच्चित्रद्वारा टेलिविषन् द्वारा च संस्कृतशिक्षाया दृश्यतापादनं ननु संस्कृतप्रचारणार्थमन्यो मार्गः । सामान्य जनानां

If so, what is the harm if we would welcome such blessings of science for propagation and popularisation of Sanskrit. We must welcome it.

This is the age of science. We must mould our thoughts and approaches to suit this age being very careful in keeping our ancient heritage in its full sanctity. ie. the same heritage should be conveyed by the modern media. With this perspective, we should be prepared to adopt some essential reformations in the field of porpagation of Sanskrit education.

First of all, to introduce cassettes in all possible spheres of Sanskrit education, is very essential. This will help everybody, who wantsto learn Sanskrit, as a tutor at home, whenever he gets liesure.

The other way to popularise Sanskrit by adopting modern scientific achievements is to visualise Sanskrit education through television and movies. As regards the ordinary people to maintain

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषये टेलिविषन् सम्पादनं ननु सङ्कुलः प्रश्नः स्यात् । किन्तु चलच्चित्र-माध्यमं नितरां सरलम् । तस्य परिधेः व्यापकता तु अतिविपुला । अपि चायं मार्गः साधारणजनान् प्रमाणाधिकमाक्रष्टुं च शक्नोति ।

संस्कृते भारतीयपुराणान्यवलम्ब्य अस्माकं महाकविभिर्विरचितानि बहूनि नाटकानि सन्ति खलु । सिनिमाशालाप्रचालनार्थं आवश्यकैरावापोद्वापैः सह यदि वयं तानि चलच्चित्रात्मकतया विपरिणमयेम तर्हि लोके न कुत्रापि अधुना भाष्यमाणायां अपरिचितायां भाषायां आविष्कृतान्यपि तानि नियतमेव सार्वलौकिकमंगीकारं लप्स्यन्त एव, यतः चलच्चित्रेषु संभाषणं न खलु प्रश्नः परिणंस्यति । अत्र तु सिनिमायां यवनिकासु प्रतिफलतां नटानां प्रतिच्छायानां केवलं चलनैः भावस्फुरणैश्च कथामवगन्तुं शक्यते । सर्वथा अस्माकमपरिचितासु विविधासु भाषासु आविष्कृतानि चित्राणि वयं प्रायः समीक्षामहे । तथापि तान्यास्वदितुं आवश्यककथाधारां वयमवगन्तुं शक्नुमः । अथ च संस्कृत नाटकानां कथावस्तु भारतीयानां यथाकथञ्चित् परिचितं स्यात् यतः प्रायशः

---

a television set will be a problem. But the medium of movies is very easy and it has wider scope and also it can attract the people of all kinds in large scale.

In Sanskrit we have got a lot of dramas written by our great poets based on Indian epics. If we bring them into movies with necessary adaptations to suit the theatres it will definitely receive universal welcome; though it is produced in a strange language which is being spoken no where in the world. For, in movies dia-logue is not a problem. Here, in cinema, to a large extent, the theme can be comprehended by mere movements and expressions of the cast in screen. We see the pictures produced in different languages completely strange to us. Still we follow the sequence of the stories so much as to appreciate them. Moreover, mostly the plots of Sanskrit dramas are, in some or other way, familiar to Indians, since almost all of them are adaptations of the Indian epics.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वाण्यपि तानि भारतीयपुराणेभ्यः रूपान्तरीकृतानि सन्ति। अतः सामान्य-जनः तानि नाटकान्यवलम्ब्य संस्कृतभाषायां आविष्कृतान्यपि चित्राण्यास्वदितुं विनैव क्लेशं शक्ता भविष्यन्ति। क्रमशः संस्कृतभाषणानि तत्तत् सन्दर्भस्य नटानां चेष्टया भावप्रकटनेन च सुग्रहाणि भविष्यन्ति।

संस्कृतनाटकानां रूपान्तराधनरूपा यवनिकानाटकरचना नाम काचिद् वैदग्ध्यापेक्षिणी कला। अस्मिन् विषये भासकालिदासादयो महाकवय एव मार्गदर्शकाः। कथावस्तुघटनायां निर्मीयमाणचित्रस्य स्वभावमनुसृत्य व्यतिया-नमावश्यकमिति ते उपदिशन्ति। यदा महाभारते शकुन्तलोपाख्यानेन सह अभिज्ञानशाकुन्तलस्य तुलना क्रियते तदा अनेकानावापोद्वापान् तत्र वयं पश्यामः। महाभारतादय इतिहासाः श्रव्यकाव्यविभागतया परिगण्यन्ते। अधोनिर्दिश्यमानान् विषयानवलंब्य दृश्यकाव्यात् श्रव्यकाव्यं विभिन्नं भवति। श्रव्यकाव्ये पदानां सङ्केतमाश्रित्यैव आशया आविष्क्रियन्ते। काव्यं तु अन्धोऽपि आस्वदितुं प्रभवति। एवं नाटकं बधिरेणापि अस्वदितुं शक्यम्।

So ordinary people will, without much difficulty, be able to appreciate the pictures though produced in Sanskrit dialogues based on such dramas. Gradually Sanskrit dialogues could be comprehended by the help of contexts, movements, expressions and so on.

To prepare the screen-plays as adaptation of Sanskrit dramas, is a skillful art. In this respect our great poets like Bhaasa and kaalidaasa are our venerable guides. They have taught us that according to the nature of production, necessary alterations can be made in the structure of the plot. We see various omissions and additions in Abhijnaana Saakuntalam when we compare it with the Saakuntalopakhyaanam in Mahaabhaaratham. The epics like Mahaabhaaratham are counted in the category of the audio literature. The audio literature is differentiated from visual literature based on the following aspects. In the former, the ideas to be conveyed are presented by the words as their symbols while in the latter those are directly represented by gestures. A poem can be appreciated by a blind and a drama can be appreciated by a deaf. Hence

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतः इदं व्यक्तमेव यद् नेत्रैरास्वदितुं शक्या हावभावाभिनयादय एव प्रायः नाटकेषु आस्वादनमाध्यमं भवति। अत्र तु सामाजिकैः वीक्षणद्वारा यदास्वाद्यते तस्य श्रव्यांशः केवलं सहायो भवति। किन्तु अत्र विषये चलच्चित्राणि अतोऽप्यतितरां प्रगतिमवापुः। चलच्चित्रेषु श्रव्यांशः अतितरां अल्पीभवति। अथापि चित्रस्य कथाधारां अवगन्तुं वयं शक्नुमः यतः नाटचचलनादय एव तत्र विकाराणां विचाराणां च माध्यमा भवन्ति। केवलं ह्रस्वानि उचितानि चटुलानि च कतिचन भाषणान्येव चलच्चित्रेष्वावश्यकानि। मूलकथानां यवनिकानाटकात्मकतया परिवर्तने इदं वस्तु सम्यगवलोकनीयम्।

चलच्चित्रविषये यवनिकानाटकरचना, निर्देशः, निर्माणं चेति त्रयं सर्वप्रधानं भवति। एतैः घटकैः सह नटानां स्थानं न कदापि तुलयितुं योग्यम्। ते प्रेक्षकगणस्य निर्मातृगणस्य च मध्यस्था भूत्वा आशयान् चक्षुर्ग्राह्येषु उचितेषु रूपेषु परिवर्त्य कथाया व्याख्यातारो भवन्ति। अतः ते केवल व्याख्यातारः परिगण्यन्ते।

---

it is clear that in drama the medium of appreciation is mostly gestures which can be comprehented by eyes. Here the audible aspect simply helps the visual comprehension of the audience. But in this aspect the movies have advanced still further. The audible aspect is considerably reduced in movies. Still we can follow the sequences of the story of a picture because the main conveyer of ideas and emotions in it is mere movements and expressions of the cast. Only short, apt and alert dialogues are needed in movies. In adapting the original text into screen-play this fact must be observed.

As regards a picture, preparation of screen-play, direction and production are most important. The importance of actors cannot be compared with these factors. They, being the media between producers and spectators interpret the story changing in to apt and visible forms. So they can be considered as interpreters.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुराणेषु रसभावादीनां प्राधान्यं नास्ति। तेषु प्रधानोंऽशस्तु आध्यात्मिकमूल्यान्याधारीकृत्य संभवानां सरलतया विवरणमेव। पुराणकथानां पाठकाः शब्दमाध्यमद्वारा कथापात्राणां सङ्कल्परूपास्वादमात्रेण तृप्यन्ति। नाटकविषये न तथा। तत्र श्रवणं नयनं च जागरूकं वर्तेते। सामाजिकाः नयनद्वारा कथापात्राणि प्रत्यक्षमेव पश्यन्ति। एवं च अधिकेन्द्रियसन्तर्पकत्वात् साहित्यमूल्यानां प्राधान्याच्च पुराणेभ्यः तथा तादृशेभ्यः श्रव्यसाहित्यग्रन्थेभ्यः नाटकानि विशिष्टानि भवन्ति। एवं च तानि जनानां अधिकमाकर्षकाणि च सम्पद्यन्ते। अत एव पुराणेषु दृश्यमानाः कथाः न तथा जनानाकर्षन्ति। ते एव आवापोद्वापैः सङ्कोचविकासैश्च दृश्यरूपं प्राप्ताः जनानधिकमाकर्षन्ति। रूपकेषु (दृश्यसाहित्येषु) नयनं श्रवणं च सममेव जागृतः। यद् श्रवणेनास्वदितुं न शक्यं, तद् नयनेनास्वाद्यते। यथा मृच्छकटिके संवाहकः (द्यूतेच्छाविकारसंवरणं बहुविधं कृत्वा) इति निर्देशे विकारसंवरणं श्रवणेनास्वदितुं न शक्यते। आङ्गिकाभिनयः नयनेनैवास्वाद्यते।

In epics there is no importance of poetical values like **Rasa, Bhaava, Alankaara** etc. The main aspect in it is to narrate only events in plain on the basis of spiritual values. The readers of epics become satisfied with the imaginary comprehension of characters through the medium of words. As regards the dramas, it is not so. There, both the eyes and ears become alert and the audience perceive the characters directly through eyes. So, because of satisfying more senses and because of giving importance to the poetical values drama is distinguished from audible literature like epics and other similar works. And so, it becomes attractive to the people. It is why the original texts in the epics seem to be not so attractive and the same being dramatised by necessary omissions and additions and curtailing and expanding the theme, more attract the people. In **Mrichakatika** there is a suggestion as follows: (**Samvaabaka**, controlling his burning dasire for gambling). Here control of emotions cannot be grasped by ears. Actions can be appreciated through eyes.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"जानामि न क्रीडिष्यामि
सुमेरुपतन सन्निभं द्यूतम् ।
तथापि खलु कोकिलमधुरः
कत्ताशब्दो मनो हरति ॥"

इत्येतत् श्रवणद्वारा आस्वाद्यते। तथैव शाकुन्तले "शकुन्तला (सभ्रूभंगम्)" इत्यत्र भ्रूभंगो नयनेनैवास्वाद्यते। "किं निमित्तम्" इति श्रवणेन च। तथा नाटके वाचिकस्याङ्गिकस्य च समप्राधान्यं विद्यते। केषांचन आङ्गलचलच्चित्राणां सञ्चालनकालः प्रायः शतं निमिषाः स्युः। किन्तु तेषां समस्तमपि वाचिकं भाषणं द्वित्रेषु पत्रपुटेषु संग्रहीतुं शक्यते। आङ्गलं सर्वमपि अनुकरणीयमिति न मेऽभिप्रायः। चलच्चित्रस्य वाचिकाभिनयावकाश आङ्गिकाभिनयावकाशादपि ह्रसीयानिति विशदयितुमेवात्रैतदुक्तम्।

आख्यायिकानां रूपकरूपाधाने यादृशाः व्युत्क्रमाः कविभिः कृतास्तादृशाः चलच्चित्रोपयुक्ता अवसरोचिता व्युत्क्रमाः कुहचन कुहचन यवनिकानाटक-

---

"I determined that I would never gamble again. It is a fall from Sumeru mountain. Still the sound of dice charms me like a cuckoo's song".

This stanza can be appreciated by only ears. Likewise in Saakuntalam "Sakuntala (knitting her eye-brows)". This frowning can be appreciated by only eyes and again: "Why it is?" This can be appreciated by only ears. Thus in drama both audible and visual aspects have equal importance. But in cinema the audible aspect is not important. There, actions and movements are importent. The total running time of some English pictures comes to nearly 100 minutes. But their dialogues can be copied in two or three pages of fullscap paper sheets. Here it is not meant that every thing from western is worthy of being imitated by us. It is only to show the fact that in cinema the dailogue is less important than movements.

Like the diviation done by our famous poets for dramatisation of epical stories, some modifications will have to be adopted for

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

रचनायामपि स्वीकरणीयाः स्युः। नाटकापेक्षया अवतरणविषये चलच्चित्र-प्रदर्शनस्य नितरां स्वातन्त्र्यमस्ति। नाटकादिषु परिच्छिन्न एव रङ्गे कानन-नदीपर्वतस्वर्गनरकादीनां प्रदर्शने न विजयं लभन्ते। अभिनय एव तत्र शरणम्। तत्तच्चित्राङ्किताभिः यवनिकाभिः तत्तद्दृश्यानां प्रदर्शनमपि क्रियते यथासौकर्यम्। तथापि प्रदर्शयितुमभीष्टस्य वस्तुनः प्रेक्षकाणां मनसि प्रबोधने नाटककला न पूर्णं विजयते। हिमालयस्याङ्कात् गङ्गायाः सोल्लासप्रपातस्य, समुद्रेण नौकायानस्य यन्त्रशालाया विविधभागप्रदर्शनस्य वा अनुभूतिमुत्पादयितुं निपुणोऽपि नटः न शक्तो भवति। एतानि चलच्चित्रे प्रदर्शयितुं सुशकानि। आख्यायिकासु तु साऽनुभूतिः शब्दैः साध्यते वर्णनेन। रूपकाणां एतद्विषये परिमितिः पारतन्त्र्यं च विद्यते।

अद्यत्वे तु चलच्चित्रनिर्माणे सामान्यतः प्रधानं स्त्रैणसौन्दर्यप्रदर्शनं पुरुषाणां मुष्टियुद्धादि पौरुषप्रकटनं च। वस्तुतः चलच्चित्रेषु तत् सर्वथा न स्वीकरणीयं, न साकल्येन परिहरणीयं च। कुत इति चेत्, मनुष्यकथा विविधैरुपाधि-

---

changing dramas into cinema also. Comparing with dramas cinema has more freedom in presentation. Due to the limitations of stage the dramas do not be successful in adequately showing the forests mountains and the similar parts of nature. we have to resort to action there. According to the context and convenience, screens portrayed with particular sceneries are arranged. Even then the dramatic art will not be fully successful in completely recalling the particular thing to the spectators' mind. Even a skillful actor will not be able to create an impression of the joyful fall of the lean Ganga from the lap of Himaalaya, sailing of ships in ocean, various sections of a factory and so on. These can be easily shown in cinema. In audiable literature such impressions can be created by description. Considering this aspect, dramatic art has much more limitations and restrictions comparing with cinema.

Nowadays in the production of movies the most important aspect is to exhibit the valour of men by boxing and to expose "beauties" of women by some special scenes. In fact, in cinema such scenes are not to be completely welcomed and not to be

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भिराविष्कृतवन्तः सर्वेऽपि कलोपासकाः 'स्त्रैगसौन्दर्यं' प्रदर्शनं तत्तदवसरानुसारं कृतवन्तः । शाकुन्तले "अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रितास्मि, शिथिलय तावदेनम् ।" इति शकुन्तलाया अभ्यर्थनं अनसूयाकृतं वल्कलशिथिलीकरणं च किमर्थं क्रियते ? शकुन्तलायाः 'सौन्दर्यं' दर्शयितुमेवेति व्यक्तम् । किन्तु उचित एवावसरे कालिदासेनैवं वर्णितम् । प्रथमाङ्के "अधरः किसलयरागः" इत्यादिना वर्णिता शकुन्तला सप्तमाङ्के "वसने परिधूसरे वसाना नियमक्षाममुखी" भवति । अतः अवसरोचितं सभ्यतायाः सीमानमनुल्लङ्घ्य तादृशानि दृश्यानि यथा अस्माकं पुराणकविभिः प्रदर्शितानि तथा अवतारयितव्यानि ।

किन्तु अद्य सिनिमाशालासु प्रचाल्यमानेषु चित्रेषु भूयिष्ठं एतद्विवेकरहितमेव सन्दृश्यते । अवसरोचितो वा नवा भवतु, कथमपि कस्य अपि प्रवेशस्यावसरः सृज्यते । नृत्यरंगः, स्नानरङ्ग इत्यादयो विविधा उद्वेगजनका रङ्गाः अनुबध्यन्ते । एतद् वैचित्र्यमवलम्ब्यैव सिनिमाशालासु चलच्चित्रं आमासं प्रदर्श्यते । तथैव तस्य वैशिष्ट्यं च निश्चीयते । इदं तु नैवाशास्यम् ।

---

completely avoided. Because, all artists who pictured human life with wide outlook in different media have exposed woman's "beauties" in various ways. See in Saakuntalam. Sakuntala requests Anasooya thus "O Anasooya, I have been curbed by Priyamvada with the bark too tightly tied up. Please loosen it." Accordingly Anasooya loosens it. What does mean by this loosening? It is clear that it is inserted to expose Sakuntala's beauty. But it is done' in apt context. In the first act of Saakuntalam, Sakuntala is pictured as a beautiful girl in teenage; "the lip is red as tender leaf etc." The same Sakuntala appears in the last act as a pious lady "wearing grey cloths........" So according to occasions, within the limitation of decency, we can introduce such scenes as shown by our ancient poets.

But in most of the pictures run in the theatres today, we do not see this discrimination. Whether it suits the occation or not, a woman character is introduced and without counting suitability of the occasion some awkward scenes are inserted. Based on this aspect, a picture runs for even months in theatres and its merit is judged by the people. It is not desirable.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जनाः विभिन्नविधाः । तेषां जीवितं विभिन्नदशाभिः विभिन्नैः तात्पर्यैश्च विभक्तम् । अतः यदि वयं संस्कृतं सिनिमामाध्यमेन प्रचारयितुमभिलषामः तर्हि अद्यतनयुगे वर्तमानानां जनानां अभिरुचिमधिकृत्य बोधवन्तो भवेम । केषांचन यतीनां धार्मिकप्रभाषणावसरेषु तेषामधरेभ्यः बहिर्निर्गलन्ती काचन भाषा नैव संस्कृतमित्यस्माभिरवधेयम् । जननात् प्रभृति मरणपर्यन्तं मनुष्य-समुदायस्य सर्वमपि अस्यां भाषायामन्तर्भवति ।

केषांचन विज्ञापनानां संचयनादुपरि सामान्यजनानां मनोविनोदनार्थं स्थापितानां ग्रन्थशालानां सिनिमाशालानां च परस्परमस्ति महदन्तरम् । सिनिमाशाला बहुसंख्यं मानुष्यकमाकर्षति । अतः संस्कृतं चलच्चित्रं निर्मातुं यदा वयं व्यवस्यामः तदा जनानां तर्पणविषये अस्माभिः सावधानैः भवितव्यम् । किन्तु सभ्यतायाः सीम्न्येव वर्तितव्यम् । मातापितरौ आपन्नवयोभिः पुत्रैः सह यच्चित्रमवलोकितुं न सङ्कुचेयुः तादृशं चित्रमेव सभ्यताविशिष्टमित्यनेनात्र विवक्षितम् ।

People are of different types and their life is devided into various stages and interests. So if we want to popularise Sanskrit through the medium of moveis we should be aware of the interest of the people of modern age. We should be aware that Sanskrit is not a language which comes out of the lips of a few preachers and Brahmin Priests on certain occasions of spiritual talks and performances. The language comprises all aspects of human beings from the birth to the burial.

There is vast difference between a library and theatre though both are set to serve the same purpose of entertainment of public apart from gathering some informations and knowledge. Theatre attracts the public in large number. So, to satisfy all kinds of people, we should be careful when we produce a picture in Sanskrit. But it must be within the limitation of decency. The word 'decency' can be attributed to a picture to see which alog with their grown up children parents do not feel hesistent, can be considered as produced in decency. It is the definition of the word 'Decency' here.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यवनिकानाटकरचयितुः क्षमाया औचित्य बोधस्य च कुहचन कुहचन परीक्षणावसराः समापतन्ति । कविना आख्यायकेन वा आविष्कृतानां अमूर्तानां भावानामाविष्करणविषये यवनिकानाटककृता सर्वथा जागरूकेण भवितव्यम् । शाकुन्तलं कालिदासो रचितवान् । तदेव नाटकं यवनिकानाटकरूपेण परिवर्त्यते चेत् स एव महाकविः स्वनाटकरचनातोऽपि शतगुणं क्लेशमनुभवेत् । उदाह्रियते ।

इदं किलाव्याजमनोहरं वपुः
तपः क्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥

महर्षेः इयं विवेकशून्यता यवनिकानाटकानुरूपं मूर्तीकर्तुम् नैव शक्यम् । एतादृशेष्ववसरेषु यवनिका नाटककृद्भिः स्वप्रतिभामुपयुज्य अन्ये मार्गा मार्गणीयाः स्युः ।

There will be certain occassions to test the sense of propriety and patience of the screen-play writer. He must be particulary cotious about presenting emotions revealed by the poet or novelist based on whom the screen-play is prepared. Kaalidasa is the author of Saakuntalam. If the same author would venture to change the same poem into screen-play he would have to take much more effort than writing the same poem. For example: In Saakuntalam:

"The sage who wants to make this artlessly
beautiful body suitable for Penance will venture
to cut SAMIT with the edge of water-lily"

This imprudence of sage cannot be made solid suitable to screen-play. On such occassions a screen-play writer will have to resort to some other way excercising his resourcefulness.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

अद्यतनशिक्षापरीक्षयो रीतिः, वृत्त्यर्थं कर्मकराणां निर्धारणं च न केवलं निर्मूलकं किन्तु निरर्थकं च। वर्तमानमानुष्यकस्य आत्मीयभौतिकांशयोः सर्वतोमुखाभिवृद्धिविषये इयं शिक्षारीतिः साकल्यतः पराजयमवाप्ता। यस्यास्ति अल्पं विज्ञानं अधिकमज्ञानं च स नरः स्वकर्मणि निपुण इत्यस्माभिः परिगण्यते। पश्यत – कस्मिन्नपि विषये योग्यतासम्पादनार्थं ४० प्रतिशतं अङ्का आवश्यकाः। तस्य तात्पर्यं तु एवं फलति। कस्मिन्नपि विषये ६० प्रतिशतं यस्य अज्ञानमस्ति स तस्मिन् विषये योग्यतासम्पन्न इति। इयं बुद्धिशून्यता चिरात् शासनेन बाढमनुस्रियमाणो नियमः सञ्जातः। इयं रीतिस्तु कार्यालयेषु वृत्तिं लब्धुं पर्याप्तैव। किन्तु समाजस्य स्वस्य वा प्रयोजनार्थं मानवं रूपवत् कर्तुम् इयं रीतिः न केवलं अपर्याप्ता किन्तु समाजस्य क्षतिकरी च। पाठ्यक्रमः, अध्यापनप्रकारः परीक्षारीतिः, वृत्तिषु नियमनं इत्यादि शिक्षाविषयेण संबद्धाः सर्वेऽपि मौलिकं परिणाममपेक्षन्ते।

THE GIST

Present system of education and examination and the method of selection for job are not only baseless but worthless also. The nature of study has completely failed in the overall development, both spiritual and meterial, of this generation. We recognize a student, who obtains less knowledge and more ignorance, as qualified for his profession. See, to become qualified in a subject, one has to score only 40% of marks. That means, one who has 60% of ignorance in the particular subject, is declared as proficient in the field. This nonsense has become a rule which is strictly followed by the government, long since. Such a system is enough to get jobs in offices. But to mould a man useful for himself as well as for the society, this system is not only inadequate but harmful also. The syllabus, mode of teaching, examination, appointment and all that related to the education, require a radical change.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षाया उज्जीवनम्

शिक्षायाः प्रधानभूतौ द्वावंशौ अधुनाऽस्माभिः प्रणष्टौ। एक आत्मीयः अन्यो भौतिकश्च। उदाहरणेन स्पष्टीक्रियते। कुत्रापि कक्ष्यायां अध्ययनार्थं रामायणं पाठ्यग्रन्थतया निर्धारितमिति भावयामः। परीक्षायां कृच्छ्रतः पञ्चत्रिंशदङ्कान् लब्धुं पर्याप्ता आशयबिन्दव एव छात्रस्यावश्यकाः। स रामस्य सीताया वा स्वभावगुणान् स्वजीविते सात्मीकर्तुम् अथवा अनुसर्तुम् नाभिलषति। आधुनिकविद्यालयेषु तादृशी अध्ययनरीतिः अध्यापनपद्धतिर्वा नावश्यकी। परन्तु अवगण्यते च। अतस्तेषां विषये रामः सीता च परीक्षायां ३५ प्रतिशतं अङ्कानार्जितुमावश्यकं किमप्युपकरणमेव। एवं साहित्याध्ययनमतितरामन्तस्सारशून्यं परिणतम्। अपिचात्र अस्वादनादधिकं अपप्रथनस्य प्राधान्यं

Revival of Education

We have lost two vital aspects of our education. One is spiritual and the other is material. For example, suppose, Ramayana is prescribed as text book for a course of study; the student needs only a few points to score minimum 35% of marks in his examination. He does't want to follow or assimilate qualities of characters like Sreeraama and Seeta in his life. In present educational institutions such a system of learning or method of teaching is required, but ignored. So in his view Raama or Seeta is a mere instrument for scoring 35% of marks in the examination. Thus, the study of literature becomes very cheap. Moreover, since it gives muchmore

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

परिगण्यत इति हेतोः अध्ययनं केवलं बाह्यमेव विधीयते। एवं शिक्षाया आत्मीयोंऽशः प्रणष्टः।

भौतिकांशस्य दशाऽप्यवलोक्यताम्। अद्यतनशिक्षारीतौ सोऽप्यवगणितः सञ्जातः। भविष्यजीवितयापनार्थं नरं पर्याप्तं कर्तुम् विकस्वरे वयसि समारब्धुमावश्यकं परिशीलनमेव वस्तुतोऽस्माभिः शिक्षया समुद्दिष्टम्। समाजक्षेमाय पौराणिकधार्मिक मूल्यान्यनपहाय आधुनिक शास्त्रीय सिद्धीर्विनियोज्य च स्वतन्त्रतया जीवनार्थं क्षमताधानमेव तस्य परिशीलनस्य स्वभावः खलु। भौतिकमिति पदेन एतावदेवात्र विवक्षितम्। एतल्लक्ष्यप्राप्तये अधुना प्रचाल्यमाना शिक्षा नैव पर्याप्ता। आधुनिक शिक्षारीतिमनुसृत्य उपात्तविद्यो नरः पूर्वाधिकमसहायो भीरुः निराशश्च जायते। अतस्तदिदं व्यक्तमेव यदत्र परमप्रधानभूतौ शिक्षाया आत्मीय भौतिकांशौ साकल्यतः समुन्मूलिताविति।

एतयोः पुनरुज्जीवनमेव शिक्षायाः प्रथमं प्रमुखं लक्ष्यं भवितुमर्हति। प्राक्तनाचार्याणां पैतृकाणि सन्देशाश्च अस्माभिः प्रायः साकल्यतो विस्मृताः।

---

importance for the structural details than appreciation, it becomes superficial also. In this manner, the spiritual aspect of education is lost.

See the meterial aspect. It also is ignored in the system of present education. What we really aim at by education is to train a person in his blooming age to make him fit for his future life. The nature of training must be to enable him to live independently using modern scientific acheivements and adopting all our moral values for the welfare of the society. This is what we mean by the term material' here. To reach this target the present education is insufficient. A person who is brought up in modern education, becomes, more helpless, cowardly and disheartened. So it is clear that the most important aspects of education-spiritual and material-are completely rooted out from it.

Revival of both these, aspects must be the first and foremost aim of our education. We have completely forgotten the messages

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पौराणिक भारतीय साहित्येष्वेव उदात्तानामुदाराणां नराणां विविधानि निदर्शनानि संलक्ष्यन्ते इत्येतत् सार्वलौकिकतयाऽभिमतं वस्तुतत्त्वम्। तेषां महात्मनां चैतन्यं संस्कारं चावगणयितुमेव वयमधीयामहे। ये नाम सामान्यजनान् विविधमनायासं चाक्रष्टुं प्रभवन्ति तेष्वनवगाहेषु प्रचोदनविरलेषु पाश्चात्यपरिष्कारेषु भ्रष्टबुद्धयो वयं वर्तामहे। अतोऽस्माकं जीवितं कृत्रिमं क्षुद्रं च सञ्जायते।

<u>प्रयत्नानां पराजयः</u> राष्ट्रसम्पत्तेः भूयानंशः शिक्षार्थमेव व्ययीक्रियते। तत्तद्विषयेषु विदग्धैः समायोजिताः पाठपद्धतीरनुसृत्याधीयानाः छात्राः विकस्वरे वयसि प्रायः पञ्चदशवत्सरान् विद्यालयेषु यापयन्ति। किन्तु ते स्वकीयान् नैसर्गिकानशेषानपि गुणाननुसृज्य विद्यालयात् प्रतिनिवर्तन्ते। ते समाजस्य केवलं भारभूताः परिणमन्ति। अधीते विषये पुनरपि परिज्ञानमार्जितुं ते न प्रयतन्ते। न कोऽपि तं नियन्त्रितुं प्रभवति। स स्वगृहस्यापि द्रोहमादधानः स्वयं नश्यति। एते न विद्यालयाः। अत्र नाचार्याः सन्ति। न च सन्ति शिष्या अपि। राष्ट्रसम्पत्तेः

---

and heritages of our ancient teachers. The fact is universally accepted that various kinds of noble and generous patterns of mankind are in Indian classics. We are tought to ignore the spirit and culture that they contain and to be mad after a shallow and less inspiring western civilization which easily attract the commoners in various ways. Hence our life became artificial and slightened.

<u>**Failure of attempts**</u> A major portion of the revenue of the country is spent on education. A student spends about fifteen years of his blooming age studying in educational institutions according to the syllabi prepared by the experts in the field. Still the student comes out of the school losing all his inborn qualities and becomes a white elephant in his society. He does not attempt to gain even a little extra knowledge in his subject. None is there to control him. He grows to be a nuisance to his house. These are not educational institutions. There are no teachers here. No students here.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भूयांसमंशं क्षपयितुं समाकलितानि कतिचन प्रहसनान्येव सर्वाणि । एतत् सफलं कर्तुम् किमपि समग्रं परिवर्तनमत्यावश्यकमेव ।

परिवर्तनं कथं स्यात्? अल्पेन व्ययेन अधिकफलं शिक्षाप्रदानमेवास्य मुख्यो मार्गः । तदर्थमस्मच्छिक्षारीत्या सुदृढं संबद्धानां परम्परागतानां केषाञ्चन मूढविश्वासानां निराकरणमनिवार्यमेव । आजन्मसिद्धानां गुणानां वृद्धौ प्रतिबन्धकाः निरर्थका अन्धाः विद्रोहकाश्च बहवः सम्प्रदाया अद्य प्रचलन्ति । ते नरं न सुशक्तं तन्वन्ति, किन्त्वशक्तमातन्वते । पश्यत बुद्धिशून्यताविलासानस्माकम् । अद्य सर्वासामपि वृत्तीनां उपलब्ध्यर्थम् प्रमाणपत्रमावश्यकं खलु । यदि शासनाधिकृताः क्षुरकवृत्तौ नियुक्त्यर्थं केषाञ्चन क्षौरिकाणामामन्त्रणं कुर्युः तर्हि तैः काचित् क्षौरिकपरीक्षा प्रचाल्येत । अस्तु, तदस्माकं सम्मतमेव । किन्तु तत्परीक्षाप्रवेशनार्हता तु S. S. L. C परीक्षामुत्तीर्णवतामेव स्यात् । तदैव स क्षौरकर्मणि समर्थो भविष्यतीति ते शासति । एतादृश्यां मूढसभ्यतायां वयमधुना बहोः कालात् समापतिताः स्मः । ईदृशी बुद्धिशून्यता नियतमुन्मूलनीया । इतर-

---

These are mere farce to dissipate a large portion of revenue of the country. An ultimate change is essential, if it is to become useful.

How to change it? To impart more fruitful education with less expenditure is the only way for it. For this purpose we have to abandon certain traditional beliefs which are inseparably stuck to our education. Many meaningless, foolish and harmful systems that obstruct the growth of one's inborn faculties, are prevailing in it. They do not strengthen but weaken him. See the nonsense. All kinds of service need a certificate. Now we have reached such a standard of civilization that if the government wants to recruit some barbers, it will conduct a test for them and the minimum qualification required to appear for the test will be S. S. L. C. Then only he will be qualified for hair cutting. This is what actually happens today. Such nonsenses are to be uprooted. The authorities

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषयानपेक्षं स्वाभिरुचिते विषये शारीरिकान् मानसिकान् तथा वैयक्तिकान् आजन्मसिद्धांश्च प्रभावान् परिपोषयितुं तत्तदधिकारिभिः छात्रेभ्योऽवसरः प्रदेयः। कश्चन शास्त्रविषयेऽवतीव तत्परः स्यात्, मानविकविषयेषु विमुखश्च स्यात्। तादृशाः छात्राः अद्यतनव्यवस्थामनुसृत्य परीक्षामुत्तरीतुं न पारयन्ति। यतः स मानविकविषयेषु पराजितो भवति। ईदृशी व्यवस्था प्रायशः धिषणाशालिनोऽनेकान् छात्रान् निराशान् तनुते।

<u>परीक्षाप्रहसनेनालम्।</u> विद्यालयेषु अद्य प्रचाल्यमानाः परीक्षाः केवलमौपचारिकेषु वार्षिककार्यकलापेष्वन्यतमाः सञ्जाताः। परीक्ष्याः परीक्षकाश्च गौरवदृष्ट्या ता न वीक्षन्ते। यत् किञ्चिद्विलिख्यापि परीक्षामुत्तर्तुम् शक्यमिति छात्रा विश्वसन्ति। उत्तरमुचितं सुष्ठु वा न वाऽस्तु, स्थाने वा न वाऽस्तु, इयत् प्रतिशतं परीक्ष्या उत्तारयितव्याः इति मूर्खता अधुना नियमः सञ्जातः। नास्माभिरीदृश्योऽनीतयः अन्यत्र कुत्रापि द्रष्टुं शक्यते यादृश्यः परीक्षाविषये। जीर्णतायाः सकलान्यपि लक्षणान्यत्र लक्ष्यन्ते। तासां नवीकरणं कृच्छ्रसाध्यमेव।

---

must provide occasions and chances to the students to develop individual, inborn, intellectual and physical faculties in his field without depending on other subjects. Suppose one is very brilliant in science subjects but very poor in humanities, he has no chance to shine. in the prevailing system, because he fails in humanities. The system genarally disheartens a lot of brilliant chaps.

<u>**Stop the farce of exam.**</u> The examinations that are conducted in schools and colleges today, have become one among the formal routines. Both the examiners and examinees do not take them serious. Students are fully confident that whatever they may write, they will pass the examinations. Answers may be right or wrong, certain percentage of students must be promoted. This nonsense became a rule here. No other malpractices can we see than that are prevailing in the system of education today. we can see all symptoms of decandence in it. To revive it is impossible now. We should boy-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतादृश्या रीत्या छात्राणां बुद्धिशक्तेर्मापनरीतिरस्माभिर्वर्जनीयैव। अस्मिन् विषयेऽत्र निर्दिश्यमानं परिवर्तनं वर्तमानरीत्या परीक्षासंयोजनादपि सफलं भविष्यति। तत्तु पश्चाद्वक्ष्यते। अत्रतु वर्तमानपरीक्षाणां वन्ध्यत्वस्य किमपि स्पष्टमुदाहरणं प्रदीयते। उद्योगार्थिनां नियुक्त्यवसरेषु सर्वा अपि संस्थाः पृथक् पृथक् स्वस्व मतानुरूपं परीक्षाः समायोजयन्ति। विश्वविद्यालयेन सर्वकारेण वा प्रदत्तं प्रमाणपत्रं ते संस्थाधिकारिणो न गणयन्तीत्यस्य सुव्यक्तमिदमुदाहरणम्। विद्यालयेषु बहून् वत्सरानधीतवानपि छात्रः कस्यामपि संस्थायां कर्म कर्तुम् नार्हो भवतीत्येतत् तथ्यमेवास्माद् व्यक्तीभवति।

<u>अमृतमपि विषायते।</u> अमृतमपि यदि प्रमाणाधिकमुपयुक्तं, विषं सम्पद्यते। केवलमक्षरपरिज्ञानमात्रं नैव शिक्षा भवितुमर्हति। नरस्य जीवनयापनोपयुक्तं सर्वमपि परिशीलनं तत्रान्तर्भवति। शासनेन समाजेन चेदं वस्तुतत्त्वं ज्ञातव्यमेव। यद्याङ्गली अधीता वृत्तिर्निश्चितैव इतीदृशः कश्चन कालः पूर्वमासीत्। तदा अक्षरपरिज्ञानमेव शिक्षा आसीत्। किन्तु अधुना तु शिक्षा न तादृशी।

---

cott such method of measuring intelligence of students in this way. We should introduce some essential changes which would be more effective than conducting examinations. It will be explained later. Now let us take a clear evidence for impotency of the present examination. Every establishment conducts its own tests when it recruits candidates for service under it. It means, they do not recognise the certificates awarded by the Government or universities. From this, it is clear that one who spends a number of years for study in schools and colleges is unfit for any service in any establishment.

<u>**Even nectar will be poisonous.**</u> If excessively used, even nectar will be poisonous. Education does not mean mere literacy. It is a training for one's sustenance. Both the Government and the public must be aware of this fact. There was a time when one who learnt English, would get a job. Then mere literacy was the education. But now it is not so. Now we want such an education in which

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यथा अस्माकं मानसिकी शारीरिकी च शक्तिः जीवितं ससुखं नेतुं संस्कृता सुशक्ता च भवेत् तादृशीमेव शिक्षां वयमधुना आद्रियामहे। आधुनिकशिक्षासंबद्धानां सर्वासामपि विचारधाराणां एतद्विषये परिवर्तनं कार्यमेव। पाठपुस्तकैः अध्यापनटीकाभिः प्रभाषणैश्च चिरपरिचितोऽध्यापकः स्वक्षेत्रे एतादृशं परिवर्तनं न सहेत। किन्तु परिणामनिध्नान् ईदृशान् दशाविशेषान् सम्यगवबुध्य तैः परिवर्तनविधेयैर्भवितव्यम्। अन्यथा सर्वा अपि शिक्षासंस्था आसन्ने भविष्ये सर्वासामप्यापदां विद्रोहाणां च केन्द्रीभविष्यन्तीत्येतदस्माभिर्द्रक्ष्यत एव। समाजस्यावश्यकानां विविधानां वस्तूनामुत्पादनक्षमं प्रायोगिकपरिशीलनमस्माकमावश्यकम्। तत्समानतया अक्षरपरिज्ञानमपि सम्पादनीयम्। भौतिकं सर्वथा अवगणय्य प्रचलन्ती अध्यात्मविद्येव उत्पादनपरिशीलनेन विनाभूतः केवलाक्षराभ्यासः समाजस्य शोषको भविष्यति।

<u>केवलकोलाहलः</u> "शिक्षा रचनोन्मुखी उत्पादनोन्मुखी च परिवर्तयितव्या' इति बहोः कालादारभ्य शिक्षाविदग्धानां निवेदनमस्माभिः श्रूयते। तेषां

---

all our faculties-both mental and physical-get trained and so developed as to enable us to live in our society. Those who are connected with the modern education must have a change of outlook in the matter. A teacher, who depends upon mere text books, teaching notes and lectures, will not like such changes in the field. Being aware of such facts they should subject themselves to change. Otherwise we will see that the schools and colleges will become a centre of all mischiefs and calamities in the near future. What we have to do urgently is to give equal importance to literacy as well as a training which will impart practical knowledge to us to produce all kinds of materials useful for living. Mere literacy is harmful for the society just like mere philosophy completely ignoring material life.

<u>**Mere hubbub**</u> Since a long time the educationists from top to bottom have been demanding that the education must be converted to be constructive as well as productive. According to their

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

निर्देशमनुसृत्य शिक्षासंस्थासु कतिचन व्यत्ययाः समायोजिताइव । किन्तु सर्वं व्यर्थमभूत् । कुत एतत् ? अयमेवात्र हेतुः । सर्वेऽपि शिक्षाविभागाः तत्संबन्धिनश्च तादृशां व्यतियानानां तत्त्वतो नाभिलषन्ति । सर्वमपि मृषाभूतम् । शिक्षां प्रति अस्माकं रूढमूला धारणा किलेदृशी । कापि सुदृढा शाला । आसनाद्युपकरणानि । विधेयताऽऽकुञ्चिता विशुद्धवेषधारिणः छात्राः आचार्याश्च । अधिकारिणां. विज्ञापनपत्राणि तेषामुत्तराणि च । अध्यापनटीकाः । भरणसंशोधना । परीक्षा । कक्ष्योत्तारणं । अधिकारिणां सर्वमपि निरर्थकवचनं सगौरवमाद्रियमाणाः कर्मचारिणः । वेतनपट्टिकासज्जीकरणं वेतनादानम् । एतन्मात्रमेव शिक्षाप्रचालनमधिकृत्यास्माकमभिप्रायः । नटसहस्रैः समुज्ज्वलं किमपि प्रहसनमिदम् सर्वम् । ईदृशशिक्षाया लक्ष्यशून्यतां निष्प्रयोजनतां चाधिकृत्य छात्रा अपि सम्यग् बोधवन्तः संवृत्ताः । शिक्षाया ईदृशीं रीतिमधिकृत्य पुनः पुनरप्यधिक्षेप्तुं वयं पारयामः । कस्तस्य परिहारः ? इति भवन्तः पृच्छेयुश्चेदत्र विव्रियते । वर्तमानशिक्षारीत्याः समग्रपरिवर्तनमेवास्य सफलः परिहारः । तस्य काचन रूपरेखात्र प्रदीयते ।

---

suggestions some changes have been introduced in educational institutions with no avail. why? It is why the department of education and all those related to the educational institutions are actually not willing for such changes. All are mere pretentions. Our concrete belief about the education is this:- A good building, furniture, teachers and students in neat dress and discipline, departmental, circulars and their replies, teaching notes, inspection, exams. Subordinates who take all nonsenses of their superiors very serious, preparation of pay bill, salary and so on. This is a farce in which thousands of actors take part. Even students are aware of the uselessness and aimlessness of such education. You may ask, "we can blame the system of education again and again. What is the remedy for it?" That also is to be explained here. The only remedy is a thorough change in present system the outline of which is given here.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

<u>रूपरेखा।</u> गणितं अन्ताराष्ट्रीयभाषां चान्तर्भाव्य अत्यावश्यकविषयाणां प्राथमिकपरिज्ञानं शिक्षायाः प्रथमदशायां पञ्चभिर्वर्षैरेव समासादनीयम्। ततो द्वितीयदशायां त्रयो वर्षाः संस्कृतमनपहाय मानविकविषयेषु शास्त्रविषयेषु च प्राथमिकविज्ञानसम्पादनार्थं नियोक्तव्याः। अस्यां दशायां व्यक्तिगतबुद्धिवैभववासनानुरूपं विभिन्नगणत्वेन छात्रा विभक्तव्याः। अथ तृतीयदशायां सर्वेऽपि विषयाः करस्पोण्टन्स् कोर्स द्वारा तथा लिंग्वाफोण् रीत्या एवाध्यापनीयाः। शास्त्रविषयाणां विषये शासनद्वारा अथवा पञ्चायत्-नगरसभादिप्रादेशिकसमितिद्वारा तत्तत्प्रदेशे परीक्षणशालाः सज्जीकरणीयाः। एवं विद्यालयाध्ययनम् अष्टभिर्वर्षैः परिसमाप्येत। शास्त्रविषयेषु उन्नत शिक्षार्थं तत्तद्विषयसंबद्धासु यन्त्रशालासु अनुबन्धतया अध्ययनविभागाः समायोजयितव्याः। यथा केमिस्ट्रीविभागः F.A.C.T यन्त्रशालाया अनुबन्धतया, फिसिक्स् विभागः H.M.T यन्त्रशालानुबन्धतया। एवमन्येऽपि।

<u>**An outline.**</u> First five years should be allotted for acquiring a primary knowledge in most essential subjects including arithmetics and one of the international languages. The next three years are to be allotted to obtain preliminary knowledge in humanities and science subjects including Sanskrit. At this stage students are to be classified as separate groups based on their individual merits and talents. There the school education should be stopped. Then, at the third stage, all subjects may be tought through correspondence course and lingua phone method. In case of science subjects for practical classes laborataries are to be arranged under the local bodies or the Government. Thus school education should be completed within eight years. For higher studies in science subjects, departments may be opened attached to respective firms. eg. For chemistry a department may be oppened in F. A. C. T. For physics in H M T. and so on. For humanities, to introduce correspondence course is more effective and convenient.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

करस्पोण्टन्स् कोर्स् । नानाविधानां धिषणाशक्तीनां दृढीकरणार्थमात्प्रायनार्थम् च करस्पोण्टन्स कोर्स नितरामपयुज्यते । अपि च अद्यतनानां छात्राणां मध्ये नष्टप्रायं प्रयत्नशीलं परिपोषयितुं च तदुपकरोति । अन्ये च कतिचन लाभाः करस्पोण्टन्स कोर्स् द्वारा सिध्यन्ति । तत्तद्विषयेषु निष्णातेभ्य आचार्येभ्यः अभीष्टानां विषयाणां अध्ययनाय छात्रा अवसरं लभन्ते । अर्हा एव छात्राः तत्तद्विषयेषु विकासमाप्नुयुः । आधुनिकविद्यालयेषु प्रायशो दृश्यमानां संघर्षदशामुत्पादयितुं सन्दर्भा न सम्पत्स्यन्ते । कोर्स् सञ्चालकानाम् आचार्याणां एकैकस्मिन् शिष्ये श्रद्धाधानं सुकरं स्यात् । किन्तु तैः सह प्रत्यक्षसम्पर्कस्यावसरो न संभवेच्च । अद्य परीक्षासु दृश्यमाना दुराचाराः सुसाधा न स्युः । परीक्षा इतोऽप्यधिकं फलप्रदा च स्यात् । अन्ते काचित् सर्वंकषा परीक्षा तु विदग्धानां समक्षं निर्वोढव्या । अपि च यावती राष्ट्रसम्पत्तिरधुना शिक्षार्थं व्ययीक्रियते तस्याः पादांशेनैव एतत् सर्वं निर्वोढुं शक्यते । सर्वमेतदतिरिच्य शिक्षायाः परिधिः पूर्वाधिकं विशालो भविष्यति । शिक्षा अन्वर्था च स्यात् । अत्र किमपि वस्तु विशिष्य प्रस्तोतव्यमास्ते । प्रथमदशात आरभ्य विविधेषु उत्पादन-

---

Effectiveness of home-study course. Home-study course (correspondence course) is very useful for improving and strengthening mental powers and also developing a habit of perseverance which the students of today have completely lost. Some other benefits also can be attained by correspondence course. Students will have chance to learn their interested subjects from experts in respective subjects. Only deserving ones will shine in the field. There will be no chance to create chaotic situation as we see in schools and colleges today. The teachers who conduct the courses, can pay individual attention to the students. At the same time there will be chance for personal touch with them. No chance for malpractices, as we see in examinations. Tests also will be more effective. An exhaustive test at last should be given in the presence of the experts. A quarter part of the amount, now we spend, will suffice to maintain all these things. Apart from all these, the scope of education will be wider and it will be real also. One thing is to be particularly mentioned here. Right from the primary stage,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्तनेषु छात्राः स्वस्ववयोऽनुरूपं नियोक्तव्याः । शारीरिकमानसिक कर्मणां मूल्येषु उत्तमाधमभावनां न जनयितुमाचार्याः श्रद्दधाना भवेयुः । जीवसन्धारणार्थं शारीरिको मानसिकश्च प्रयत्नः समप्राधान्यमर्हति । वर्तमानछात्रेषु तादृशी धारणा दृढमुत्पादनीया । इयं रीतिः भविष्यति काले सुशक्तां कामपि जनतामुत्पादयितुं प्रभविष्यति ।

उद्योगप्रश्नाः । अत्रान्यः कश्चन उद्योगसंबन्धी प्रश्नः समुदेष्यति । तमेवं परिहर्तुम् शक्यते । शिक्षायाः तत्तद्दशासु अवसिताध्ययनेभ्यः छात्रेभ्यः तत्तद्विद्यालयाधिकारिभिः अर्हतापत्रं प्रदातव्यम् । राष्ट्रस्यैकं कस्मिन् प्रान्ते स्वयंशासनाधिकारसहिता एकैका निर्धारणसमितिः समायोजनीया । व्यवसायशालानां धनागाराणां शासनस्य विविधविभागानां विश्वविद्यालयानां च प्रतिनिधयस्तत्र समित्यां अन्तर्भवितुमर्हन्ति । आवश्यकतानुसारमामन्त्रितानां तत्तद्विद्यालयेभ्यः प्रदत्तैः योग्यतापत्रैः सह समागतानां उद्योगार्थिनां कृते विविधाः परीक्षाः प्रत्यक्षमेव समायोजनीयाः । तासु सफलानां उद्योगार्थिनां कापि सूचिका सज्जी-

---

the children must be given various kinds of productive activities according to their age. Teachers should not create a tendency of any distinction between the values of physical and mental performance. Physical labour and mental strain are equally important for life. Such an understanding should be created among the present students. This will create a healthy generation.

Problems of employment. Now another problem regarding employment will arise. It can be easily solved. After completing courses, concerned schools or colleges may issue an eligibility certificate to the students. Each state must have its own selection board autonomous by nature which would include the experts representing companies, banks and all departments of the Government and universities. The board may conduct interviews and various kinds of tests in subjects concerned, for the required number of candidates who get eligibility certificates from their schools. The

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

करणीया । तस्याः सूचिकायाः यथाक्रमं तत्तत्पदेषु नियोगश्च कार्यः । आधुनिक जनतानामभिवृद्धौ विघ्नमापादयित्र्यां अद्यतन्यां शिक्षामुज्जीवयितुमुपयुक्तानां केषाञ्चन निर्देशानामेतत् केवलरूपरेखामात्रमेव ।

यदि धर्मात् भ्रष्टाः स्युः । इदं वस्तुतत्त्वम् अस्माभिर्न विस्मर्तव्यम् । लोके सर्वा अपि संस्थाः प्रस्थानानि च समाजस्य आवश्यकताया एव समुत्पन्नाः प्रवृद्धाश्च । यावत् तेषां तत्तदुद्दिष्टमप्रतिहतं निरुह्यते तावत् तानि सजीवानि सुशक्तानि च वर्धन्ते । यदा तेषां धार्मिकता नष्टा, ततः प्रभृति तानि नाशोन्मुखानि भविष्यन्ति । त्वरितमेव समाजस्तानि समुन्मूलयिष्यति च । धार्मिकमूल्यैः सम्पन्नः कश्चन जनवर्गः कदाचित् ब्राह्मणनाम्ना समाजे प्राधान्यमलभत । यदा प्रभृति ते अहङ्कृताः सञ्जाताः धार्मिकमूल्येभ्यो भ्रष्टा अवर्तन्त जातिमहत्त्वमवलंब्य अन्यान् चूषयितुं पादैराहन्तुं चारभन्त, ततः प्रभृति ते स्वयमेव नाशाभिमुखमनीयन्त । राजानो यावत् स्वप्रजानां योगक्षेमतत्परा आसन् तथा स्वराज्यस्य सुस्थितये प्रवृध्यै च त्यागं सोढुं सन्नद्धाश्चासन् जनस्ता-

---

boards must prepare a rank list of the successful candidates and appointment can be made from the list. These are mere outlines of some suggestions to enliven our education which has become an obstacle in the growth of present generation.

If we lose spirit........ We should not forget one thing. All institutions and movements in the world have been formed and developed out of needs of the society. As long as the purpose is served, they would be alive and healthy. When the spirit is lost they would become harmful. Soon the society will root them out. Some sets of people who possessed spiritual virtues got prominance as Brahmins in the society. When they grew to be proud and deprived of spirit and began to exploit and tread on others in the name of caste they dragged themselves towards ruin. As long as the kings were living for the welfare of their subjects and were prepared to suffer for the prosperous existence of their kingdom, the people were honouring them as their protectors. But.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाद्रियन्ते स्म, स्वसंरक्षकान् परिगणयन्ति स्म। किन्तु यतः प्रभृति ते प्रजाः चूषयितुं आत्मन आडंबरजीविताय राज्यस्य सम्पत्तिं क्षपयितुमारभन्त ततः प्रभृति तेषां प्रतिष्ठा प्रणष्टा। पुरातने काले देवालयाः ईश्वराराधनकेन्द्राण्यासन्। कालान्तरे ते ब्राह्मणानां स्थापिततात्पर्याणां सङ्केताः सञ्जाताः। ते तदितरजातीयान् जनान् ईश्वरप्रतिनिधिमिषेण चूषयितुमारेभिरे। अद्य तु ब्राह्मणा इव देवालया अपि दैविकसङ्कल्पानां जीर्णतेव तत्र तत्र विशीर्णा दृश्यन्ते। राष्ट्रस्य स्वातन्त्र्यलाभार्थं देशीयप्रस्थानमारब्धम्। अधुना तु तदिदं पक्षप्रतिपक्षाणां स्थापिततात्पर्यैः दूषितं संवृतम्। तदपि अधुना जीर्णतामापद्यमानमास्ते। तामेतामेव दशामस्माकं विद्याभ्यासोऽप्यभियाति। तस्मिन् क्षेत्रे सर्वाणि जीर्णतालक्षणानि सुव्यक्तं दृश्यन्ते। अस्यामापन्नदशायां न केवलं साकल्यतः परिवर्तनं किन्तु पूर्वोक्तया विधया शिक्षायाः पुनरुज्जीवनमप्यावश्यकम्।

---

when they began to exploit the subjects and to dissipate the revenue for their luxurious life, they lost their position. Now they have come down being below average. Temples were the centres of worship of God. In course of time they became the centres of vested interests of Brahmins. They acted as agents of God in the holy place and exploited the people of other castes in the name of God. Now the temples appear to be the ruins of the divine concepts here and there. National movement started for the sake of freedom of our country. Now it has been polluted by the vested interest of parties. That also reached the stage of decay. What our education is facing is the same. All symptoms of decay are evidently seen in the field. In this critical moment we need, not only complete change but revival also of the education.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

अद्यतनमस्माकं साहित्यं मूल्यतः सङ्कुचितं जातम् । आनन्दानुभूतिद्वारा हृदयस्य शुद्धीकरणमेव साहित्यस्य मुख्यो धर्मः । तादृशः सविशेषो धर्मः अद्यतनसाहित्ये न दृश्यते । कवितास्वादनमद्य गणितशास्त्रमिव बुद्धिव्यायाममात्रे पर्यवसितम् । प्रायः दृश्यकला आख्यायिकाश्च स्वकीयां मौलिकतां विहाय मादकविकारानुत्पाद्य धनार्जने निष्णाता दृश्यन्ते । लौकिकानुभूतीः अलौकिकानुभूतितामापादयन्तीषु विविधकलासु साहित्यकलायाः स्थानमतिप्राधानम् ।

THE GIST

The literature today has become devoid of its virtues. The main characteristic of literature is purification of mind through some kind of joyful experience. Such a quality is not available with to-day's literature. Nowadays the appreciation of poems has become just like the solution of mathematical problems which result in mere intellectual exercise. Generally, both audible and visible works in literature seem to be intended to earning money by stimulating cheaper sentiments of appreciators. The position of literature is most important among the other arts which can transform different kinds of the worldly emotions into the heavenly enjoyment.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अद्यतनं साहित्यम्

मानवस्य वैकारिकोंऽशः यतः प्रभृति संस्कृतः परिष्कृतश्चासीत् तत आरभ्य काव्यस्य जनिरजनि। तस्य विचारांशो यतः प्रभृति तथैव संस्कृतः परिष्कृतश्चासीत् तत आरभ्य स्वेन्द्रियविषयानधिकृत्य विविधानभिप्रायान् प्रकटयितुं स समारभत। तेष्वेकैकोऽपि अन्यस्य खण्डनरीत्या मण्डनरीत्या वा स्थिरप्रतिष्ठामभजत च। तथापि ते प्रायः तत्त्वबोधनादधिकं धिषणावैदग्ध्य-प्रमापका दृश्यन्ते। अतः तद्द्वारा तत्त्वार्थबोधो नितरां क्लेशकरः। तस्मात् तानपहाय साहित्यस्य तत्त्वं मूल्यं चावगन्तुं स्वतन्त्रतया अत्र विचारः करणीयः। का नाम साहित्यस्यान्तःसत्ता? किं नाम तस्य स्रोतः? तत् सहृदये कथं

Literature today

Ever since the emotional side of man became refined and civilised, literature came into existence. Similarly, since his intellectual power became developed, he began to criticise every thing which he felt through his senses. Such criticism became established as either **Mandana** or **Khandana** (for or against) of them. But, each of them is generally seen to have intended to proclaim the intellectual pro-wess of critics than to give a search-light into real fact. So, to rea-lise the vital aspect of poetics through such intellectual feats is too difficult. Therefore, now, let us keep off the old criteria of criticism and try to approach the truth independently. What is the vital part of the literature? From where does it flow? How does it ope-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याप्रियते? किं नाम तस्य प्रयोजनम्? इत्यादिकमधिकृत्य प्राचीनालङ्कारिक सङ्केतान् अनवलम्ब्यैव अत्र किमपि प्रस्तोतुं प्रयत्नः क्रियते।

मानवस्य मनः सरघाव्याप्तेन क्षौद्रपटलेन तुलयितुं शक्यम्? क्षौद्रपटलेषु मक्षिका इव असंख्येया भावा मनसि विलीना वर्तन्ते। पटलेषु मक्षिकाः स्वतः प्रशान्ता एव स्युः। किन्तु यदा तेषां किमपि बाह्यप्रकोपनं जायते तदा ते पक्षपुटानि वितत्य डयितुमारभन्ते। एवमेव यदा यदा बाह्यप्रचोदनं भवति तदा तदा भावा मनस्युद्दीप्ता भवन्ति। तदुद्दीपनं तु मनसः किमपि व्याकुलतामादधाति। उदाहरणेन व्यक्तीक्रियते।

सामान्यजनानां हृदयमिव मातृहृदयमपि हास शोक दया रति द्वेष-लोभासूया वात्सल्यादीनामनेकेषां सदसद्भावानां केन्द्रं भवति। यदा माता स्वमर्भकं रोदन्तमवलोकते तदा तस्य मनसि शोक दयादयो भावा उद्दीप्ता

---

rate in human mind? What is the use of it? As the responses to these questions, I shall try to say a few words based on my own perspective, not on the criteria of rhetoric followed by our ancient masters.

Human heart can be compared to a honey-comb covered with a lot of bees. Innumerable emotions are clung to the heart just like the bees to the comb. The bees are normally seen quiet. But whenever they are disturbed by some external provocation they are seen flying around the comb quite perplexed. Likewise, because of the incitement from outside, the emotions become alert and wakeful. Such a state makes some kind of confusion in heart. Let us clear it by an example.

The heart of a mother as of others, is of course, a centre of various good and bad emotions like mirth, misery, mercy, love, enmity, greed envy affection and so on. When the mother sees her son crying, the emotion of sorrow and compassion becomes

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवन्ति। यदा स हसति तदा तस्या मनसि हर्षो नाम भावः समुद्दीप्यते। यदा स बिभेति तदा संभ्रमः, यदा तमन्यः परिहसति तदा ईर्ष्याद्वेषादयो भावाः समुद्यन्ति। एवं तत्तदवसरेषु तत्तद्भावा नराणां मनसि समुदयन्ते विलयं प्रप्नुवन्ति च।

एते भावाः प्रायः क्षणिका आगमापायिनश्चानुभूयन्ते। किन्तु केचन अंगुलीपरिगणनीया भावा अन्यापेक्षया चिरस्थायिनो भवन्ति। दम्पत्योः परस्परसमुत्पन्ना रतिः न खलु नैमिषिकी। रामस्य रावणं प्रति समुत्पन्नो द्वेषो न खलु क्षणिकः। परित्यक्तायाः सीताया हृदये समुद्भूतः शोकोऽपि न क्षणिकः। एतादृशाः चिरस्थायिनो भावाः स्थायिभावा इति कथ्यते। तादृशाः स्थायिभावाः रसाः इति व्यवह्रियते। रसास्तु नव वा दश वा परिसंख्याताः। ते एत्र आलङ्कारिकैः शृङ्गारवीरकरुण रौद्र हास्य भयानक बीभत्स अद्भुत शान्ताश्चेति नामभिः निर्दिष्टाश्च। अन्ये सर्वेऽपि भावा एव। हिमालयस्य असंख्येयाः शृङ्गाः सन्ति। तेषु कतिपय एव

---

wakeful. When the son laughs, the emotion of joy gets up. When he becomes frightened, she becomes affected by the emotion of bewilderment. Like this on various occasions, various emotions emerge and absorb in human heart.

Among them some are momentary and some are lasting. The love between a couple is not momentary. The enmity of Raama with Raavana is not momentary. The sorrow that arose in the heart of Seeta also is not momentary. They are lasting. The lasting emotions are considered to be prominent among them. They are called **Sthaayi Bhavas** or **Rasas** known as **Shringaara, Veera, Karuna, Roudra, Haasya Bhayaanaka, Beebhatsa, Adbhuta,** and **Shanta**. All other emotions are not so. They are known as Bhavas. Himalaya has many peaks. But among them a few are known as Everest, Kanchanjangha etc. Howmany

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गौरीशङ्करादिनाम्ना विख्याताः। लोके कति कति सन्यासिनः सन्ति। तेषु कतिपय एव तत्पदेन व्यपदेष्टुं शक्याः। तथैव भावानां बहुत्वेऽपि कतिचनैव तेषु रसभूयं भजन्ते।

जीविते प्रत्यक्षमनुभूयमाना भावाः केवलं लौकिका एव। तेषां नास्वाद्यतास्ति। यदा अस्मद्सन्निधे यः कश्चिदपि रोदिति तद् दृष्ट्वा न वयमानन्दमनुभवामः। किन्तु यदि कश्चिद् नटः कस्यचित् रोदनमभिनयति तद्रोदनं वयमास्वदामहे। अस्मत्समक्षमागतं कुष्ठरोगिणं जगुप्सया वयं परिहरामः। यदा नटः कुष्ठरोगिणं रङ्गे अभिनयति तदा वयं तद्गतं जुगुप्साभावमपि आस्वदामहे। अस्मत्पुरतः नवमिथुनं शृङ्गारचेष्टमारभते चेद् तत्र जुगुप्सा जायते। यदि मिथुनस्य शृङ्गाराभिनयं रङ्गे पश्यामः तर्हि वयमानन्दमनुभवामः। तस्मादिदं स्पष्टं भवति। यद्यभिनयेन अथवा सामान्यतः कलारूपेणाविष्क्रियन्ते तर्हि सुखदुःख हसितरुदित रतिजुगुप्सादयः सर्वेऽपि भावा आस्वाद्या भवन्ति। अन्यथा किमर्थं वयं करुणरसप्रधानाः सिनिमाः द्रष्टुं

Saadhus are seen in the world; but only a few of them are counted as **Maharshis**. Likewise, though emotions are many, only a few among them are called **Rasas.**

Emotions that we experience in our real life are **Loukika** (worldly). If we see our mother or children crying, we cannot enjoy it. But if an actor imitates their crying we can enjoy it. We disgustedly avoid a leper standing in front of us; but when an actor imitates him on stage we appreciate it. If a young couple begins to kiss and embrace each other standing in front of us, we will feel disgusted. But we enjoy the same if presented through actors on a stage. From this it is clear that whenever reality develops into imagination all emotions, be good or bad, will be of the same enjoyment. Otherwise why should we go to the theatre spending money and time to see tragedies? Why should we be

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समयं वित्तं च व्ययीकृत्य सिनिमाशालां प्रविशामः ? दुरन्तानां आख्यायिकानां पठने कुतो वयमासक्ता भवामः ? प्रत्यक्षानुभवे समुद्भूयमानाः भावाः विभिन्ना विभिन्नास्वादाश्च । तेषां सङ्कल्पजन्यः रस एक एव । मरिच लवणाम्लादीनां कुश्माण्डाम्रकर्कन्ध्वादिफलानां च स्वादाः परस्परं विभिन्नाः । किन्तु यदा अग्नौ विपच्य उपदंशतामापाद्यते तेषां रस आहत्य एक एवानुभूयते । सङ्कल्पे अनुभूयमानाः भावा अलौकिकाः । काभिश्चन साङ्कल्पिकाधायकप्रक्रियाभिरेव लौकिकभावा अलौकिका परिणमन्ति । तादृशी काचित् सविशेषा शक्तिः मानवानामनुग्रह एव ।

परित्यागरंगे अश्रु मुञ्चन्तीं सीतां दृष्ट्वा प्रेक्षका अपि अश्रु मुञ्चन्ति । तदा तैः तद् दुःसहमपि दुःखं रसात्मकतयाऽनुभूयते । तत्र सीता नटद्वारा प्रेक्षकाणां सङ्कल्पपथमायाति । रमायणपारायणावसरे तु सीतादीनि कथापात्राणि शब्दज्ञानद्वारा अस्माकं सङ्कल्पपथं प्रविशन्ति । रामायणचित्रदर्शनावसरे तु सीतादयो रेखारूपद्वारा सङ्कल्पं प्रविशन्ति । एतावानेव विशेषः । साहित्य

---

interested to read tragic stories? The emotions, we experience in our real life, may be different, but the ultimate feeling in our imaginary world is one and the same. Pepper, tamarind, salt and the vegetables of different kinds taste differently; but when all of them are mixed together and properly cooked, they become curry and its taste altogether will be one. The emotions in imagination are **Aloukika**. The convertion of **Loukika** emotions to **Aloukika** is accomplished by some sort of process of imagination. Such a peculiar power of process is a gift to the human beings.

Seeing Seeta weeping on stage in the scene of her abandonment, the spectators also burst into tears. Even then the spectators feel such an unbearable sorrow as mere enjoyment. There Seeta enters into the mind of spectators through the actors. When we read Raamaayana, Seeta enters into our mind through words. In case of portraits she enters through colours and lines. only this

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विषये वयं पाठका भवामः । चित्रशिल्पदृश्यकलाविषये प्रेक्षका भवामः। गानकलाविषये श्रोतारश्च । यः कोऽप्यस्तु सर्वत्रापि सहृदयत्वमावश्यकम् ।

सहृदयानां कथापात्राणां च को नाम परस्परबन्धः ? काव्याख्यायिकादि पारायणावसरे अध्येता हसति रोदिति च। नाटकदर्शनावसरे प्रेक्षकोऽपि तथा। कथमेतत् ? तस्यापग्रथनमत्रावश्यकमिति प्रतिभाति ।

वयमधुना रामायणकथां प्रेक्षमाणा नाटकशालायामुपविष्टाः स्मः । कथागतौ विलीनमानसा वयं स्वामात्मसत्तामधुना विस्मृतवन्तः । वयं त्रेतायुगे अयोध्यायां वसन्तः पौराः सञ्जाताः । स्त्रीपुरुषपितृपुत्रादि लौकिकोपाधिभ्यो वयमतीताः संवृत्ताः । अस्मास्वेकैकोऽपि यथावसरं सीता रामः दशरथः कौसल्या कैकेयी मन्थरा बाली रावणः विभीषणः हनुमान् इत्येवं परिणताः। अत्र रावणः रुदतीं सीतामपहृत्य पुष्पकविमानमधिरोहति। वयं रावणस्य क्रूरतां

---

much is the difference. In literature we are readers. In drama, sculpture and portraits, we are spectators. In music we are hearers. Whatever it may be, in all these cases, power of appreciation is essential.

What is the relation between characters and appreciators? The appreciator expresses his feelings by contextual laughter or weeping when he gose through the books, sees drama or pictures. How is it ? Analysis of this also is needed here.

Suppose, we are now sitting in a theatre enjoying a drama composed on Raamaayana. We have already absorbed in the play and forgotten even our own being there. We have become the citizens of Ayodhya in Tretayuga. Each of us, according to the scenes changes as **Seeta, Raama, Dasharatha. Kousalya, Kaikeyi, Manthara, Baali, Raavana, Vibheeshana, Hanuman** and so on. **Raavana** forcibly pulls down crying Seeta and gets into **Pushpaka Vimanaa**. We appreciate **Raavana's** crualty and Seeta's pitiable cry

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सीतायाः करुणरोदनं च समरसं आस्वदामहे। अयमेव सङ्कल्पशक्तेर्विशेषः। सा शक्तिर्विस्मापिका विलक्षणा च। सा मृत्पिण्डं कनकमातनुते। वास्तविके लोके दृश्यमाना नीचा निकृष्टा अपि भावाः सङ्कल्पलोके आस्वाद्या अनुभूयन्ते इति यद् तस्य तत्त्वमेतदेव।

मनसि विलीयमाना सूक्ष्मा भावा यदा विकृतिमापद्यन्ते तदा ते विकाराः सम्पद्यन्ते। भावानां विकारापादनं अथवा उत्तेजनं येन सिध्यति तदेव कलेति निर्वक्तुं शक्यते। भावोत्तेजनार्थं अङ्गीक्रियमाणानां माध्यमानां भेदमनुसृत्य कला विभिन्ना भवति। यथोचितं यथाभिरुचि संस्कृता लौकिकभावा यदि शब्दद्वारा आविष्क्रियन्ते तर्हि तत् साहित्यं भवति। तत्रापि छन्दोनिबन्धादीननुसृत्य। सविशेषं सन्निवेशितैः शब्दैः भावा आविष्क्रियन्ते तदा तत् काव्यं भवति, तत्कर्ता कविश्च।

भावानां आविष्करणावसरे तान् आकर्षकान् कर्तुम् कविः किं किं करोति? किं किमवलम्बते? इत्येतदधिकृत्यापि किमप्यत्र चिन्तनीयमास्ते।

---

alike. It is the peculiarity of the power of imagination. This power of man is strange and wonderful. It changes the mud into gold. That is why the mean and even indecent emotions in real world become worth appreciating in imaginary world

When the subtle emotions of mind would develop, they are called **Vikaaras**. It is the art by which the emotions could be developed into Vikaaras. According to the difference in medium, chosen by the artists to stimulate the emotions, the art becomes different. If the **Loukika** emotions, after having been appropriately refined and polished according to the taste of artist, are expressed through the medium of words, it is called literature. In literature also if the emotions are expressed by words composed in a particular manner according to the metrical rules, it is called poetry. He who composes it, is poet.

What does a poet do to make emotions attractive when he expresses them? To which way does he resort for accomplishing it?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कवेरुद्बुद्धानां भावानामाविष्करणानुकूलः कश्चन आशयः अथवा प्रमेय आवश्यकः । तमाशयमक्लिष्टतया प्रकाशयितुमुचितानां पदानां सन्निवेशः, आशयस्य मुष्टिमेयताधानार्थम् गेयतापादनार्थम् च उचितच्छन्दसां यथोचितं यथावसरं स्वीकरणं, पाठकानां परिचयमण्डलात् उद्धृतैः सङ्कल्पात्मकैर्वस्तुभिः संभवैर्वा उदाहृत्य स्पष्टीकरणं च । तथाहि विकारः, कथावस्तु, पदसञ्चयः, छन्दः, अलङ्कारः इत्येतान्येव खलु कविकर्मणो घटकानि । एष्वतिप्रधानं आशय एव यत्र, भूमौ बीजमिव, भावः समुद्भिद्यते, अङ्कुरति पल्लवति च ।

वैदिककाले यद्यपि कृतयः प्रकृतिशक्तिस्तुतिप्रधाना दृश्यन्ते तथापि ता प्रायः सामान्यजनानां जीवितगन्धिन्य एव । उपनिषदां काल आध्यात्मिकप्रधानः । एतदनुबद्धाः केचन आरण्यका ग्रन्थाश्च वैदिकसाहित्ये अन्तर्भवन्ति ।

We have to think of this aspect also. First of all, a theme conformable to the emotions is essential. To express the theme as easily as possible, composition of apt words is needed next. The next need is to choose metres apt for bringing the ideas into grip and for beauty of recitation. Then, to make the ideas clear and attractive, some facts or examples familiar to the readers are inserted. ie. emotion, theme, vocabulary, metres, and figure of speech. These are the important factors of a poem. Among them the most important factor is the theme where the emotions sprout and flourish. Seed cannot sprout out without the help of earth.

During the Vedic period, the literary works are seen stressing on praising the nature's powers. More or less they are connected with the life of commoners. Upanishads give importance to the spiritual aspects. These works and some other works like **Aaranyakas** derived from them, are counted as vedic literature.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदनन्तरमेव पुराणेतिहासानामाविर्भावः तेषु तु साधारणजनानां जीवितानि प्रतिफलितुमारभन्त । तेषु प्रमुखं महाभारतं तु मानविकजीवितस्य साकल्यमेव ।

वेदादारभ्य पुराणेतिहासकालपर्यन्तं भावानां रूपाधानविषये कवयो न तावत् श्रद्धधाना अवर्तन्त । आशयान् तदाविष्करणमाध्यमानि च यतः प्रभृति ते संस्कर्तुमारभन्त ततः प्रभृति पुराणादिभ्यः काव्यशाखा उद्भिन्ना । विष्णुपुराणात् रघुवंशं ईदृशरीत्यैव उदभिनत् । रामायणात् शकुन्तलोपाख्यानाच्च उत्तररामचरितं अभिज्ञानशाकुन्तलं च यदा उद्भिन्नमभूत् अथवा ततोऽपि पूर्वं पुराणेतिहासेभ्यः भासनाटकानि अङ्कुरितान्यभवन् तदा माध्यममपि विभिन्नमभूत् । केवलं शब्दार्थेभ्यः कथापात्राणां सङ्कल्पानुभूतेः स्थाने नाटकेषु नटद्वारा तेषां प्रत्यक्षानुभूतेः अवसरः समजनि । एवं च पठनद्वारा श्रवणद्वारा च आस्वाद्यमानानि श्रव्यकाव्यानि दृश्यात्मकतामापाद्य चाक्षुषास्वादनयोग्याः चाभूवन् ।

After this vedic period, epics came into existence. In them, reflects the life of all kinds of people. Among them the **Mahaabhaarata** is the mirror of the total humanity.

From the vedic period up to the period of epics the writers were known as **Rishis** and they were not very particular in the artistic refinement in presentation of emotions. When the theme and medium of presentation began to be sophisticated, a new branch in literature sprouted out, known as **kaavyas**. Thus the **Raghuvamsa** emerged from **Vishnupuraana**. When **Shaakuntalam** was originated from **Shakuntalopakhyaanam, Uttararaamacharitam** rom **Ramayana** and indeed earlier to them the **Bhaasanatakas** from the epics, the medium of presentation also became different. Instead of enjoyment based on conception of characters through word's meaning in dramas, occasions of visual enjoyment through actors also arose. Thus the audio literature which could be appreciated by simply reading and hearing, changed to visual and became fit to be appreciated by eyes also.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अनेनैव कालान्तरेण लक्षणग्रन्था अप्याविर्बभूवुः । काव्यसाकल्यं वस्तु अलङ्कारः रस इति त्रिधा अपप्रथितम् । एषु प्रथमं वस्तु अमुकैः वर्णनैः पल्लवयितव्यमित्यनुशास्तुं पण्डिताः प्रारभन्त । तेषां तादृशानुशासनविधेयाः कवयः इतिवृत्ते अप्रसक्तानपि नगरार्णवशैलादीन् वर्णयितुमारभन्त । नाटकीयं कथावस्तु मुखप्रतिमुखादिसन्धिभिः विस्तारयितव्यमिति व्यवस्था प्रतिष्ठामभजत । एवं च दृश्यश्रव्यकाव्यानां कथावस्तु ईदृशानुपष्टंभानवलंब्य सङ्कोचयितव्यं उत विकासयितव्यमिति च प्रथा प्रचारमविन्दत ।

अलङ्काराणां विषयेऽपि इदमेव संवृत्तम् । पाठकानां चिरपरिचितं वस्तु वा संभवं वा सङ्कल्पात्मकतया उदाहृत्य प्रतिपाद्यस्य चमत्काराधानमेव उपमाद्यलङ्काराणां स्वभावः खलु । तां चमत्काराधानरीतिं बहुधा विभज्य अलङ्कारान् शताधिकान् स्रष्टुमपि लक्षणशास्त्रकारा उदयुञ्जत । तन्मयीभावरसं स्थगयितुमेव पर्याप्तान् केवलमस्तिष्कव्यायाममात्रफलान् तादृशान-

---

By this period, the books on rhetoric were originated. The whole of the poetry was analysed into three components as the theme, figure of speech and emotion. Scholars began to lay down rules that the theme should be expanded by such and such descriptions. Owing to such rules poets began to describe cities, oceans, seasons, etc. though they are not connected with the theme. Similarly a rule became established that the plot of drama also should be expanded with **Sandhis** like **Mukha**, **Pratimukha** etc. Thus such a system came in prevalance that the plot of poetry and drama has either to be expanded or to be constricted based on such rules.

The same happened in the matter of figure of speech ie. **Alankaara**. The real nature of **Alankaara** is to make the subject matter interesting by giving examples that may be things or events with which the readers are acquainted, out of conception. Scholars in this field, tried to analyse and split up the way of appreciation into more than one hundred, based on very minute differences and named them Upama, Utpreksha and so on. Such Alankaaras

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लङ्कारभेदान् सगौरवं परिगणय्य कवयस्तान् स्वकाव्येषु क्लिष्टं प्रयुज्य स्वकीयबुद्धिप्रभुत्वं प्रकटयांचक्रुः । क्रमशः काव्यास्वादनमपि शास्त्रनिर्विशेषं बुद्धिव्यापारमात्रं पर्यवसितम् । एवं च स्वतः अकृतकानां भावानां भावनानां च बहुप्रकाराः सङ्कोचाः कृत्रिमताश्च संबभूवुः ।

काव्यानुशीलनावसरे नाटकवीक्षणावसरे वा तन्मयीभावबलात् समुत्पद्यमानोऽनुभूतिविशेष एव रसशब्देनोद्दिष्टः । सोऽनुभूतिविशेषः नवधा दशधा च तल्लक्षणाभिज्ञैरपप्रथितः । शतधा सहस्रधा वा अपप्रथ्नन्तु; सर्वेस्योऽनुभूयमाना आत्यन्तिकानुभूतिरेकैव ।

एवं वस्त्वलङ्काररसानां शास्त्रीयप्रपञ्चनमवलंब्य विरचितानि श्रव्यदृश्यकाव्यानि संस्कृतसाहित्ये शतशः सहस्रशः चाविर्बभूवुः । तदुपरि तेषां खण्डनमण्डनात्मका बहवो लक्षणग्रन्थाश्च ।

---

simply give intellectual exercise and hinder the enjoyment. Gradually appreciation of poetry also changed to be **Shaastras** –the brain's work. Scholar- poets, who succeeded them, manifested their masterliness in the subject by implementing and inserting them in their works with much difficulty taking them very serious, thus the real and natural emotions and conceptions got into constriction and artificiality in many ways.

The word **Rasa** is ment here to be some sort of enjoyment in the state of absorption when we see drama or read books of such kind. Scholars in that field have divided it into nine or ten. Let them divide it into a hundred or thousand. The ultimate enjoyment that comes cut of all of them is one and the same.

Thus the books on audio and visual literature extending to **Shastra's** realm ie. theme, figure of speech, and emotions, have come out in hundreds in Sanskrit. Apart from these, many descriptive works criticising them for and against have come into existence.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अवान्तरे प्रादेशिकभाषाः परिपुष्टिमाप्तुं प्रारभन्त। अध्ययनं सामान्यजनानां मध्येऽपि व्यानशे। संस्कृतविद्वांसः संस्कृतमानदण्डमाश्रित्य प्रादेशिकभाषास्वपि ग्रन्थान् रचयामासुः। प्रतिभासम्पन्नाः साधारणा जनास्तु स्वस्वमातृभाषासु स्वतन्त्रान् ग्रन्थान् च विलिलिखुः।

विदेशैः सह यदा अस्माकं सम्पर्कोऽवर्धत तदा प्रभृति वैदेशिकसाहित्यानां प्रभावः अस्मत्साहित्ये किमपि परिवर्तनमजनयत्। वयंताननुकर्तुमारब्धवन्तः। तदनुकरणं भारतीयसाहित्यं साधारणीचकार। प्राचीनमानदण्डाः सर्वेऽप्यस्माभिः परित्यक्ताः। इतिवृत्तं तु कथातः कथांशाः सञ्जाताः। सामान्यजनानां जीवितं तत्र प्रतिबिम्बितुमारेभे। पुराणकथापात्राणां स्थाने आधुनिक सामाजिककथापात्राणि पदमकुर्वन्। साहित्यरचनाविषये साहित्यास्वादन विषये च यतः प्रभृति प्रादेशिकभाषा पर्याप्ता अभवन् ततः प्रभृति संस्कृतस्य

Meanwhile provincial languages began to flourish. Education spread among the common people. Scholars in Sanskrit wrote many books, based on the criteria prevalent in Sanskrit, in provincial languages. Ordinary people, gifted with resourcefulness, wrote books in their own languages independently.

When our contact with foreign countries developed the characteristics of their literature influenced our literature. We began to imitate them. The imitation generalised Indian literature. We gave up old criteria in total. Themes changed into some portions of a story instead of a full story. The life of ordinary people began to reflect in them. Instead of puramic characters, characters from contemporary society began to be adopted. Whence the provincial languages became capable to produce literature and to satisfy the people, the importance of Sanskrit diminished.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राधान्यं प्रक्षीणमभूत् । लक्षणग्रन्थाः सुदूरं चिक्षिपिरे । एवं च प्रायः साहित्य रचनायां किमपि नियन्त्रणं तथा कोऽपि नियामको धर्मो नावशिष्टः ।

वैदेशिकानुकरणस्य दुष्प्रभावः कालान्तरे भारतीयकाव्यरचनां अन्यथा-चकार । अधुना तु काव्यरचना काव्यानुशीलनं च अङ्कगणितमिव केवलं बुद्धिव्यायाममात्रं पर्यवसितम् । पूर्वम् धिषणाप्राभवप्रकटनोपाधिः अलङ्कारादय आसीत् अधुना तु प्रच्छिन्नबिम्बादयः (Broken images) इत्येव भेदः । हृदयविकासः उत आनन्दानुभूतिर्वा तस्य न लक्ष्यम् । न केवलं कविता, किन्तु सर्वा अपि कलासृष्टयस्तथैव संवृत्ताः । सर्वेऽपि हृदयान्तर्गतान् भावान् नोद्दीपयन्ति, प्रत्युत तीक्ष्णां बुद्धिं तीक्ष्णतरां कुर्वन्ति । न सेयं कला, किन्तु शास्त्रमेव । न च तत् शास्त्रम् । यदि शास्त्रम् स्यात् मानवस्य भौतिकजीविते यथा कथञ्चिदप्युपकुर्यात् । एताः कलासृष्टयः तदर्थमपि नोपयुक्ताः । एवं सति

Books on old theories and rules were thrown away. Thus no factor which would control the writers, was left in the field.

In course of time some bad influences of foreign literature have affected the trend of indian literature. Now, both to compose poetry and to appreciate it, have become mere intelluctual exercise like solving some mathematical problem. During early period, the way of manifestation of scholars' intellectual power, was the production of poetics. Today it has changed to be some novel attempts like broken images and discarding poetical rhythem and metrical rules etc. Only this is the difference. Now, the poetical work is neither aimed at the mental enlightenment nor emotional enjoyment. Not only the poetical works but all kinds of art, in general, have come to the same condition. None of them does stimulate the emotions hidden in heart. Instead, they make sharp intelligence sharper. This is not art, but sciencc. In fact this is not science also. If science, some or other way, It should have been useful for the material life of man. These arts do not serve that purpose also.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतादृशानां कलावैकृतानां का नाम संज्ञा दातव्या ? कस्मिन् विभागे ताः परिगणनीयाः ? भावमुद्दीप्य मनः संस्कर्तुम् अथवा बुद्धिव्यापारेण जीविते यथाकथञ्चिदप्युपकर्तुम् न पर्याप्ताश्चेत् पुनः किमर्थं तादृशीः रचना वयमाद्रियामहे ? भावोद्दीपनेन मनः शुद्धीकर्तुम् साङ्कल्पिकमानन्दमनुभावयितुं च पर्याप्तानि वाक्यानि-तानि द्वित्राण्येव सन्तु-साहित्यपदे अभिषेक्तुमलं भवन्ति।

As such, what name is to be given to such artificial works? In which division, it is to be included. It is neither intellectually nor emotionally beneficial in our life. What for do we mind such works! Only the works, which can elevate human mind by emotional enjoyment and purify it, can be counted as literature, though they may be a few lines.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उत्तेजनामुषस आदधती, ददाना-
मर्चिः सहस्रकिरणाय, लयं निशे च ।
यस्य क्रियामनुकरोति सदा प्रपञ्च-
स्तस्मै नमोमि गुरवे शिरसा प्रणामम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सार:

आचार्यात् पादमादत्ते
पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः
पादं कालक्रमेण च ॥

THE GIST

Learning consists of four parts. It has to be attained by a student in four ways. The first part can be attained from his teacher directly. The second one, out of his own intellectual strain. The third one has to be obtained by discussions with his class-mates and the last one, out of his own experience in course of time.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षायाः चतस्रो दशाः

विद्या नन्वनन्ता। सा आकाशमिव विपुला, सागर इव अगाधा च। तथापि यथा आकाशं घटाकाशं मठाकाशमिति अस्माभिः परिच्छिद्यते, यथा वा सागरः शान्तसमुद्रो मध्यधरणीसमुद्र इत्येवं विभज्यते तथैव विद्याऽपि विविधान् विषयानवलंब्य विभक्तुं शक्यते। तेषु एकस्यापि विषयस्य समग्रं ज्ञानं सम्पादयितुं सम्पूर्णं पुरुषायुषमपि न पर्याप्तम्। तथापि लोकेऽस्मिन् जीवसन्धारणार्थं पर्याप्तं विज्ञानमार्जितुं आवश्यकेन जीवितदैर्घ्येण नरोऽनुगृहीत एव। अभिरुचिते विषये तावद् ज्ञानमार्जितुं स्वजीवितस्य भूयानंशस्तेन विनियोक्तव्य एव।

Four stages of education

Learning is endless. Like space it is vast. Like the ocean it is deep. But, we limit the space as **Ghataakaasha, Mathaakaasha** etc. and partition the ocean as the Pacific ocean, Meditaranian sea and so on. Likewise learning also can be divided into various departments of subjects. An entire human life is not sufficient to acquire perfect knowledge even in one subject among them. But man is gifted with such a long life as to gain essential knowledge for his existence in the world. he will have to devote a major part ot his life to gain knowledge of that extent in the subject, he chooses.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनभारते शिक्षा चतुर्धा विभक्ता प्रचारमविन्दत । प्रथमो भाग आचार्यात् साक्षादवाप्तव्यः। द्वितीयो भागः स्वयं बुद्धिशक्तेः प्रवर्तनेन शिष्यैरुपलब्धव्यः । तृतीयस्तु सब्रह्मचारिभ्यः । अन्तिमः पादस्तु चिरादनुभवेन च।

<u>आचार्यात् पादमादत्ते</u>। विद्यायाः प्रथमः पादः आचार्यात् स्वीकरणीयः । अद्य तु एतद्विषये किमस्माभिः दृश्यते ? तदिदमतितरां शोचनीयमेव । विनयसम्पन्ने मनस्येव विद्या पुष्पिता भविष्यति । अद्य तु शिष्याणां मनसि यद् वर्धमानं दृश्यते, स विनयो नैव, किन्तु अविनयघृणाहङ्कारादय एव, ये नाम तान् असफलताभिमुखं नयन्ति । वस्तुतस्तु ते आचार्यविद्वेषिणः पाठ्यविषयविद्वेषिणः विनयविद्वेषिणश्च प्रायशो दृश्यन्ते। विद्यालयेष्वनिवार्यान् नियमान् व्यवस्थाश्च ते न गणयन्ति । फलतः छात्रः शिक्षां समाप्य विद्यालयात् निवर्तनकाले अनेकेषां दुर्गुणानां मूर्तिमद्भावं भजते। आचार्यात् स किमपि न लभते। प्रत्युत, विद्यालयप्रवेशनात् पूर्वं ये ये सद्गुणास्तस्यासन् ते सर्वेऽपि

In ancient India education was divided into four parts. The first quarter of it had to be received from the tutor directly. The second quarter was obtained by setting to work with one's own intelligence. The third one, from his class-mates, the last part, out of experience in course of time.

<u>**The quarter, obtained from the tutor**</u> The quarter of learning has to be obtained from tutor. What do we see regarding this aspect in our age? It is really pitiable. Learning flourishes in a mind full of humility. Now what we see developing in the mind of students, is not humility but hatred, disobedience and arrogance, which lead them towards worthlessness. They really hate their teachers and lessons as well as any discipline at all. They ignore all the systems and rules that a school ought to keep up. As a result, a student becomes an embodiment of several noxious qualities when he leaves his school. He acquires nothing from his Guru, on the contrary he becomes bereft of all the good qualities which he possessed before entering

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नष्टा भवन्ति । बहूनां दौर्बल्यानां दुर्गुणानां च आकरो भूत्वा स विद्यालयात् बहिरागच्छति च ।

विद्यालयात् छात्रैर्लभ्यमानायाः शिक्षायाः स्वभावमधिकृत्य सम्प्रति वयमत्र किञ्चिद् विचारयामः । सर्वाः शिक्षाः परीक्षामेव लक्ष्यीकुर्वन्ति । ततो जीविकासम्पादनं च । शिक्षा तत्रैव पर्यवस्यति । परीक्षायाः स्वभावस्तु तत्तद्विषयेषु समुपार्जितस्य ज्ञानस्य मानमूल्ययोः निर्णय एव खलु । किन्त्वद्य तु स केवलं प्रदर्शनात्मकः परिणतः, बहुधा दूषितश्च । कुतः? अत्र किमपि विवरणमावश्यकम् । वर्तमान नियममनुसृत्य प्रायः 40% अङ्कमुपलब्धवन्तः छात्राः उन्नतकक्ष्यां प्रवेष्टुमर्हा इति प्रख्याप्यते । तथाहि, अधिकारिणः तस्य तद्विषये विज्ञानं पर्याप्तं गणयन्ति । तथा तत्क्षेत्रे कर्म कर्तुम् तस्यार्हता अस्तीति तं कीर्तयन्ति च । अत्र कियन्मात्रं सत्यमस्ति? कियन्मात्रमत्र प्रायोगिकतास्ति?

परीक्षासु वर्तमानामन्यामसंबद्धरीतिमवलोकयन्तु । परीक्षोत्तरणार्थमवलम्बितं प्रमाणं विचित्रमेव । तत्तद्विषयेषु अधीतिरस्ति वा नवेत्यस्य तत्र गणना

---

his school ,and he comes out of his school or college being a store-house of a number of evils and weaknesses.

Let us analyse the system of learning that a student obtains from his school. All study aims at the examination, and thereafter a job. The study ends right there. The real nature of examination is to measure and evaluate ones efficiency that he acquired in the subject. But now it has become mere show and has been polluted in many ways. How? It needs explanation. According to the standing rules, a student who gets 40%. of marks, is declared eligible for promotion. ie, the authority considers his knowledge in the respective subject to be sufficient and recomments him to be qualified to serve in the particular field. How far does the reality lie in it? How much it is practicable?

See, another non-sense in the examinations. The criteria adopted for promotion are wonderful! It does not matter whether the

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नास्ति । इयत्प्रतिशतं छात्रा उत्तरणीया इति नियम एवात्र परमं प्रमाणम् । अस्माकं राष्ट्रे इयं बुद्धिशून्यता नियमः सञ्जातः । एतादृशव्यवस्थितौ शिक्षायाः स्वभावः कीदृशः स्यादिति समुद्भावनीयमेव ।

अथास्मिन् विषये सम्पद्यमाना अन्या मूर्खतापि अवलोक्यताम् । पाठ्यपद्धतिं सज्जीकर्तुम् केषांचन 'सर्कार' विदुषां गणो नियुज्यते । विविधवीक्षाशीलानां विभिन्नतात्पर्यवतां अन्येषां केषांचन 'सरकार' विदुषां गणः पाठ्यपुस्तकरचनार्थं अथवा तन्निर्धारणार्थं नियुज्यते । तान्यध्यापयितुमन्ये केचन नियुज्यन्ते । अथान्ये केचन विद्वांसः छात्रान् परीक्षन्ते । परीक्षाया मूल्यनिर्णयभारस्तु तदितरेषु निक्षिप्तः । परीक्षोत्तारणनिर्णायकगणस्तु तदन्यश्च । ईदृश्यां व्यवस्थित्यां कथं छात्राः तत्त्वतः परीक्ष्यन्ते, कथं मूल्यं निर्णीयते? कियदियं सफला तथ्या अर्घ्या च स्यात्?अत्र राष्ट्रे विद्यायाः प्रथमपादस्य तात्त्विकी दशा ईदृशी दृश्यते ।

---

student has studied the subject or not. The main stress on the case lies on the rules that certain percentage of the students should be promoted to the higher classes. This non-sense has become a rule in our country. Just imagine what would the standard of education be under such a system.

See, again the stupidity prevailing in the field. A group of the 'departmental' scholars is entrusted to prepare the syllabus. Another group of 'departmental' scholars of different views and interest prepares or selects the text books. To teach them some others are entrusted. Some other set of scholars is appointed to examine them. Evaluation goes to some others. The responsibility of promotion goes again to some other ones. Under such system how could a student be examined or evaluated and how far would it be effective, real and successful? This is the real position regarding the first quarter part of learning today.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पादं शिष्यः स्वमेधया। विद्यायाः द्वितीयः पादः छात्रैः स्वप्रयत्नेनैव सम्पादनीयः। यदाचार्याल्लब्धं तद् स्वप्रयत्नेनैव दृढीकर्तव्यं वर्धयितव्यं च। अद्य त्वयं स्वभावविशेषः छात्रैः पुरातनकालस्योच्छिष्टमिव दूरतः परित्यक्तः। शिक्षायामयं स्वयंविचिन्तनस्वभावः परमप्रधानमेव। अयं चिन्ताशक्तिं दृढीकरोति, बुद्धिं तीक्ष्णां सूक्ष्मां च तनोति। अधुना त्वस्मिन् विषये किं वयं पश्यामः? कक्ष्यासु पाठानां विवरणं क्रियते, प्रश्नोत्तरादिकं च प्रदीयते। आपणेषु परीक्षासहायपुस्तकानि विक्रीयन्ते। तथा हि, आपणेषु सर्वत्र परीक्षा-विक्रीयते। अतीतपरीक्षाणां प्रश्नपत्रैः सह तुलनां कृत्वा छात्राः कांश्चन प्रश्नान् निर्धारयन्ति। तेषामुत्तराणि परीक्षासहायपुस्तकेभ्यो निर्धार्यन्ते च। परीक्षा-शालासु ते तान्युत्तराण्यदग्धान्येव उत्तरपत्रेषु वमन्ति। सूक्ष्माध्ययनस्य सविस्तर-पठनस्य वा आवश्यकता तत्र नास्ति। कस्मिन्नपि विषये अधीतेरगाधता नावश्यकी। स्वतन्त्रचिन्ताशीलस्य विषयेषु स्वतन्त्रतया प्रवेशनस्य तथा तदर्थं प्रचोदनस्य वा अवसरो न लभ्यते। वस्तुतः स तस्य नावश्यकश्च। प्रतिभा

Quarter, by pupil's own intellect. The second quarter of learning is to be attained by a student by his own perseverance. What he received from his Guru has to be confirmed and improved by his own effort. Now this habit has been buried by the students as the refuse of old age. Such a habit of self-thinking is very important in education. It strengthens the power of thinking and sharpens the intellect. Now what do we see in this field? Notes are dictated in class-rooms. Guides are available in markets, ie. teaching is sold in every market. Comparing to some old question papers, students select some questions and their answers from the guides. They vomit the undigested anwers on the answer sheets in the examination hall. No need of detailed study, depth of knowledge in any subject. The student does not get any chance or inducement for free-thinking or an independent approach to the subject matter. In fact, he does not require it.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नाम शक्तिः विचित्रा विलक्षणा च। मानवास्तु तां जन्मना लभन्ते। तदेतत् सत्यमेव। किन्तु परेषां प्रयोजनार्थं तस्याः पोषाय रूपाधानाय च स्वतन्त्र-चिन्तायाः साहाय्यमावश्यकम्। अद्यतनशिक्षायां तादृशप्रतिभाया वर्धनं संस्करणं चावगण्यते।

अथ चाद्यतनाः छात्राः अनेकथा अनेकशश्च स्वयमाकृष्टा भवन्ति। सिनेमा, रेडियो, पत्रसमाचाराः, पाठचक्रमातिरिक्ताः विषया इत्येते तेषां पक्षे पाठ्यविषयेभ्योऽप्यधिकप्रधानानि। अथ तेषां पाठ्यविषये समग्रदृढपरिज्ञान-सम्पादनं केवलकाल्पनिकं पर्यवस्यति।

पादं सब्रह्मचारिभ्यः। विद्यायाः तृतीयः पादः सहपाठिभ्यः सम्पादनीयः। आचार्यात् यल्लब्धं तद्ज्ञानं सहपाठिभिः सह चर्चाः कृत्वा छात्रैः दृढीकरणीयम्। प्रमेयस्य सूक्ष्मसूक्ष्मकोणान् संस्प्रष्टुं तादृश्यः चर्चाः प्रयोजकीभविष्यन्तीति

Resourcefulness is a wonderful achievement and is inborn to the mankind. But its growth and moulding to make use of it for the benefit of others, requires the support of free thinking. This growth and refinement of resourcefulness are ignored in the present system of education.

Moreover a student of this age is naturally attracted by several other things in various ways. Cinema, radio programmes extra-curricular activities in schools are more important to him than his studies. Hence to gain a thorough knowledge in his subject remains imaginary.

Third quarter, from class-mates. The third quarter of his knowledge has to be gathered from his class-mates. A student has to establish his knowledge obtained from his master by discussion with his class-mates. Since such discussions would enable him to touch with all the subtle corners of the subject,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हेतोः ताः तस्य विज्ञानमेखलां विपुलां कुर्वते । तथा तदनन्तरफलत्वेन छात्रेषु विवेचनशक्तिश्च वर्धिष्यते । अद्यतनशिक्षारीतौ तादृशा शिक्षावसराः अप्रायोगिका एव । विद्यालयेषु तादृशाः अवसरा न सम्पद्यन्ते । परिमितसंख्या-केषु प्राचीनगुरुकुलेषु इयं रीतिः प्रायोगिकी समवर्तत । छात्रैरतितरां सङ्कुलेषु अद्यतनेषु विद्यालयेषु तादृशा अवसराः कथं सञ्जायन्ते?

अधुनात्र शिक्षायाः स्वभावमधिकृत्यापि केचनांशाः परामर्शनीयाः सन्ति । आधुनिकशिक्षायां मानसिक संस्कारार्थमत्यावश्यको वैकारिकांशः प्रायो न परिगण्यते । यथा यथा नरस्य बुद्धिशक्तिं वर्धयितुं प्रयत्यते तथातथा मान-सिक विकासविषयेऽप्यवधानं देयम् । अद्यतनशिक्षायाः स्वभावो न तदनुकूलो दृश्यते । काव्यनाटकादयो मानविकविषया अपि शास्त्रविषया इवापग्रथनरीत्या पाठ्यन्ते । मानविकविषयाः छात्रस्य मानसिकान् वैकारिकांशान् संस्कुर्वन्ति । शास्त्रपठनं तु बुद्धिं तीक्ष्णां बलिष्ठां च तनोति । आधुनिके युगे उपात्त-विद्यो मनुजः बुद्ध्या सम्पन्नोऽपि वैकारिकांशानां विषये सङ्कुचितः परिणमति ।

---

it will widen the scope of his knowledge and consequently the power of discrimination will grow within him. Such discussions are not practical in the system of present education. No such an environment is created in the schools. In old Gurukulas where the number of students was limited, this system was practicable. How could we get such an environment in the rush of the students to schools and colleges?

Now, here we have to deal with, some other aspect of the nature of study. In present education, the emotional side is generally ignored which is very essential for one's internal refinement. As much as we try to develop the intellectual faculties we have to put stress on the development of our emotional aspects also. The nature of teaching is not so. Even humanities like poetry drama etc. are taught as science subjects. adopting analytic methods. Humanities refine the emotions while the science strengthens the intellect. A scholar of the modern age may be intellectually developed, but he becomes constrained in regard to his emotional side

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पादं कालक्रमेण च। विद्याया अन्तिमः पादः अनुभवेनैव सिध्यति। विद्यया यदस्माभिरुपात्तं तदनुभवेनैव सिद्धं सम्पद्यते। अद्य तु तस्यावसरो नास्ति। ज्ञानादधिकेनाज्ञानेन सह विद्यालयाद् बहिरागच्छन् छात्रः जीविकामन्वेष्टुं निर्बद्धो भवति। लब्धा वृत्तिस्तु प्रायशः तस्य विज्ञानेन संबद्धा च न भविष्यति। एवं स्थिते तस्य ज्ञानं अनुभवैः संस्कर्तुमवसरः कथं लभ्यते? अथ दैवात् तस्य ज्ञानानुरूपा वृत्तिर्लब्धेति भावयामः। तदा तस्य श्रद्धा तत्परता च उपात्तविद्यापूरणे न केन्द्रीभविष्यति। किन्तु वेतनस्य वार्षिकवर्धनविषये उन्नतपदप्राप्तौ च स श्रद्धास्यति। एवं च क्रमशः स तावता सर्वथा सन्तृप्तश्च भविष्यति। एवं अन्तिमोऽयं पादोऽपि अवगणितो भवति। एवं च ईदृश्या शिक्षारीत्या समाजस्य को नाम लाभः स्यात्? ईदृशनिष्फलशिक्षाविभागं परिपोषयितुं सर्वकारकोशस्य भूयांसमंशं वृथा व्यययति।

Last quarter in course of time. The last quarter of learning has to be obtained out of experience. Though one may be rich in learning, experience makes him perfect. What we attained by learning will be accomplished by experience. Today there is no chance of it. One who comes out of school or college with much more ignorance than knowledge, is compelled to seek a job. The job, he may get, will have no connection with his knowledge in general. As such how could he have the chance to complete his learning with experience? And by chance suppose he could get a job matching to his learning, his care and interest will not be centred in the fulfilment of his study; but in increment of salary and in promotion in service. He will be completely satisfied with this. So the last quarter part also is left copletely ignored. In such a circumstance how can the society be benefited by such a system of education? A major part of the revenue of the Government is wasted for feeding this major department.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्षेभ्यः प्रभृति अस्मद्राष्ट्रेणानुभूयमानस्यास्य महारोगस्य कः परिहारः? अस्मद्विद्यायाः प्राचीनचैतन्यसमुद्धारणमेवास्य परमो मार्गः। कथमेतत् साध्यम्? अत्र विषये सुदीर्घा चर्चा आवश्यकी।

---

what is the remedy for this chronic disease from which our nation has been suffering from such calamities since years? The only remedy is to lift up the spirit of our learning which we have almost lost. How is it? This needs a long discussion.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सार:

हर्ष-शोक जय-पराजय जीवित-मरण दिन-रात्रादीनि द्वन्द्वान्येव कालत्रयभेद-मनपेक्ष्य अस्य प्रपञ्चस्य नियन्त्रणां कुर्वंते । अस्मिन् लोके जातान् जन्तून् मोक्षाभिमुखं अथवा शाश्वतिकानन्दाभिमुखं नेतुं न कदापि केनापि सुशकम् । एषां द्वन्द्वानां समतुलितदशायामेव प्रपञ्चः यथातथं परिवर्तते । प्रपञ्चस्यायं स्वभावविशेषः सर्वदा साहित्ये प्रतिबिंबते । तस्मिन् उत्कृष्टानि निकृष्टानि च कथापात्राणि समानतया वयं पश्यामः । वयं सर्वदा सुखजीवितासक्ताः इत्यतः उत्तमकथापुरुषैः क्षुण्णान् मार्गानवलंबितुं अनुकर्तुम् च अभिलषामः । अस्माभिः न खलु ते केवलमनुकार्याः किन्तु तेषां संस्कारं सात्म्यीकृत्य तं अस्मत्-संस्कारेण सम्यक् विलाय्य भविष्यपरम्परायै अस्माभिः प्रदातव्यः ।

THE GIST

The pairs like mirth and misery, success and faliure, life and death, day and night etc. control the universe without any distinction of age. It is quite impossible to lead any creature in this world to a perpetual joy or deliverance. The universe moves smoothly by the equilibrium of such pairs. This characteristic of this universe reflects in the literature of all ages. We see the virtuous and vicious characters in it in equal measure. We have a tendency to follow the paths trodden only by the virtuous ones and imitate them because we are fascinated by a joyful life. This is not good. We should not simply follow them, but absorb the culture of the past and assimilate it with ours and then leave it to the future generation.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भारतीय संस्कारः

भारतीयानामस्माकं संस्कारः अतिविदूरे भूते अत्युन्नतपदे अवर्ततेत्येतं भूतकालाराधकानां अभिप्रायं वयमनुदिनमाकर्णयामः। यथा यथा वयं भविष्यकालमभिमुखीकुर्मः तथा तथा सोऽयमस्माकं संस्कारः क्षयमापन्नः धार्मिकमूल्यानां मरुप्रदेशतामापत्स्यत इति ते बिभ्यति च। तेषामियं समीक्षा सङ्कुचिते वर्तमानकाले स्थित्वा समुद्भाविता स्यात्। भूतकालमधिकृत्य संतृप्तिः भविष्यकालमधिकृत्य उत्कण्ठा चास्माकं जीविते प्रायः सम्भवति। तादृशचिन्तानां परिणाम एवैतादृशचिन्तानां निदानमित्यनुमातुं शक्यते। वस्तुतस्तु धर्माधर्म जयापजय उच्चनीचत्व सुखदुःखादिद्वन्द्वानां प्रवर्तनस्य

Indian culture

We frequently hear the remarks of the worshippers of the past that the Indian culture was in a glorious position during ancient ages and that on the days to come the culture will decline and will become a desert of spiritual values. They make such remarks standing on a narrow line of the present. Some kind of satisfaction regarding the past and some sort of anxiety and pessimistic outlook towards the future are generally seen in our life. It can be presumed that such remarks are based on some false concepts. In fact, there is no fundamental change in operation of pairs like virtues and vices, success and failure, greatness and meanness mirth and misery, by the equilibrium of which this universe revolves lively in its natural course irrespective of past, pre-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भूतवर्तमान भविष्येषु मौलिकतया न कोऽपि भेदो दृश्यते। तेषां समतुलितावस्थायामेव प्रपञ्चः स्वैरं चलति। अधिकारस्य कृते लक्षाणां गलच्छेदनव्यग्रः संस्कारः पुरेवाधुनाप्यस्ति। कमप्युपाधिविशेषमवलम्ब्य जीवितोपभोगाधिकारं समाजश्रेष्ठतां च स्वायत्तीकर्तुमुद्यताः केचन धिषणाव्यापारिणः पुरा आसन्, इदानीमपि सन्ति, अग्रे भविष्यन्ति च। पुरा तु स उपाधिः जातिवर्णादय आसन्। अद्य तु उद्योग सम्पत्ति राष्ट्रीयनेतृत्वादय इत्येव भेदः। उन्निनंसया कठिनं तपः आचरन्तो विश्वामित्रा अद्यापि जीवन्ति। यशःप्रशंसादि लाभार्थं यागमाहरन्तो वाजश्रवसा अधुनापि तत्र तत्र दृश्यन्ते। मनुष्याणां सर्वेऽपि स्वभावविशेषाः आधुनिकाख्यायिकास्विव वेदपुराणादिष्वपि उपलभ्यन्ते। अत्यन्ताधुनिको 'घेराओ' अपि वेदे दृश्यते। ऋग्वेदे द्वितीयमण्डले इन्द्रप्रशंसात्मकं किमपि सूक्तमस्ति 'यो जात एव प्रथमो मनस्वान्' इत्यादि। (ऋक्. म 2 सू. 12) तत्र गृत्समदस्य यज्ञशालायां प्रविष्टमिन्द्रं असुरा 'घेराओ' कुर्वते। भीरुरिन्द्रः कपटवेषं धृत्वा निगूढं ततो निस्सरति।

---

sent and future. The practice of killing crores for the sake of establishing supremacy is seen in the past as well as in the present. It will continue in future also. Persons possessing intellectual power and eager to own the highest status in the society and the privilege to enjoy life based on certain unreal qualifications, are seen at present as well as in the past. In ancient days this qualification was based on caste, religion etc, but now it is based on job, money, party-leadership and so on. Only this much is the difference. "Vishwaamitra's" rendering severe austirities with high ambitions are seen today also. As in modern literature, all types of characters in mankind are available in Vedas and puranas. Even ultra modern **'Gherao'** is seen in the **Rigveda**. In the second **Mandala** of it there is a 'Sookta' beginning with **"Yo jaata eva prathamo manaswan"**. There **Asuras** 'gheraoed' **Indra** around the **Yajnashaala** of **Gritsnamada** where **Indra** was present to receive his rights. Indra being coward escaped from there in disguise of **Gritsnamada**.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बलात्कारः, सोषणं व्यभिचारः, विश्वासवञ्चना, कोपः, असूया अत्याग्रहः, दुर्मन्त्रः, इत्यादयो नीचविकाराः, दीनानुकम्पा शरणागतरक्षणं त्यागः अपंगबुद्धिः परोपकारचिकीर्षा इत्यादय उदात्ता भावाश्च पुरापि आसन्, अधुनापि सन्ति। अस्मिन् विषये न देवासुरयोरन्तरं, न च हिन्दुमुसलींक्रैस्तवानाम्। सर्वेऽप्येतद्विषये समाना एव। असुरे महाबलौ अत्युदात्ता भावा लक्ष्यन्ते। आभिजात्यस्य मुकुटभूते देवेन्द्रे कति कति असभ्यता मूर्खताश्च न दृश्यन्ते? पुरुषसूक्तोपज्ञातुर्नारायण ऋषेरत्युन्नता भावा एतद्युगीनरवीन्द्रनाथस्य गीताञ्जलावपि प्रतीयन्ते। दुराचाराविनयात् घेराओविधेयतामापन्नेन भीरुणा इन्द्रेण सदृशा भरणधिया अद्यापि वर्तन्ते। एवं विचिन्त्यमाने सति धर्माधर्माणां शिष्टाशिष्टानां तदानीमिदानीमपि न कोऽपि मौलिको विशेषो दृश्यते।

मानविकसंस्कारे साकल्यतः आत्यन्तिकं समूलपरिवर्तनं न कदापि सभाव्यं, तादृशपरिवर्तनोद्योगः प्रपञ्चस्वभावस्य प्रतिकूलो विफलश्चेति तत्त्वं स्पष्टीकर्तुमेव इयत् प्रतिपादितम्। धर्माधर्मादिद्वन्द्वानां समतुलितावस्थैव इमं

The same noxious qualities like stealth, deceit, anger, envy etc, and the same virtuous qualities like sympathy, mercy, dedication truthfulness etc. are seen equally in all ages. In this aspect there is no difference between **Devas** and **Asuras** or among **Hindus, Christains and Muslims. Mahaabali,** the king of **Asuras** is one of the best characters in **Puraanas**. How many vulgarities and dirty sentiments we see in **Indra** the supreme power of **Devas**! We see the same elevation of mind in **Purushasookta** of **Rishi Naaraayana** and in **Geethanjali** of **Ravindranath Tagore.** Now we see many rulers like **Indra** who become the victims of **'gherao'** because of untolerable malpractices. So, if we think in such a way we cannot see any fundamental discriminating factor regarding the pairs which govern the universe in all ages.

This explanation is made here to testify the fact that the venture for alteration of the fundamentals of human culture is impossible and is even against the nature of the universe. The equilibrium in virtues and vices keeps the universe in its real nature. If there

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रपञ्चं यथातथं करोति। यदि मरणं न स्यात् तर्हि जीवितस्य किं मूल्यम्? यदि दुःखं न स्यात् तर्हि सुखस्य किं नाम मूल्यम्? यदि रात्रिर्न स्यात् तर्हि किं नाम दिवसस्य मूल्यम्? एतयोरन्यतरस्य क्रमव्यत्ययः स्यात् तर्हि प्रपञ्चोऽयमयथातथो भविष्यति। यद्यस्मिन् लोके 100 प्रतिशतं नीति सुख धर्मसन्तृप्त्यादय एव स्युः तर्हि अयं लोकः भूलोको न स्यात्, स सर्वेषामस्माकं सङ्कल्पे विद्यमानः स्वर्ग एव स्यात्। तत्र मनुष्यैरस्माभिर्न वस्तुं शक्यते। तथैव यद्यत्र अनीत्यधर्मपराजयदुःखादय एव शतं प्रतिशतं स्युः स नरक एव स्यात्। न स मानवानामस्माकमावासयोग्यः। यदि मानवस्तर्हि स हसति रोदिति, जयति पराजयते, उन्मीलयति, निमीलयति, जायते म्रियते च। तस्य लोको न केवलं ज्योतिर्मयः न केवलं अन्धतमसावृतः। तत्र दिनमस्ति, रात्रिरस्ति, जनिरस्ति, मृतिरस्ति, तं द्वन्द्वानि शासति। तस्य सुव्यक्तं किमपि चङ्क्रमणक्रमोऽस्ति। सः क्रम आर्षभारते आधुनिकभारते च समान एव।

---

would be no death what is the value of life? If there would not be misery what is the value of mirth? The same case is with the night and day, honour and dishonour and so on. Without these pairs the universe will be unture and extinct. If, in this world 100% of good qualities would remain, this would not be **Bhooloka,** it would be the heaven which exists only in our imagination. We, the human beings, cannot live in such a world. Similarly if there would be 100% of the noxious qualities in this world it would be hell. It also is not worth-living for human beings. If a man, he laughs and cries, wins and defeats, opens and closes his eyelids, takes birth and dies. His world is neither eversplendid nor ever dark. The pairs govern him. They have an unequivocal and systematic order of movement as their own. That order is the same in both old and modern ages.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्माकं कर्मसु यत्र यत्र धार्मिकमूल्यानि प्रभूतं प्रतिफलन्ति तादृशानि कर्माणि तन्नियामकान् संस्कारांश्च वयमाद्रियामहे, यतस्तानि समाजस्य सुखजीवितायोपयुज्यन्ते। सर्वेऽपि मानवाः जननात् प्रभृति सुखमभिलषन्ति। यथा नाविकाः सर्वदा जागरूकाः सन्तः तरङ्गान् उल्लंघ्य नावो नयन्ति तथैव मानवा अपि अभिमुखमापतन्ति दुःखानि परिहृत्य पुरो गच्छन्ति। अतस्तेषां धार्मिकेषु कर्मस्वाभिमुख्यं स्वत एवोत्पद्यते। 'धारणाद् धर्म इत्याहुः' इति खलु धर्मशब्दस्य निर्वचनम्। एवं च यैर्यैः कर्मभिः समाजः क्षेमेण वर्तेत तादृशान्येव कर्माणि धार्मिकानीति सिद्धम्। तद्विपरीतानि अधार्मिकाणि च। एतया दिशा यदि विचिन्त्यते तर्हि नवीनसंस्कारादधिकं पुरातनसंस्कारः धर्मिकमूल्येष्वधिष्ठित आसीदिति कैश्चिदुदाहरणैरनुमातुं शक्यते।

समाजस्य संस्कृतिः तत्साहित्ये प्रतिफलति। एवं च समाजस्य विचारविकाराणां दर्पणं एव साहित्यं नाम। आर्षभारते साहित्यसमुच्चयेषु अतितरां व्यापिका सामान्यजनसंबद्धा समुत्तेजिका च साहित्यसृष्टिः महाभारतमिति

The deeds which reflect the values of virtue more than that of vices, are welcomed by the society because those are essential for its happy and progressive existence. Man wants happiness and progress right from his birth. Just like a boat-man paddles his boat and moves ahead crossing huge waves impending upon him with much care, man also advances in his life avoiding difficulties and miseries which come towards him. Hence he will be naturally compelled to do virtuous deeds. The definition of the word **Dharma** is "that which sustains the society is Dharma" It results in the fact that the deeds which maintain the society with welfare are virtuous, and that which are contradictary to it, are vicious. If we view the topic in such a way, we can presume that the ancient culture is more enriched with virtues than the modern culture.

The culture of a society is reflected in its literature. In other words, the literature is a mirror of thougts and emotions of the society. It is an unequivocal fact that the **Mahaabhaarata** is the most precious literary work among the ancient literature, because it is a vast com-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सर्वसम्मतम्। वेदा उपनिषदश्च सांस्कारिकविषये महाभारतस्याधस्तात् स्थातुमेवार्हन्ति। कथापात्रसहस्रद्वारा मानवहृदयान्तर्गतानां अनेकप्रकाराणां विकाराणां विचाराणां च आविष्करणं तत्र स्फुटं सुशक्तं च कृतमित्येतत् तस्य सर्वोत्तमत्वस्य हेतुः। लौकिकताया व्याप्तिः आध्यात्मिकताया अगाधता च इयत् स्पष्टतया न कुत्राप्यन्यत्र प्रकाशिता दृश्यते। आर्षग्रन्थसमुच्चयेषु अतिमहत्त्वं वेदानामेवेति सर्वेऽपि वदन्ति। किन्तु तन्महत्त्वकल्पनं प्रायः तेषां प्राचीनतामवलम्ब्यैव स्यात्। वेदेषु तु प्रकृतिशक्तीनां अद्भुतप्रतिभासानामग्रतः तदुद्गातारः अद्भुतपरतन्त्रा भवन्ति। तादृशशक्तीनां देवताः ते स्तुवन्ति। केवलं आधुनिकानां शाखोपशाखितानामतिविपुलानां शास्त्राणां किन्तु मानवसंस्कारसाकल्यस्य अङ्कुरदशा अव्यक्तरूपेण वेदेषु तत्र तत्र दृश्यते च। प्रायशो मन्त्रा उदात्तानां विचाराणां प्रतिफलनमिति वक्तुं शक्यते। (मं-1, सू 161, अ-2, अ-3, वे- 7. 8. 9. 10) अनन्तरकालेषु समुत्पन्नानामुपनिषदां बीजानीव तत्रतत्र कतिचन अध्यात्मिकचिन्ताश्च तेषु दृश्यन्ते। ऋग्वेदः

---

mentary on various kinds of human life. The position of Vedas and Upanishads is below Mahaabhaarata in many aspects. The greatness of the Mahaabhaarata lies in the peculiarity of picturesque presentation of various kinds of emotions and thoughts hidden in human heart through thousands of characters and incidents. No where such worldly breadth and spiritual depth are seen to have described with such clarity. Scholars gave maximum importance to the **vedas** among ancient literature of India. But that importance would have been given with regards to the priority of time. The **Rishis** became moved with wonder at the sight of manifolded manifestation of nature. They praised the deities of nature. In **vedas** we can rarely see the sprouting stage of not only the modern science which has now spread out into various branches but of the whole of the human culture also. Ofcourse we see more or less the vedic **Mantras** are real reflection of noble thoughts. But here and there some **Mantras**, seem to be ignoble and silly also. (Rigveda M. 1 161, A2, A3, V7, 8, 9, and 10) Just like the seeds of Upanishads that came into existence later, some spiritual thoughts are seen to have scattered here and

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पद्यप्रधानः, यजुर्वेदः गद्यप्रधानश्च । सामवेदः प्राय ऋग्वेदमन्त्राणां गानात्मकाविष्करणमेव । अथर्ववेद एतेभ्यो विलक्षणः । कुहचन कुहचन अथर्ववेदः भाषया प्रमेयवैविध्येन च ऋग्वेदसदृक्षः । तत्र मन्त्राणामिव औषधानामपि प्राधान्यं दत्तम् । किन्तु बहवो मन्त्रा आभिचारप्रधानाः । अत एव तस्य स्थानं वेदेष्ववरमभूत ।

अनन्तरकाले समुत्पन्ना उपनिषदः आत्मीयकार्येष्वेव तत्परा अभवन् । ता मानवजीविते आत्मन एव प्राधान्यं ददुः । आत्मैव शाश्वतोंऽशः अतस्तस्यैव प्रामुख्यं कल्पनीयं, शरीरं तु क्षणिकमेव ततस्तदप्रधानमेवेति „ब्रह्म सत्यं जगन्मिथ्या" तत्त्वे ता अधिष्ठिता दृश्यन्ते ।

उपनिषदः शताधिकाः सन्ति । तासु सर्वास्वपि जीवितस्यैकदेशभूतस्यात्मनः सर्वप्राधान्यमेव प्रतिपाद्यो विषयः । तासु भूयिष्ठा अपि अद्यतने काले ।

---

there in it. **Rigveda** is mainly a collection of verses and **Yajurveda** mainly of prose. **Samaveda** is more or less the same verses of Rigveda which are suitable for singing. **Atharvaveda** is different from these three in some aspects. In Atharva importance is given equally to **Mantras** and **Oushadhas**. Both of them are intended for spell and enchantment. That is why the Atharva got the last ranK among vedas.

Upanishads, that come into existence later on, are seen connected with only spirlual aspects. They gave importance to Aatman in human life. The eternal part of man is Aatman. Hence, the importance. Since the body is mortal, they say it is not important. Thus the Upanishads, based on the doctrine that Bhrahman is eternal and the cosmos is illusion, established themselves in their own field.

Upanishads are more than one hundred in number. All of them give much more importance to the Aatman. Most of them are seen as mere imitations just like the dictionaris being brought out by

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रकाश्यमानाः कोशग्रन्था इव केवलं अनुकरणरूपा दृश्यन्ते। अत एव ता विरसाश्च। तासु व्यक्तिवैलक्षण्यविशिष्टा दश वा पञ्चदश वा स्युः। अत एव शङ्करभगवत्पादैः तासु दशैव व्याख्याताः।

पात्रवैचित्र्यं संभवबाहुल्यं प्रमेयवैविध्यं दर्शनवैपुल्यं साधारणजनानामभिगम्यता इत्यादिभिरनेकैः वैशिष्ट्यैरत्यद्भुतः कश्चन ग्रन्थएव महाभारतम्। अपि चायं ग्रन्थः आत्मीयलौकिकयोः परस्परं तावदन्तरालं न कल्पयति। तथैव प्रपञ्चस्तथा तदनुबद्धं सर्वमपि द्वन्द्वविधेयमेवेति सिद्धान्तं महाभारतमेव प्रख्यापयामासेति प्रतिभाति च। अपारस्यातिविपुलस्यास्य द्वन्द्वात्मकप्रपञ्चप्रवाहस्य सर्वमपि तत्र लभ्यते। गौरवं, लाघवं, 'सुगन्धो दुर्गन्धः, पतनमुत्पतनं इत्यादिसर्वमपि तस्मिन् सुलभमेव। पण्डितैरभीप्स्यमानात्मतत्त्वापप्रथनादधिकं तस्मिन् सामान्यजनानां दैनंदिनजीविते अंगीकरणीयानां धार्मिकमूल्यानां तदाचरणमार्गाणां च प्राधान्यं प्रदीयते। सोऽयं

---

he modern publishers. So they seem to be very dry. Among them, a few are seen marked with originality. That is why Bhagavan Snkaracharya made commentary only on ten among them.

Mahaabhaarata is a wonderful work with numerous peculiarities like varieties of characters, plenty of events, colourfulness in matter breadth in views approachability to common people etc. Moreover the most notable factor in it is that it does not give a gap between Loukika and Atmeeya And also only Mahabharata seems to be stressing on the theory that the universe and everything connected to it, is dependent on the pairs. All that in this broad and wide universe of pairs, is available there. We see the gravity and silliness, sweet scent and foul smell, ups and downs all such things in it. More importance is given to the spiritual values and to the methods of their practice to be assimilated in day to day life of common people, than to the philosophical analysis with which a set of scholars is interested. This invaluable work is indeed a milky ocean

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

महाग्रन्थः पयःपयोधिरेव । सामान्यजनानां तृषां निर्वापयितुमयमेवालं-भवति । क्षमावन्तस्तु तस्मात् आवश्यकानि रत्नानि सञ्चेतुं च प्रभवन्ति । आर्षभारतसंस्कारस्यात्युज्ज्वलदीपशिखा तत्रैव देदीप्यते । भागवतमत्युत्तम-भक्तेरेव प्राधान्यं परिकल्पयति यया विना जीवितं निरर्थकं भविष्यति । रामायणं तु गुणवन्तं वीर्यवन्तं च कथापुरुषमवलम्ब्य विरचितं किमपि काव्यम् । तादृशाः कतिचनान्ये उत्तमग्रन्थाः सन्त्येव । किन्तु ते महाभारतेन तुलयितुं न शक्यम् ।

धार्मिकमूल्यप्रचोदकानां वेदोपनिषदितिहासपुराणानां समुच्चय एव आर्ष-साहित्यमिति व्यवह्रियते । तत् साहित्यं यत् प्रख्यापयति तदेव आर्षभारत-संस्कार इति पदेनोद्दिष्टम् । तदनन्तरमाविर्भूताः कालिदासादीनां रचना आस्वा-दनप्रधानाः । आशयमाकर्षकं कर्तुमुपयुक्तेषु विविधेषु सर्गकौशलेषु ते श्रद्धा-तुमारभन्त । यथोचितमलङ्कारसन्निवेशः, रसपोषणनिष्कर्षः, आलापन सुखार्थं-मुचितानां छन्दसां स्वीकरणं, आख्यानात्मकानां पुराणकथानां इतिवृत्तरूपाधानं,

---

which can quench the thirst of ordinary people and from which a man of patience can collect enough precious jewels. The splendo-ur of Indian culture blazes only in it. Bhaagavata gives importance to the devotion in its most elevated level without which a life would be meaningless. Raamaayana is a great poetical work compo-sed on a valorous hero possessing much good qualities. Of course there are some other brilliant works also. But none of them can be compared with Mahaabhaarata.

The collection of Vedas, Upanishads, Itihasas and Puranas which inspires spiritual values is called the ancient Indin literature. What it proclaims is the culture of ancient India. The works of Bhaasa, Kaalidasa and other later poets are seen stressing on the aspect of appreciation. They seem to be very particular in art of making their works attractive to **Sahridayas** They made their works refined by introducing **Alankaaras** in apt contexts, by stressing on gradual growth of **Rasas**, by adopting appropriate metres fo charming recital, by adapting stories into plots and classifying

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तेषां काव्यरूपकाख्यायिकादि वैविध्यविधानं इत्याद्यनेकविधान् संस्कारान् परिष्कारान् च ते स्वीचक्रुः । ततः प्रभृति आर्षसाहित्यस्य रूपभावौ भिन्नावभूताम् । तानि आर्षभारतसंस्कारस्य रूपान्तराणि इत्यतः तानि नात्र परामृश्यन्ते ।

अत्रातिप्रसक्तः कश्चन प्रमेयोऽपि प्रस्तूयते । अतिबृहता अतिमहता चानेन साहित्यसमुच्चयेन यः परिचयः समासाद्यते सोऽस्माकं जीवितप्रयाणार्थं पर्याप्तं प्रकाशं प्रदातुमेवालंभवति । मा खलु तान् ग्रन्थान् प्रमाणतया कल्पयन्तु । 'वेदाः प्रमाणं' 'श्रीशङ्करः प्रमाणं' 'गान्धिजिः प्रमाणं' इत्यादिप्रवादाः तत्त्वतः सर्गशक्तिमधिक्षिपन्तीव । 'श्रीशङ्करः एवमभिप्रैति' 'गान्धिजिरेवं प्रस्तौति' 'कारल्मार्क्स एवमाचष्टे' अतो नाहं ततो रेखामात्रमपि व्यतिचलिष्ये इत्येवं वदतो नेमिवृत्तीन् प्रति सहताप एवानुसूयते । न केवलं व्यासः शङ्करः गान्धिजिः कारल्मार्क्स, किन्तु क्रिस्तुः कृष्णोऽपि केवलं अस्माकं मार्गदर्शकाः । तैः क्षुण्णान् मार्गान् सम्यक् समीक्ष्य अस्माभिः स्वकीयैः मार्गैः

---

them into Kaavya, Naataka, Akhyaayika etc. Then onwards the Indian literature had changed internally as well as externally. Though such works are derived from the ancient literature they are not dealt with here·

One thing in connection with it has to be mentioned here. The knowledge that we attain from the great voluminous literature is enough to give us sufficient search-light on the path of our life. We never take them as authoritative. The references such as "Vedas are the authority, Sri Sankara is the authority, Gandhiji is the authority" seem to be blaming the power of creation. We can really sympathise with such blind followers. They say that Srisankara spoke thus, Ghandhiji spoke thus, Carl Marx spoke thus and therefore I will not deviate even a single point from the path trodden by them." The great souls like Sankara Gandhiji and even Christ and Krishna are our guides. Paying careful attention to their instructions we must go through our on path. If there would

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रयातव्यम् । आत्मीयकार्येषु श्रीशङ्करादधिकं न किमपि वीक्षणीयमस्ति चेत् तदनन्तरं जनिं लब्धवद्भ्यो नरेभ्यः किमर्थं तादृशेषु विषयेषु विचारयितुं शक्तिरीश्वरेण प्रदत्ता? । राष्ट्रीयकार्येषु कारलमार्क्स एव परमप्रमाणं चेत् पुनः कथं राष्ट्रीयक्षेत्रे एतादृशाः कलहाः समुत्पन्नाः ? । मानवः कस्मिन्नपि प्रमाणे स्थिरं न तिष्ठतीत्येव एतेषां सर्वेषामपि तात्पर्यम् । सर्गशक्तिरनन्ता विस्मापिका च । नरस्याकृतिमुखच्छायाशब्दादय इव तस्य चिन्तापि विभिन्ना विलक्षणा च । अहं न कदापि मम पितामहः स्याम् । किन्तु पितामह-स्यानेके विशेषा मयि सन्त्येव । सर्वेऽपि संस्काराः कालान्तरे सूरणकन्द-इवान्यस्मै जीवं प्रदाय भूमौ विलीयन्ते । वृक्षः अन्यस्मै वृक्षाय जीवं प्रदाय स्वयं जीर्यति । एवमेव संस्कारस्यापि जनि स्थिति लयाः सन्ति । अतः आर्षभारतसंस्कारं अन्यूनानतिरिक्तं तत्स्वरूपे एव पुनरुद्धर्तुम् क्रियमाणाः प्रयत्ना विफलीभविष्यन्ति । यथाकालं रूपान्तरीभूतस्य भारतीयसंस्कारस्य प्रकाशे वयं पुरोगच्छेम । तदर्थं वयं सर्वथा प्रयतेमहि ।

---

be nothing to be searched out in the spiritual field than Sri sankara did, why did the Almighty give the people born after him the thinking power in such matters? If in politics, only CarlMarx is the final authority how could such quarrels and confusions in politics take place in this world? So the real fact is that man will not remain for ever in the same doctrine. The power of creation is endless and wonderful. Just like the form, countenance, sound, contact etc., man's thoughts also differ and distinguish from one another. Never will I be my grand-father. But his many qualities can be seen in me. All cultures after their full growth will become extinct giving birth to a new one. Like creatures the culture also has birth, existence and death. Therefore the efforts to receive the ancient culture in its original form without any alteration are futile as well as impossible. We can proceed being inspired by the light of such culture in its suitably altered form according to the age and environment. For that let us try with all our might.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सार:

धार्मिकमूल्यानां अवगणनैव मानवस्य विपदां व्याकुलतानां च मुख्यो हेतुः। अद्यतनो मानवः स्वजीविते धनमेव सर्वोत्तमं बलमिति तदेव पूजयति, न कदापि मौलिकान् धर्मान्। ततः स ईश्वरदत्तामनुग्रहमयीं मनःशान्तिं न लभते। प्राक्तना भरणाधिपाः यद्यपि परस्परं युध्यमाना राज्यस्य प्रक्षोभमुत्पादितवन्तः अवर्तन्त तथापि ते स्वस्वभावरूपवत्करणहेतुभ्य सामान्यधार्मिकमूल्येभ्यः न व्यतीयुः। तादृशपरम्परायां लब्धजन्मानो दशरथार्जुनादयो बहवो महात्मानः पुराणेषु दृश्यन्ते। स्वकीयधर्मं व्यतिचलनावसरेषु ते स्वजीवितमपि परित्यक्तुं सन्नद्धा आसन्। धनकोटीनामार्जनेन किं नाम प्रयोजनम्। यदि धर्मः नष्टः तर्हि सर्वमपि प्रणष्टम्।

THE GIST

All worries and disasters of man are the outcome of discarding his moral values. Man of today worships money as the supreme power in his life, not the fundamental virtues. Hence he becomes deprived of tranquility of mind, a boon bestowed to him by the Almighty. During ancient days though the rulers ware fighting with each other creating chaotic situation in the country, they were not seen deviating from certain common principles which had moulded their character. In such linage, we see many brave ones in Puraanas like Dasaratha, Arjuna and so on. They were daring to throw even their life away when they had to face such junctures as to turn aside from the paths of principles. Even though one may earn crores and crores, if principle lost, everything is lost.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

धर्मच्युतिः

केवलभौतिकताप्रधाने अद्यतने जीविते अशान्तिमर्शचिं च समापन्नो मानवः कुतोऽपि कथमपि शान्तिं न लभते । जी'वते सर्वत्रापि धार्मिकमूल्यावगणनैव तस्य सर्वस्यापि हेतुः । यदुद्दिश्य यदारब्धं तत् तत्र नोपलभ्यते । तद्विपर्ययाः तत्र दृश्यन्ते च । अद्य विद्यालयेषु विद्या नास्ति । अखिला अविद्याः तत्र नृत्यन्ति च । देवालयेषु दैविकी विशुद्धिर्नास्ति, तदितराः सर्वा अशुद्धयस्तत्र सुलभाश्च । न्यायपीठे नीतिर्विह्वला वर्तते । तदधुना 'राष्ट्रीयेण' दूषितमास्ते । राष्ट्रभरणस्य प्रजापालनं न लक्ष्यम् । अधिकृतानां स्वार्थलाभार्थमेव तत् परिणतम् । सर्वमपि लक्ष्यात् भ्रष्टम् । सर्वत्रापि वित्तस्य प्राधान्यं दृश्यते । अद्य वित्तमखिलमपि भुवनं शास्ति । धर्मो वित्तस्य

Downfall from virtues

No where does a man of today distracted with worries and disasters, find tranquility in his material life. The cause for all this is that he ignores moral virtues in every aspect of his life.. The purpose for which anything is embarked on, is not morally served and hence we face adverse result. Now, there is no lea n'ng in the schools. On the contrary, all nuisance is seen there. In temples we do not experience the divine sanctity. Instead, all impurities are seen there. In judicial courts truth and justice stand trembling. They are polluted with politics. The aim of the government is not the welfare of the public. It has become a tool to serve the vested interests of the parties. All have deviated from their goals. Every where we see the importance of money. It rules every thing in the world. Virtues become the slaves of money. They, being help-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मृत्यः सञ्जातः । धर्मो निराधारः प्रभोराज्ञामनुवर्तते । एतादृशे शासन-संविधाने कथं मानवानां जीवितं स्वैरं भविष्यति ? मौलिकमूल्यान्यवगणय्य समाकलितं शासनं कथं सुशक्तं भविष्यति ? ईदृशीं क्षणप्रभासदृशीमिमां व्यवस्थां कथं शासनपदेन व्यवहर्तुम् शक्यते ?

राज्यभरणरीतिः भारतस्य न खलु नवीनो धिषणाविष्कारः । बहोः कालात् प्रभृति अत्र शासनं सम्पन्नं सम्पुष्टं चासीत् । शासका व्यक्तय एवासन् इति सत्यमेव । अद्येव तदानीं प्रजातन्त्ररीतिः प्रचलिता नावर्तत । राजानः स्वप्रजासंरक्षणार्थं स्वाधिकारं स्थिरीकर्तुम् परस्परं स्पर्धालवश्चासन् । परस्परं युध्यमानास्ते साधारणजनानां जीविते प्रशान्तिं भङ्क्तुं हेतुभूताश्चासन् । तदेतत् सर्वं सत्यमेव । तथापि तेषां शासनं धार्मिकमूल्येऽत्रधिष्ठितमासीत् । आर्जवं सत्यसन्धता त्रिकरणशुद्धिरित्यादिका गुणा एव तेषां सर्वस्वमभूवन् । धनात् प्रतापात् स्वजीवितादपि ते तान् आद्रियन्ते स्म । तुलनार्थमत्र कतिचन दृष्टान्ताः प्रस्तूयन्ते ।

---

less, obey the order of their boss. In such a situation how could the people be comfortable? How could a government be strong enough which ignores the fundamental virtues? How could such a system fickling like lightning be called by the name of government?

As regards India, the system of the government is not a new intellactual invention. Long since a strong and prosperous government had been in existence here. It is true that the rulers were individuals and there was no democracy as we have today. The kings were quarrelling with one another in order to fortify their supremacy and to protect their subjects. They fought with one another and dispelled the peace of public life. All this is true. Still their governments were based on certain moral values. Their only wealth was some virtues like straight-forwardness, truthfulness, purity of thoughts words and deeds. They regarded them higher than their worldly wealth, glory and even their own lives. We see a number of examples from our Puraanic characters for the fact.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दशरथः मृगयार्थं वनमगच्छत् । तत्र सरयूनद्याः तीरे रात्रौ स सञ्चरन्नासीत् । तदा नद्याः जलमानेतुं कश्चिद् मुनिकुमारस्तत्रागतः । स कुंभं जलेनापूरयत् । जलपूरणशब्दं श्रुत्वा हस्तिनः जलपानरवंभ्रान्त्या स राजा शब्दभेदिनं नाम शरं तदभिमुखममुञ्चत् । शरेण विद्धो मुनिकुमारः उच्चैराक्रन्दत् । क्रन्दनं श्रुत्वा स्वं प्रमादमवबुध्य स तत्सकाशं प्राप । कुमारात् स राजा वृद्धतापसयोरन्धयोः पित्रोर्दशां अजानात् । कुमारस्तत्रैवाम्रियत । राजा वृद्धतापसयोराश्रमं प्राप । स्वं प्रमादमपराधं च स कथमपि तौ न्यवेदयत् च । तयोरर्थनया राजा तौ नदीतीरमनयत् । तौ राज्ञा विरचितां चितां प्रविष्टौ । तदा तौ वृद्धतापसौ तमशपताम् । तं शापमादाय स राजधानीं न्यवर्तत च । इयं कथा रामायणात् अस्माभिर्ज्ञायते ।

Dasharatha went to the forest for hunting. There, on the bank of the river **Sarayu**, the king was roaming about at night. Then an ascetic boy reached the river to fetch water. The boy filled up the pot with water. The king heard the sound of filling the pot and thought that it was a sound of an elephant drinking water from the river. He shot an arrow called **Shabdabhedi** towards him. The ascetic boy was pierced by the arrow and cried aloud. Hearing the cry and understanding his mistake, the king rushed towards the boy. From him the king knew about the position of the old and blind parents of the boy. Soon the boy breathed his last. King reached the old sage's hermitage according to the request of the boy and somehow intimated his mistake to them. With their request the king took them to the dead body of their son in the river bank. He prepared the pyre for them. Entering the pyre the old couple cursed the king. Having received the curse the king returned to his capital. This is an event, we learn it from the Raamaayana.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स्वेच्छानुसारं नीतिमनीतिं कर्तुम्, अनीतिं नीतिं कर्तुम्, तथा सत्यम-सत्यं कर्तुम् असत्यं सत्यं कर्तुम्, च निपुणेभ्यः अद्यतनशासकेभ्य एतादृशीं कर्तव्यनिष्ठां धार्मिकधैर्यं च कथमस्माभिः प्रतीक्षितुं शक्यम ? केनापि पापकर्मणा तेषां मनस्साक्षी न कदापि दूयेत । ते सद् असद् वा न गणयन्ति । ते सदा चपलस्य वास्तुशिलातलस्योपरि सामुदायिकं स्वं महत्त्वं शक्तिं च द्रढयितुं वाञ्छन्ति ।

दशरथेन संबद्धामिमां घटनामधिकृत्यात्र किञ्चिद् विचारयामः । किमर्थं दशरथः पुत्रमरणवार्तां निवेदयितुं वृद्धतापसयोरन्तिकं गतः ? तस्मात् दौर्भाग्य-समापातादात्मानं रक्षितुं तस्य सुसाधमासीत् । तत्र किं संवृत्तमिति न केनापि ज्ञातम् । यदाऽस्माभिरेतदधिकृत्य गाढं चिन्त्यते तदा मानुषिकमूल्यानां गौरवं विपुलतां परिशुद्धिं चावगन्तुं शक्नुमः । यदि स तथा न कुर्वीत तर्हि तस्यान्तःकरणं दूषितमेव स्यात् । तादृशेन जीवितेन किं नाम प्रयोजनम् ? अदूषितान्तःकरणं जीवितम् ! तस्मिन् सर्वमपि धार्मिकमूल्यमन्तर्भवति ।

Can We expect such moral courage and dutifulness from our rulers of this age who are experts in changing truth into untruth, untruth into truth, justice into injustice and injustice into justice according to their will and pleasure ? Their conscience will not feel hurt by doing any kind of sinful act. They don't care for wrong or right. They want to fortify their power and status in the soceity on an ever shaking foundation.

Let us think over the event connected with **Dasharatha**. Why did **Dasharatha** go to the old ascetics to intimate the news of the demise of their son? He could have easily escaped from creating such an occasion of misforture for himself. Nobody knew what happened there. When we go deeper into it we can understand the sanctity, pervasion and gravity of real human virtues. Had he not done so, his conscience would have been polluted for ever. What for such a life? A life with unpolluted conscience! All moral values lie in it!

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मौलिकतत्त्वदीक्षैव मानवसंस्कारस्य सर्वप्रधानं मूलं सारश्च । यदि स विनष्टा तर्हि नरेण न किमपि प्रयोजनमस्ति । तेन न किमपि शक्यं च भवति । स महतां शक्तिविशेषाणामाकरोऽस्तु नाम, यदि स ततो भ्रश्यते तर्हि नदीप्रवाहे भ्रष्टपद इव गजेन्द्रः निरवलंबं निर्लक्ष्यं च प्रवहत्येव । स्वीये मौलिके तत्त्वे सर्वास्वपि दशासु अचञ्चलं स्थातुं स शक्नुयात् । अन्यथा स न जीवति; किन्तु केवलं श्वसन्नास्ते ।

अत्र सन्तानगोपालकथायां (भागवते दशमस्कंधे ८९ तमे अध्याये द्विजकुमारानयनकथा) अर्जुनोऽतिविशिष्टमन्यदुदाहरणम् । "दशमं सुतं जीवयिष्यामी"ति द्विजाय स प्रतिज्ञातवान् । "अन्यथा अग्निं प्रवेक्ष्यामि" इति च ।

दशमसुतप्रसूतौ अर्भको जातमात्र एव अदृश्यतां गतः । द्विजः अदम्यया शुचा अर्जुनमुपगम्य तमधिचिक्षेप । यथाप्रतिज्ञं सोऽग्निप्रवेशायोदयुङ्क्त । यदैव

To stand stern on fundamentals is the ultimate base and core of human culture. If it is lost, the life is lost. He is not capable of doing anything. Even if he were a store-house of various virtues if he should deviate from it, he would flow on without aim and support like a wild elephant with its steps lost in the current of a river. Man should be capable of standing stern unstirringly on his fundamentals under all conditions. Otherwise he will not be living, but only breathing like animals.

Let us take another example in this context. In the story of **'Santanagopalam' (Dwija Kumaaraanayanam, Adhyaaya 89 Dashama Skandha of Bhaagavata)** Arjuna promises to a Brahmana whose nine sons were lost, "I will enliven your tenth son. Otherwise I will enter into the fire."

In the tenth delivery of his wife, the baby disapeared as soon as it was born. The Braahmana approached Arjuna and reproached, him with uncontrolable grief. According to his promise Arjuna got

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स तदर्थमुज्ज्वाल तदैव भगवानागत्य तं न्यवारयत् । स तमात्मना सह वैकुण्ठमानीय मृतान् ब्राह्मणपुत्रान् अदर्शयत् । स वैकुण्ठनाथात् विष्णोः तानादाय द्वारकामागत्य द्विजाय ददौ च ।

अत्रापि किमपि चिन्तनीयमास्ते । अर्जुनो द्विजाय प्रतिज्ञां वाचैव दत्तवान् । न खलु प्रतिज्ञापत्रं लिखित्वा दत्तम् । अर्जुनस्य वाग्दानं द्विजादन्यः कोऽपि न शुश्राव च । एवं स्थिते अर्जुनः किमर्थमग्निप्रवेशार्थं प्रयतते स्म । "न मया किमपि प्रतिज्ञातम् । द्विजो निरर्थकमेव किमप्युद्दिश्य मय्यपराधमारोपयति" । इत्यलीकमुक्त्वा अर्जुनः स्वीयां मान्यतां संस्थापयितुं प्रभवेत् च । जनास्तु तदेव प्रतीयेरन् । पुनः स किमर्थमात्महत्यार्थमुद्युक्तोऽभूत् ?

एतत् किलार्जुनस्य मौलिकतत्त्वदीक्षाया निकषोपलम् । प्रतिज्ञापालने पराजितः सन् यद् जीवति ततोऽपि वरं मरणमेवेति तस्य दृढा मतिरासीत् ।

---

prepared to enter into the fire. No sooner had Arjuna jumbed into the fire than Lord Krishna appeared there and prevented him. Then the Lord took him to **Vaikuntha** and showed him the lost sons of Braahmana. Lord Krishna received the children from Mahaavishnu, returned to Dwaaraka along with them and gave them to the Braahmana.

Think over this incident also. Arjuna promised the Braahmana only in word; not in writing. Nobody heard his words except that Braahmana. In such a position why was Arjuna prepared to enter into the fire? He could have escaped saying "Nothing was promised by me. The Braahmana simply accuses me with some other purpose," and so on. So he could have saved his prestige. People would have indeed belived his words, not the Braahmana's. As such, why was he ready to commit suicide?

This is a brilliant example of truthfulness, an excellent example for dedication towords the fundamental principle by man. Arjuna was stern in his principle that it was better to be no more than

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

स तद्द् आधुनिकराष्ट्रीयनेतार इव न भाषणैरुज्जुघोष; किन्तु स्वकर्मणैव स्पष्टीकर्तुम् स निरणयत् । एतादृशेष्ववसरेषु भगवानेन सहायो भविष्यतीति तथ्यमपि इयं कथा अस्मान् स्पष्टमाचष्टे । अस्मिन्नवसरे यद्यधुनातनः कोऽपि स्यात् तर्हि तस्य दशा कीदृशी स्यादिति बहुधा बहुशोऽस्माभिरनुभूतमवलोकितं च ।

एतादृशा उदात्ता भावा अद्य कुत्र गताः । मानविकसंस्कारे ईदृशमन्तरं कुतः सञ्जातम् । भौतिकताया अतिप्रसर एवात्र हेतुः । आध्यात्मिकता अद्यतने काले भौतिकतायाः दासीभूता । सर्वेऽपि सुखमभिलषन्ति । प्रतापमभिवाञ्छन्ति च । सुखमित्यस्य प्रयत्नं विना मृष्टान्नलाभः विषयसुखानां अविरामभुक्तिश्च इत्येवार्थः । तदर्थमावश्यका, धर्म्या अधर्म्या वा सन्तु, उपाया एव तेन मृग्यन्ते । इतरापेक्षया समुन्नतपदप्राप्तिः अन्येषां स्वविधेयतापादनमित्येव प्रतापशब्दस्य तात्पर्यम् । मनुष्यस्य जीवितलक्ष्यमत्रैव पर्यवस्यति । तादृशस्य नरस्य जीवितेन किं नाम समाजस्य सिद्धम् । किं नाम तस्य जीविते सम्पु-

---

to be alive and to have failed to keep his word. He did not proclaim his principle by delivering speeches on platforms as modern political leaders do, but decided to exemplify it by his own deed. This event tells us clearly also the other fact that the Almighty will protect us at such junctures of dedication. If anybody of the present generation should fall on such a critical juncture, what would be the result? We have seen and experienced it in several times and several ways.

Where did such noble sentiments go to day? Why has such a vast gap occurred in human culture? The only reason we can see, is the domination of materialism over spiritualism. All seek some short-cut for it though they be righteous or not, to attain higher position than other's and to bring others into subordination. Status means only this much. The ultimate goal of life ends here itself. What is the gain to the society by the life of such a man? What is the totality of his life? What did he afford to his society? What

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ञ्जिनमास्ते ? किं नाम तेन दत्तं स्वसमाजाय ?तस्मात् किं किं तेनादत्तम्? एतदधिकृत्य यदि विमृश्यते तर्हि तदेतद् व्यक्तं भविष्यति, तेन यदुपात्तं समाजात् ततोऽल्पमेव तेन तस्मै दत्तमिति । तादृशैर्नरैः न कोऽपि लाभः समाजस्य सञ्जायते । आदानादधिकं यो दातुं प्रभवति स एवोत्कृष्टो भवति । अन्यथा निकृष्टश्च । अद्यतना जना आदाननिरता एव दृश्यन्ते । अत एवास्माकं संस्कारो नीचैः नीचैः पतति । ईदृशे दशाविशेषे शासनात् प्रभृति व्यक्ति-पर्यन्तं सकलमपि घटकं दूषितं जायत इत्येतत् स्वाभाविकमेव । अतः समाजः सर्वदा निरन्तरास्वास्थ्येन क्लिष्टश्च संपत्स्यते ।

इयं दीनदशा समाजादपाकरणीया । को नामात्रोऽपायः । वयं सुदृढं वदामः, पौराणिकमौलिकतत्त्वानां पुनरुज्जीवनमेवात्र परमो मार्गः । तत्परि-चयार्थं तद्भाषावगाह एव प्रथममावश्यकः । तदवगाहं विना भारतीयानां मौलिकतत्त्वावबोधः अपूर्ण एव स्यादिति वयमत्र निश्चयेन ब्रूमः ।

---

did he accept from his society? If we think over it with an analytical view, it will be clear that he accepted more from his society and afforded less to it. Society makes no progress with such people. The more one gives to his society the greater becomes his worth; otherwise, he is worthless. The present generation is accustomed to receive, not to give. That is why our culture is going down and down. In such a position every factor-from the government down to the individual, will be polluted and the society will suffer from chronic uneasiness.

This pitiable state has to be removed from our society. What is the way for it? We would vehementally say that the revival of our puranic culture is the only means for it. To be acquainted with it, firstly we must learn the language of that culture. We firmly say, withouht learning it, the comprehension of the fundamental principles of our country would be incomplete.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

दिक्कालतः प्रमितिसोऽप्यतिवर्ति सत्यं
विद्योतते करतलामलकीसमानम् ।
यस्यान्तरङ्गभुवि, तच्चरणारविन्द-
लग्नां परागकणिकां शिरसा वहामि ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

धार्मिकमूल्येषु अतितरां सम्पन्नं वैदिकं पौराणिकं च संस्कृतसाहित्यं अतिस्पष्टायां अतिसरलायां च भाषायां लिखितमास्ते। कालक्रमेण पण्डिताः भाषायाः तादृशान् गुणान् अदूषयन्, स्वकीयकृतिषु कृत्रिमतां स्वागतीकर्तुम् ते आरभन्त च। भाषाया भावांशं ते नागणयन्। धैषणिकशक्तियुक्ताः विद्वांस एव समाजे उन्नतपदमधिरोप्यापूज्यन्त। अतः तादृशविदुषां नियन्त्रणे सङ्कुचितोऽभूत् परिधिः संस्कृतस्य। एवं संस्कृतशिक्षा शुष्का नीरसा च जाता। फलतः इयमतिरुचिरा भाषा केषुचन ग्रन्थालयेषु पण्डितजनमस्तिष्केषु च बन्दीभूता। अस्य सङ्कोचस्य मुख्यहेतवस्तु शास्त्रातिप्रसरः, कालानुकूलताया अभावः, मृतभाषाप्रवादः, धार्मिकमूल्यस्यावगणना च।

GIST

The vedic and mythological literature in sanskrit, immensely rich in virtues, was written in very simple language, full of clarity. In course of time such qualities had been degenerated by the scholars and they began to welcome the artificiality in their works. The emotional aspect of the language was ignored and the scholars gifted with intellectual power were given the highest status in the society. As a result the scope of sanskrit literature has constricted under the control of such scholars. Hence sanskrit education became dry and insipid. Consequently this beautiful language has been imprisoned in a few research libraries as well as in the brains of a few individuals. The main reasons for the constriction are the encroachment of Shaastas, unsuitability to the age, interpretation as dead language and the downfall from virtues.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

साहित्ये विदुषां प्रभुत्वम्

भारतीयानामस्माकं प्राचीनः कश्चिदतिबृहत् संस्कृतसाहित्यसमुच्चयोऽस्ति । चत्वारो वेदाः, शिक्षादीनि षड्वेदाङ्गानि, शताधिका उपनिषदः, पुराणेतिहासाः, काव्यनाटकादयः, तदाश्रयाणि साहित्यशास्त्राणि, वैद्यसामुद्रिकादिशास्त्राणि च तस्मिन् समुच्चये प्रधानानि। एतद् वस्तुतत्त्वं सर्वेऽपि जानन्त्येव। किन्तु तत्त्वतः एतानि सर्वाण्यपि साधारणानां जनानां जीविताद् बहुदूरमपसृतानि वर्तन्ते। वेदोच्चारणाध्ययनमधुना भारते केषुचिदेव केन्द्रेषु प्रवर्तन्ते । तेषामर्थावबोधः पुरैव प्रणष्टः । षट्सु वेदांगेषु व्याकरणच्छन्दोज्योतिषाणि त्रीण्येवाधुना प्रचारे वर्तन्ते । आचार्यपादैर्व्याख्याता दशोपनिषदः गीता च केषांचन अस्मीयाचार्याणां

Domination of scholars in literature

We, the Indians, have a vast and precious store of Sanskrit literature. The important works in Sanskrit are the four vedas, six Vedangas like Shiksha, Vyakarana etc. Upanishads, more than one hundred in number, epics, Kaavyas, Naatakas, Poetics based on them, the books on Vaidya and Samudrika and so on. All of us are familiar with the fact. But, in fact, all these things are far away from the life of common man. The chanting of vedas is going on in a few centres in India. The system of comprehension of their meaning ceased centuries ago. Among six Vedangas, Vyaakarana, Chhandas and Jyotisha are very rarely seen in prevalence. Only ten Upanishads and the Bhagavad Geeta which were com-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रभाषणेषु तथा अन्यभाषानुवादेषु च अधुनापि क्लिष्टं जीवन्ति । वैष्णवानां सप्ताहमहेषु तत्र तत्र भागवतमधुना पुनरुज्जीव्यमानमिव लक्ष्यते । अन्ये पुराणेतिहासाः कासांचन पाठशालानां ग्रन्थालयेषु मूकं विश्राम्यन्ति । कतिचन काव्यनाटकानि अलङ्कारवैद्यन्यायवेदान्तव्याकरणग्रन्थाश्चैव अद्य पाठपुस्तकरूपेण अस्माकं परिचिताः सन्ति । एतेष्वपि कियन्ति अधुनातनानां साधारणजनानां जीवितेन संबद्धानि अथवा सम्पृक्तानि इति पृच्छ्यते चेत् उत्तरं दातुमस्माकमतितरां सङ्कोचोऽनुभूयेत । संस्कृतसाहित्ये विविधासु शाखासु असंख्येयाः ग्रन्थाः सन्तीति सर्वेऽपि जानन्ति । किन्तु कति जनाः तानास्वदन्ति अथवा आस्वदितुं शक्नुवन्ति ? सहस्रेषु कश्चिदेवेत्येव उत्तरं लभ्येत । सर्वेऽपि वयं एतां दिव्यभाषामध्येतुमभिलषामः । किन्तु येन केन वा प्रकारेण यदि प्रलोभनं नास्ति चेत् सर्वेऽपि तस्मात् विमुखीभवन्ति । कस्तत्र हेतुः ? विचिन्त्यमानेऽस्मिन् विषये इदं स्पष्टीभवति यद् संस्कृतभाषाया अध्यापनरीतिः कालानुकूलं परिवर्तिता न वर्तते । प्राचीना रीतिराधुनिको मनुष्यश्च परस्परं विसंवदतः ।

---

mented upon by Shankaraachaarya narrowly survive in their translations and the speeches of some spiritual teachers. Bhaagavata seems to be a bit enlivened during **Saptaahas** conducted by some Vaishnavas here and there. All other epics take rest in the libraries of a few educational institutions. As the texts, prescribed for some courses in Sanskrit, only a few Kaavyas, Naatakas, rhetoric and some books on Vaidya and Nyaaya are familiar to us. If one would ask how many books among them influence the common man, we would feel hesitant to answer. Every body knows that there are books in various branches of Sanskrit literature. But how-many do appreciate them or can appreciate them? We can answer;" one among thousands." All are desirous to learn the divine language. But everybody turns away from it unless he is tempted by some other motives. What is the reason? When we think over it, it is clear that the method of teaching sanskrit is not modified to suit the modern age. Old method and the modern man do not see eye to eye.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कालो यथा यथा पुरो गच्छति तथा तथा जीवितसंबद्धाः सर्वेऽपि समूलपरिणामविधेया भवन्ति। तदनुसृत्यास्माकं जीविते बहवः परिष्काराः संभूताः। किन्तु यत्र न तात्त्विकः कोऽपि परिणामो जातः स संस्कृतशिक्षाविषय एव। तत्र प्राचीनैव शिक्षारीतिरघुनाप्यवलम्ब्यते। वस्तुतः संस्कृतभाषाप्रचारप्रसाराशं सत्स्वपि शासनैरन्याभिः संस्थाभिश्चाविष्कृतेषु विविधेषु प्रबन्धेषु, संस्कृतशिक्षाया यथोद्दिष्ट विकासो न सञ्जायते। प्रायः सर्वेऽपि प्रबन्धाः संस्कृतस्यापदाने अथवा स्तुतिवादे एव पर्यवस्यन्ति। तत्तु तावदस्माकं नावश्यकं यावत् तदधीतिरावश्यकी। तदर्थमस्माभिः प्रयत्नः कार्य एव। विदेशीयभाषाध्ययनविषये भारतीयैरस्माभिः यः प्रयत्नः क्रियते तमपेक्ष्य अन्यैः कैश्चन हेतुभिः किञ्चिद् लघीयानेवायं प्रयत्न इत्यनुभवेनैव ज्ञायते। तद्विषये ये नाम मौलिकाः प्रत्यूहाः सन्ति तदपाकरणमेवात्र सुगमो मार्ग.। के नाम ते प्रत्यूहाः ? अत्र ते परामृश्यन्ते। प्रथमः, शास्त्रातिप्रसरः। द्वितीयः, कालानुकूलताया अभावः। तृतीयः, मृतभाषाप्रवादः,। चतुर्थः, धार्मिकमूल्यस्यावगणना च। अत्र विव्रियते।

As quickly as the time advances, all things related to the human life become liable to change. Accordingly everything in our life has undergone considerable change. But the vital and essential change has not yet taken place, in sanskrit study. It is still more or less based on the old system. Though there are several schemes introduced by the Government and some other institutions for the propagation and popularisation of sanskrit, there is little of the progress in sanskrit education which we would expect. All these things mainly end in the mere praise of Sanskrit. We require its study rather than its praise. For that, we have to make an effort. As regards an Indian this effort is not so much as to learn a language foreign to him in some aspects. In Sanskrit-study there are some handicaps which we must avoid as far as possible. This is the easy way to learn it. Which are the handicaps? Mainly there are four. Among them the first is the encroachment of Saastras. The second, non-conformity with the age, the third, a popular belief that Sanskrit is a dead language and the fourth is the discard of virtues. It is explained here.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुरातनानां मुनीनां काले संस्कृतभाषा सरला सरसा सार्वजनीनी चावर्ततेति तत्तन्मुनीनां तत्तद्वचनाभ्यो वयमनुमातुं शक्नुमः । न खलु तासु कठिनाः समासग्रन्थयः, न च तासु साधारणजनानां अपरिचिताः शब्दाः, न वा भावानामस्फूर्तिः, न वा विचारधाराणां प्रतिबन्धस्तत्र विद्यते । सकृद्वाचनेनैव सर्वमपि स्फुटमवगतं भविष्यति । तादृशी तदानीन्तनी भाषाऽवर्तत ।

काले गते तु भाषायां भावांशशब्दांशरूपतया अपग्रथनप्रक्रिया प्रचारमविन्दत । ततः प्रभृति सरला सरसा च सा भाषा द्वैधीकृता पण्डितजनैः । अङ्कुरदशायां वर्तमाना सा भावांशप्रक्रिया क्रमशः क्रमशः प्रवृद्धा पल्लविताशाखोपशाखिता च नैकैः शताब्दैः अलङ्कारशास्त्रव्यवहारमियाय । प्रायशोऽलङ्कारशास्त्रे काव्यानां भावांशस्यैव परामर्शो दृश्यते । अन्या तु शब्दात्मकप्रक्रिया क्रमशः प्रवृद्धा व्याकरणशास्त्रव्यवहारतां प्राप । यद्यपि शाकल्यशाकटायन प्रभृतयो बहवः प्राज्ञाः तां शास्त्रशाखां सम्पोषयामासुः, तथापि तेषां परम्परासु

We can infer from the works of the **Rishis** that Sanskrit, during their age, was very easy, interesting and common to all. We see neither the difficult knot of **Samaasas** nor words strange to the common man nor vagueness in expression and nor hindrance to the flow of thoughts. By once going through them everybody could easily understand their contents. Such was the language in that period.

As time passed, the process of analysis as figures and emotions, took place in the language. Then onwords, the language, which had formerly been simple and interesting, was split up into two by the scholars. The process of the emotional aspect from its initial stage gradually grew up and by centuries it developed, into rhetoric in literature. In rhetoric, in general, the emotional aspect is dealt with. The other aspect, ie. the process of analysis of Sabdas grew up and reached the stage of **Vyaakarana**. Though many scholars like **Shaakalya**, **Shaakatayana** had contributed to this branch, the great **Paanini**, born in their line, enriched the

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जातो भगवान् पाणिनिः शाखामिमां सम्पन्नामकरोत् । भगवता तेन विरचिता सेयमष्टाध्यायी अधुनापि विद्वज्जनानां महाद्भुतमिव वर्तते । एवं च साऽष्टाध्यायी सर्वास्वपि संस्कृताध्ययनशाखासु प्रामाण्यं प्रचारं चाविन्दत । कवीन् पण्डितान् शास्त्रोपजीविनश्च सर्वानपि सा वशीचकार । कालान्तरे प्रगल्भप्रतिभानवन्तः कवयोऽपि पाणिनीयसूत्रविहितानां नियमानामुदाहरणार्थमपि काव्यानि व्यरचयन्नित्यद्भुतमेव पाणिनेर्मास्मरशक्तिः । मध्यशतकेषु तथैवाधुनिकशतकेष्वपि संस्कृतशिक्षा नाम पाणिनीयशिक्षा अथवा तदधिकृत्य लिखितानां सिद्धान्तकौमुद्यादीनामध्ययनमिति साधारणी धारणा समजायत । फलतः संस्कृतशिक्षा सूत्रद्वारा केवलनियमानां पठने कृत्रिमोदाहरणानां निगरणे च संकुचिता जाता । इदं किल विदितमेव समेषामपि शिक्षाविदग्धानां यद् बहुभ्यः प्रयोगेभ्यः नियमानां समाचयनं, तथैव पठितस्यैकैकस्य नियमस्य प्रयोगशतेषु संयोजनं एतादृशा रीत्यैव प्रचारलुप्ता भाषाः स्वायत्तीभवेयुः अध्ययने अभिरुचिर्जिज्ञासा च वर्धेतेति । एतादृशी काचन शिक्षासरणिरेव खिलभाषापठने जिज्ञासामभिरुचिं च वर्धयितुं प्रभवति ।

Shastra by his **Ashtaadhyaayi** which even now remains as a wonder to the intelligentia. So this work gained an important position in learning all branches of Sanskrit literature. The work attracted all scholars as well as the poets. It was its magnetic power that even poets possessing wonderful resourcefulness began to compose poems to exemplify the rules of **Paanineeya** Sootras. It aroused a general notion in the medieval period and even later that the study of Sanskrit meant the study of **Paanineeya** or some books on it like **Sidhaantakoumudi**. As a result, Sanskrit study has been confined to the mere learning of the rules that the Sootras contain and swallowing of certain examples of them. All educationalists are aware that one can master a language which is not in spoken stage, by formulating rules from several usages and implementing them in repeated exercises. Only such a method can create interest and curiosity in study of an unspoken language.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाषा द्वेधा विभक्तुं शक्यते इति पूर्वं खलु प्रस्तुतम् । एको भावः, अन्यत्तु रूपं च । भाव इत्यस्य आविष्करणीय आशय इत्यर्थः । स एव विकारांशः परिगण्यते । आशयाविष्करणोपकरणभूतः शब्द एवात्र रूपमित्यनेन विवक्षितम् । भाषायां शब्दापेक्षया भावस्य प्राधान्यमस्ति । उक्तिशक्तेरसत्त्वेऽपि उदात्तभाववतो मूकान् वयमाद्रियामहे । शब्दरहितेषु चित्रनृत्यादिषु केवलभावोऽस्मानाकर्षति । किन्तु भावशून्यः शब्दो नास्माभिः परिगण्यते । चतुरश्चतुरश्रशोभी च भावो यदा सभ्यैः सरलैश्च शब्दैराविष्क्रियते तदैव सा भाषा उत्तमसाहित्ये अन्तर्भवति । शब्दस्तु आशयाविष्करणार्थमुपयुज्यमानं साधनमेव । वासनाभिरुचीनां स्वभावमनुसृत्य साधनानि विभिन्नानि स्युः । कविः स्वमाशयं पाठकानां हृदये संक्रामयितुं शब्दमुपकरणमवलम्बते । नटस्तु स्वं विकारमाविष्कर्तुं स्वगात्रावयवानवलम्बते । चित्रकारस्तु वर्णरेखादिकानाश्रयते । गायकस्तु स्वं नादम् । शिल्पी तु शिलादार्वादिकानुपयुङ्क्ते । एवं प्रतिभासम्पन्नाः एते सहृदयाः एकमेवाशयं विविधैरुपकरणैः आविष्कर्तुं शक्नुवन्ति । उपकरणं

As stated above the language can be divided in to two components; one is **Bhaava,** the other is **Roopa**. **Bhaava** means the idea to be expressed; ie. the emotional aspect. **Roopa** means the words by woich the idea is expressed. The **Bhaava** has more importance than **Roopa** (Shabdas) in language. A dumb who is not able to speak but has sublime ideas, is respected by us. Portraits, dances, etc. attract us by their emotional aspect, not by words. But words without idea are ignored by us. When nice and beautiful ideas are expressed by simple limited and apt words it is deemed as the best language. the words are only a vehicle to carry the ideas. The vehicle may carry according to the nature of one's **Vaasana** (instinct) and taste. A poet uses words to convey his ideas to his readers' mind. An actor uses his limbs and body as tha medium to express his emotion. A painter uses colours and lines for it. A musician uses his sound. A sculpturer uses pieces of stone or wood. Thus the talented men express the same idea by various media. Whatever may be the media the emotional aspect is most important. We usually

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत् किञ्चिदप्यस्तु, भावांश एवात्र प्रधानम्। वयं सर्वत्रापि शिलादारुशकलान् गात्रावयवान् वर्णांश्च पश्यामः। शब्दं नादं च शृणुमः। किन्तु वयं न तैराकृष्टा भवामः। यदा प्रतिभासम्पन्नः सहृदयः स्वकीयैर्विकारैः अथवा भावैः तान् पूरयति तदैव ते आकर्षकाः सजीवाश्च भवन्ति। शब्दः भाषाया गात्रं भवति, भावस्तु तस्यात्मा च। यथा आत्मा विविधाकृतिभिः स्फुटीभवति तथैव भावः चित्रनृत्यकाव्यादिभिर्विविधैर्भात्रैराविष्क्रियते।

शरीरस्य यावन्मात्रं प्राधान्यं प्रदीयते तावन्मात्रमात्मनः प्राधान्यं क्षीयते। संस्कृतशिक्षाविषये मध्यशतकेषु इदमेव संवृत्तम्। शब्दाडम्बरमुग्धाः कवयः-पण्डिताश्च स्वकाव्येषु अध्यापनरीतिषु च शब्दांशस्य प्राधान्यं प्राकल्पयन्। काव्यावगाहः पाणिनीयावगाहेनैव साध्यः, तदेव वरमिति च काचिद् धारणा समजनि। सोऽयं शास्त्रातिप्रसरः संस्कृतशिक्षायां वैरस्यमुदपादयत्।

---

see the pieces of stone, wood, body and colour and hear sounds and words everywhere. But we are not moved by them. When the emotion of a talented man would impregnate them with idea, they become lively and attractive. **Shabda** is the body of the language and **Bhaava** is its soul. Just like the soul manifests itself adopting various forms of living beings, the **Bhaava** becomes comprehensible to others when it adopts various forms as words, lines, colours etc.

The more we stress on the bodily importance, the more the spiritual importance diminishes. In case of Sanskrit education, this is what happened in medieval period. Poets and scholars who were mad after the show of language, gave importance to the words in their works and also in the curriculam. There arose a general understanding that the **Kaavyas** can be apprecieted only by grammatical analysis and the real appreciation of **Kaavyas** can be done only by this way. Such an encroachment of **Vyaakarana** caused some kind of constriction and dryness in Sanskrit education.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाणिनीयं ननु भाषाशास्त्रविषये अन्यादृशः कोऽपि विस्मापको ग्रन्थः। स तु संस्कृते उच्चशिक्षार्थमत्यन्तमनिवार्यमेव। किन्तु व्यासकालिदासादिसाहित्यमास्वदितुं संस्कृते यावत् परिज्ञानमावश्यकं तल्लब्धुं पाणिनीयपठनं नावश्यकम्। संस्कृते सामान्यज्ञानसम्पादनात् प्रागेव पाणिनीयस्य अथवा तद्रीतिमवलम्ब्य विरचितस्य कस्यापि ग्रन्थस्य पाठ्यपुस्तकतया स्वीकरणं विपरीतफल एव पर्यवस्येत्। तदिदमेवास्माभिरत्र विवक्षितम्। न कदापि पाणिनीयस्यानादरो लाघवं वात्रोद्दिष्टम्।

संस्कृताध्यापनविषये कालानुकूलताया अभावमधिकृत्य अस्मिन्नेव ग्रन्थे बहुत्र बहुशः कथितमेव। अतः तमंशमत्रापहाय मृतभाषा प्रवादमधिकृत्य किमपि प्रस्तूयते।

संस्कृतं खलु देवभाषा। तद्वयं सर्वथा विश्वसिमः। किन्तु ते देवाः आकाशस्योपरि अमृतमास्वाद्य अप्सरोभिः सह ससुखं निवसन् कश्चन

Paanineeya is a wonderful work on linguistics. It is very useful for advanced study in Sanskrit. We need not take it as a text book to attain such a knowledge in Sanskrit as is needed to appreciate Vyaasa, Kaalidaasa and the others. To introduce Paanineeya or any book in the line before attaining a preliminary knowledge in the language will result in an adverse effect. That is what is meant here. No slighting or disregard to Paanineeya is ever meant here.

The unsuitability of the method of Sanskrit teaching to the modern age has been explained in several contexts and in several ways in the book. So leaving it here the next topic, the popular belief as Sanskrit, is a dead language, is discussed here.

Sanskrit is the language of the Gods. By all means we believe it. But we cannot believe, if you claim that the Gods are a set

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जनवर्ग इति कथ्यते चेत् तद् न वयं विश्वसिमः । देवा अस्माकं पूर्वपुरुषाः खलु । अन्तरायाणां सहस्रैः सह संघर्षं कृत्वा विजयैः पराजयैः सुखैः दुःखैश्च उच्चावचा दशा उत्तीर्य समुज्ज्वलं किमपि जीवितमभिप्रयाताः केचन जना एव ते देवाः । तेषां विजिगीषा सत्यान्वेषणाभिलाषश्च अधुनाप्यस्माकं सिरासु प्रवहति । 'देव' शब्दव्युत्पत्तिरेवास्योदाहरणम् । 'दिव्' धातोरेव देवशब्दो व्युत्पद्यते खलु । 'दिव्' धातोः विविधा अर्थाः सन्ति । दिवु क्रीडा विजिगीषा व्यवहार द्युति स्तुति मोद मद स्वप्न कान्ति गतिषु इत्येव पाणिनिस्तस्य धातोरर्थं संगृह्णाति । अस्मादर्थवैविध्यात् जीवितस्य सर्वेष्वपि कोणेषु निपुणं विहृत्य विकासमाप्तास्ते देवा इत्यनुमातुं शक्यते । ते क्रीडन्ति स्म । इतरान् सर्वानपि जेतुमिच्छन्ति स्म । सम्यक् समालोच्य संशयपरिहारार्थं ते चर्चामकुर्वन् । (नानासन्देहहरणाद् व्यवहार इति स्मृत इति कात्यायनः व्यवहारशब्दं व्युत्पादयति ।) स्वप्रयत्नेन ते अशोभन्त । स्वजीवितमनुगृह्णतीः प्रकृतिशक्तीः ते अस्तुवन् । स्वयमानन्दमनुभवन्ति स्म । तस्मिन्नानन्दे ते अमाद्यन् । 'लोकाः समस्ताः सुखिनो भवन्तु' इति ते अभ्यलषन् । एकस्मात्

---

of people who live gaily along with Apsaras drinking nectar somewhere beyond the sky. The Gods are of course our forefathers who were marching towards a splendid life facing thousands of obstacles and surpassing different conditions along an uneven path strewn with pleasures and displeasures, success and failure. Their ambitions to search after the truth still flow in our veins. The derivation of the word **Deva** itself is a proof of it. The word **Deva** is derived from the root **Div. Div** has various shades of meaning. According to **Paanini** the meanings of **Div** are to sport, to be ambitious, to discuss, to shine, to praise, to delight, to be arrogant, to sleep, to wish and to tour. From the diversity of its meaning it can be inferred that the gods are those who got enlightened by cleverly dealing with all aspects of their life. They were sporting-wishing to win over others-thinking-discussing with others to clear doubts-(Thus Katyayana derives the word **Vyavahara**) shining with their own efforts-Praising deities of nature-enjoying pleasures-rejoicing with experiences-wishing all to be happy-conducting tour. Devas

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रदेशात् अन्यत्र ते प्रयान्ति स्म । एवं जीवितस्य वैविध्यं वैचित्र्यं चास्वाद्यानुभूय च प्रवृद्धिमापन्ना जना एव देवाः । अनुभवसम्पन्नानां तेषां विचाराणां तद्गर्भिताया भाषायाश्च महत्त्वं गुरुत्वं च स्वाभाविकमेव । ईदृशा रीत्यैव वयं तां देवभाषां आद्रियामहे आराधयामश्च ।

संस्कृतं मृतभाषेति काचन अलीकधारणा केषांचन सुशिक्षितानामपि विदुषां मध्ये प्रसरति खलु । किमर्थं तादृशी काचन भाषा अधीयते इति च ते पृच्छन्ति । तादृश्या अबद्धधारणायाः प्रसारात् बहवो जनाः तामध्येतुं नाभिलषन्ति । कथमेतादृशी धारणा रूढमूला जाता ? एतं विषयमधिकृत्य किमपि विवरणमत्रावश्यकमिति मन्ये ।

आङ्ग्लभाषाशास्त्रज्ञाः लोकेऽस्मिन् विद्यमानाः सर्वा अपि भाषा जीवद्भाषा मृतभाषा चेति द्वेधा विभक्ताः । भाषणदशायां वर्तमानाः सर्वा अपि भाषाः **living languages** इति विभागे परिगणिताः । अन्याः

---

were the people who became prosperous enduring and enjoying the manifoldness and diversity of life. There should be greatness and gravity in thoughts of such people who were rich in experience and in their language containing them. Only with this aspect we honour and adore Sanskrit.

There is a strong misconception widely spread by some self-styled scholars that Sanskrit is a dead language. 'What is the use of learning such a language? They ask. Due to the propagation of such false notion most people do not dare to study this language. How did such a concept come into existence? I think an explanation regarding this point is needed here. The notion arose and spread in the following way.

European linguists had already grouped the entire languages of the world under two heads, as, living languages and dead languages. The former term included all the languages then in the spoken stage while the latter one was used to denote those langu-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भाषणदशायां न वर्तमाना भाषाः dead language इति विभागे च परिगणिताः। एवं च हिन्दी आङ्गली मलयालादयो भाषाः जीवद्भाषाः संस्कृत लथीनग्रीकादयः मृतभाषाश्च जाताः। भारतीय भाषाशास्त्रविदग्वैस्तु living language इत्यस्य जीवद्भाषा इति dead language इत्यस्य मृतभाषा इति चानुवादः कृतः। आङ्गलभाषायां प्रयुज्यमानो dead शब्दः संस्कृते मृत शब्देन नानुवदनीय इति ते न जानन्ति स्म। द्वावपि शब्दौ न समानार्थकौ। आङ्गल्यां dead शब्दः विविधेषु अर्थविशेषेषु प्रयुज्यते। पश्यत। dead slow, dead capital, dead body, dead letter, dead language, dead loss, dead sleep etc. अत्र dead शब्दः सर्वत्रापि एकस्मिन्नेवार्थे न प्रयुक्त इति स्पष्टमेव। यदि वयं dead slow, dead capital, dead letter, dead sleep इत्यादीनां मृतमन्दता मृतमूलधनं, मृतपत्रं, मृतनिद्रा इत्येवमनुवादं कुर्मः तर्हि को नामार्थः एतेभ्यः समुपलभ्येत। अनुवादः सर्वथा विकृतोऽपहास्यश्च स्यात्। सैवापहास्यता वैकृतं च

---

ages then not spoken by any people. Thus Hindi, English, Malayalam etc had been counted as living languages and Sanskrit, Latin, greek etc, as dead languages. Indian linguists translated these two terms a जीवद्भाषा and मृतभाषा. They had hardly thought that the word 'dead' in English could not be traslated by the word मृत in Sanskrit. Both words are not synonyms. In English 'Dead' is used to connect different shades of meaning—See the usages: dead slow, dead capital, dead body, dead letter, dead language, dead loss, dead sleep etc. Here, it is clear that 'dead' does not convey the same sense everywhere. Suppose we translate 'dead slow', 'dead capital' 'dead letter' and 'dead sleep' as मृतमन्दता, मृतमूलधनं, मृतपत्रं and मृतनिद्रा respectively, what sense can we get from it? The traslation will be completely absurd. The same absurdity we feel if we translate 'dead language'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

dead language इत्यस्य मृतभाषेत्यनुवादेऽपि प्रतिभायात् । अस्यैकस्मिन्नेव de-ad शब्दस्य अनेकार्थेषु प्रयोगो दृश्यताम् । dead slow इत्यत्र dead शब्दस्य अतितरामित्यर्थः । एवं च 'अतितरां' शनैः इत्यत्र तात्पर्यम् । Dead capital इत्यस्याविनिमयात् वर्धनरहितं मूलधनं इत्यर्थः । Dead body इत्यस्य 'निर्जीवं' गात्रमिति । Dead letter इत्यस्य 'प्रेष्यसङ्केतशून्यं' पत्रं इत्यादि । तथैव dead language इत्यस्य प्रचारलुप्ता भाषैवार्थः । संस्कृते एतमर्थं बोधयितुं खिलभाषा इत्येवानुवादो युक्तः । तत्त्वतः भारतीयभाषाशास्त्रविद-ग्धानां अनुवादे संभूतः प्रमाद एवास्माकमिमाममृतभाषां मृतभाषामकरोत् ।

अत्र अथान्यः कश्चन जनप्रवादः प्रचारे वर्तते । आशयविनिमयार्थमेव भाषा प्रयुज्यते खलु । एवं सति खिलीभूतया भाषया किं नाम प्रयोजनम् ? अतोऽस्या भाषायाः अध्ययनं किमर्थमिति ।

बाढम् । अस्या अलीकधारणाया अपाकरणमत्रावश्यकमेव । इदमत्र बोद्धव्यम् । प्रचारे वर्तते; प्रचारे न वर्तते, तथा व्यवह्रियते, न व्यवह्रियते इत्ययं

---

as 'मृतभाषा' । The same word 'dead' is used in different meanings as: dead slow - very slow, dead capital - capital without transaction, dead body - lifeless body, dead-letter - a letter without addressee. Likewise dead language means a language now not spoken or not in current use. In this sense खिल is a better word in Sanskrit and the better translation of dead language is खिलभाषा । So, because of carelessness in translation of the Indian linguists who did not study the sense and usage of the word 'dead', they debased our अमृतभाषा by calling मृतभाषा ।

Here there is another popular belief in prevalence. A language is used to convey ideas. As such, what is the use of a language which is not in currency? What is the use of learning it?

Yes, we have to remove this misconception here. Remember that the attributes like prevalence or non- prevalence or currency

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशेषः भाषाया उत्तमताधमतयोः प्राधान्याप्राधान्ययोर्मापको न भविष्यति। भाषान्तर्गतानां सर्गात्मकानां आकर्षकाणां विचाराणां गुणपुष्कलतामनुसृत्यैव सा महत्त्वमाकर्षकत्वं चावहति। अन्यथा सा सर्वैरप्यवगण्यते। संस्कृतं, लथीन आदयो भाषाः खिलभाषा इत्येतत् सत्यमेव। लोके न कुत्रापि ताः मातृभाषात्वेन प्रचलन्ति। न च ताः शासनभाषात्वेनाङ्गीकृता। तथापि लोके बहुषु विश्वविद्यालयेषु तदर्थं शिक्षाविभागोऽस्ति। अद्यापि ता अध्येतुं छात्राणां प्रवाहः प्रवर्तते। कथमेतत्? । प्रत्युत 'कुम्पारैः' 'पणियै'श्च अधुना भाष्यमाणा भाषाः जीवद्भाषा इति परिगण्यन्ते। किन्तु ताः सर्वैरप्यवगणिताः। विश्वविद्यालयेषु अथवा शासनशिक्षाविभागेषु तासां गणना नास्त्येव। ता अध्येतुं न कोऽपि यतते। कुतः? अत्रोच्यते। या नाम भाषा जीवितस्य सारभूतानि मूल्यानि आवहति, सन्तु नाम तानि सांस्कारिकाणि साहित्यसंबद्धानि धर्मप्रचोदकानि अथवा तादृशानि यानि कान्यपि,

---

or non-currency is not a criterion of the greatness or meanness or importance or unimportance of a language. According to the quality of creative and beautiful thoughts which a language embodies it becomes great and attractive. Otherwise it would be ignored by everyone. Sanskrit, Latin etc. are, of course, dead languages and no where in the world are they spoken as mother tongues or used as official languages. Still they have got their own faculties in so many universities all over the world. A stream of students is coming forward to learn them even today. Why? On the contrary, the languages which are spoken by 'Kumbaras' 1 and 'Paniyans'2 are considered living languages. But they are neglected by all and no consideration is given to them in universities or even in education department. No one ventures to learn them. Why? We should say that a language which contains the fundamental values of life whether, be it cultural, literary, moral or anything of that sort,

---

1 Potters - a low caste in Kerala speaking an odd dialect.
2 Hill - tribes

Kirtikant Sharma Collection; Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सा भाषा प्रचारे न वर्तमानाऽपि जनैराद्रियते स्वागतीक्रियते च । या नाम भाषा एतैर्मूल्यैः शून्या भवति, जीवद्दशायां वर्तमानामपि तां न कोऽप्याद्रियते स्वागतीकरोति च । संस्कृतभाषा खिलीभूतापि प्रचोदकानां मानविकमूल्यानामाकरः खलु । अतः सा विश्वे सार्वत्रिकतया आद्रियते । 'कुम्पारा'णां पणियानां च भाषासु तादृशानि मूल्यानि न लभ्यन्ते । अत एव जीवद्दशायां वर्तमानास्ताः अवगण्यन्ते । अथ कश्चित् कुम्पारः स्वस्य अपरिष्कृतायां भाषायां किमपि सुन्दरं काव्यं रचयेत् अथवा किमपि सारवत् साहित्यं सृजेत् तर्हि तां अध्येतुं लोकस्य सर्वेभ्योऽपि कोणेभ्यः जना समापतिष्यन्ति । कबीर् कश्चित् दरिद्रस्तन्तुवाय आसीत् । स सरलया रीत्या स्वस्या अपरिष्कृतभाषायां स्वकीयानत्युज्ज्वलान् आध्यात्मिकविचारानाविश्चकार । अद्य तु 'कबीर' स्नातकोत्तरमहाविद्यालयेषु गवेषणार्हः कश्चित् विषयः सञ्जातः । तस्य दोहाः पदानि च हिन्दीभाषायां उच्चपरीक्षार्थं पाठ्यविषयतया निर्णीतानि ।

---

is welcomed and respected by generations even though it may not be currently spoken. No one welcomes or honours any language which lacks these values though it may be living. Sanskrit is a store house of inspiring human values though it is dead. So it is universally respected. No such values are noticed in the languages of 'Kumbaras' or 'Paniyans'. That is why they are neglected though they are living. Suppose a 'Kumbara' writes a beautiful poem or produces any substantial work in his unrefined language, we can see the people rushing from every corner of the world to learn it. **Kabir**- a poor weaver-expressed his splendid phylosophical thoughts in his unrefined language in a very simple way. Today **Kabir** is one of the subjects for research for post graduates. His Dohas and Padas are prescribed for higher courses of studies in Hindi.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं च भाषाया महत्त्वं अल्पत्त्वं च प्रचारेण अप्रचारेण वा न परिगण्यते, किन्तु तदन्तर्गतेन गुणवत्त्वेन गुणाभावेन च, इत्येतं केन्द्रबिन्दुं वयं समापन्नाः स्मः । सर्वेष्वपि कालेषु वर्तमानानां मानवानां ज्ञानमुद्दीपयितुमुत्तेजयितुं च पर्याप्तान्यसंख्येयानि उज्ज्वलानि रत्नानि संस्कृतभाषायामन्तर्भूतानि । यावत् मानवसमाजो वर्तते तावत् संस्कृतमम्लानप्रभवमवस्थास्यते ।

So we have arrived at the point that the greatness or littleness of a language is measured not by the criterion of its currency or non currency but by the merits or demerits of the literature, it contains. Sanskrit is a language which contains countless precious gems capable of inspiring and enlightening human beings of all ages. As long as humanity exists Sanskrit will survive with its unfading splendour.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

शासनैः तथा अनेकाभिः संस्थाभिः संस्कृतप्रचारणार्थं अनेकाः प्रणाल्यः प्रचाल्यन्ते । तथापि जिज्ञासून् संस्कृताभिमुखमाक्रष्टुं न ताः सर्वा अपि पर्याप्ता भवन्ति । कुतः ? आधुनिककालोचितां भाषाध्यापनयोजनामाविष्कर्तुम् न कोऽपि प्रयतत इत्येवात्र मुख्यो हेतुः । अथ च व्याकरण न्यायादिशास्त्राध्ययनमेव संस्कृतपठनेनोद्दिष्टमित्यस्मिन्नभिप्राये वयमधुनापि सुस्थिरं तिष्ठामः । अस्मज्जीवितं परिपोषयितुमावश्यकं प्रकाशं ददानानि काव्यनाटकपुराणान्येव अस्या दिव्यभाषाया हृदयं किल । तादृशसाहित्येषु अवगाहस्य आस्वादनशक्तेश्च सम्पादनानान्तरमेव शास्त्राध्ययनाय विद्यार्थी प्रयतेत । शास्त्रं बुद्धिं तीक्ष्णयति, किन्तु साहित्यं हृदयं पावयति ।

THE GIST

Various steps are being taken for propagation of Sanskrit by several institutions as well as the governments. Still all of them fail to attract even desirous ones towards its study. Why? The only reason is that we have not yet evolved such a method of teaching the language as to suit the modern age. More over we stand stern on a belief that Sanskrit study is meant the study of Shaastras like Vyaakarana, Nyaaya etc. It is an absurd conception. Puraanas, Kaavyas and Naatakas which give all kinds of enlightenment to make us prosperous in our life, are the heart of this devine language. Only after becoming capable of appreciation of such works one should proceed with the Shaastras. Sanskrit study, today is quite contrary to such a system. That is why Sanskrit study becomes dry and monotonous. Shaastras sharpen ones intellect, while creative works like Kaavyas purify ones emotions.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शिक्षायां विचारो विकारश्च

अद्य तु शासनैः अनेकाभिः संस्थाभिश्च संस्कृतभाषायाः प्रचारप्रसारार्थं विविधा योजना आसूत्रिताः सन्ति । पाठशालाः प्रचाल्यन्ते । परीक्षाः सञ्चाल्यन्ते । ग्रन्थाः प्रकाश्यन्ते । सम्मेलनानि वितन्यन्ते। पण्डिता आद्रियन्ते । छात्रवृत्तयो वितीर्यन्ते । आकाशवाणीद्वारा पाठा वार्ताश्च प्रक्षिप्यन्ते । बिरुदानि विकीर्यन्ते । एवं संस्कृतप्रचारार्थं सर्वमपि क्रियते । तथापि फलं यथोद्दिष्टं न परिणमति । यथा यथा प्रोत्साहनानि वर्धन्ते तथा तथा शिक्षायाः स्तरः क्षयं प्राप्नोति । संस्कृतं मुख्यविषयं स्वीकृत्य विश्वविद्यालयेभ्यः विजयाह्लादेन बहिरागच्छन्तः छात्रा अपि अनुवादनिरपेक्षं संस्कृतकाव्यपुराणादिकं पठितुं स्वादितुं च प्रायः अशक्ता दृश्यन्ते । दश वा द्वादश वा वत्सरान् संस्कृतम-

---

Intellect and emotion in learning

Today, for the propagation and popularisation of Sanskrit various plans are chalked out by several institutions as well as Governments. Paathasaalas are run. Examinations are conducted. Books are published. Conferences are held. Scholars are honoured. Students are encouraged by giving stipends. News and lessons are broadcast. Titles and degrees are conferred. Everything is done for the spread of Sanskrit. But still the result is not up to the mark. The more the encouragements increase in number the more the standard of study deteriorates. Even the students who come out of the universities with flying colours, taking Sanskrit as main, are generally seen unable to understand and appreciate the Kaavyas and Puraanas without their translations. If the standard of knowledge does not

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीत्यापि संस्कृते लिखितुं सरलसंस्कृत रचनाः अनुवादनिरपेक्षं अवगन्तुमास्व- दितुं च आवश्यकं ज्ञानं न लभ्यते चेत् वर्तमानसंस्कृतशिक्षारीतौ कापि न्यूनता वर्तत इत्यस्मिन् नास्ति कोऽपि सन्देहलेशः । कथमेतत् ? अस्मिन् विषये- किमपि विवरणमावश्यकमिति प्रतिभाति ।

संस्कृतसाहित्यं नाम कश्चिदसाधारणो महासागरः । तस्य सलिलं सकलमपि पातुं न कश्चिदगस्त्यः इतःपर्यन्तं समजनि । अस्मज्जीवितं प्रकाश- यितुं तस्मात् कानिचन समुज्ज्वलानि रत्नानि अन्वेष्टव्यानि च । मनसो भ्रान्तिदानां शुक्तीनां निचयस्तत्र स्यात् । तत्रास्माकं विवेचनशक्तिमुपयोज्य तानि सङ्ग्रहीतव्यानि । तदर्थं संस्कृतसाहित्यमधिकृत्य किञ्चिदवलोकनमत्र प्रयोजकीभविष्यतीति मन्ये ।

संस्कृतसाहित्यं साकल्यतः द्वेधा विभक्तुं शक्यते, वैदिकं लौकिकमिति । वैदिकविभागे वेदा उपनिषदश्चान्तर्भवन्ति । ते तु प्रायः आत्मीयविज्ञानप्रधाना

---

develop up to the level of appreciating even simple Sanskrit works and writing in Sanskrit after having studied it for a period of ten or twelve years, there is no doubt; something is wrong with the present system of Sanskrit education. What is it? An explanation regarding the fact is needed here.

Sanskrit literature is a strange ocean. Till today no **Agastya** has been born to drink up its water completely. It is so deep and limitless. We have to search, find out and collect some pre- cious gems from it in order to brighten our life. There may be a lot of shells in it which would make us much confused. We will have to select them by applying our discriminating power. For that, a glance into the sanskrit literature seems to be very helpful here.

Sanskrit literature can be grouped into two sections. One is Vedic and the other is Loukic. Vedic contains the Vedas and Upanishads and it is generally related to the spiritual knowledge.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्तन्ते। तत्र वेदेषु मानविकशक्तेरतीतानां बहुधा बहुरूपैश्च मानविकजीवितस्यानुग्रहभूतानां प्राकृतिकदेवतानां स्तुतेराराधनस्य च प्राधान्यं दृश्यते। किन्तु जीवितस्य नानाविधस्फुरणं, आत्मतत्त्वानां प्राधान्यं वा तत्र न सुलभं दृश्यते। कदाचित् तेषां विशुद्धग्रन्थानां तादृशं किमपि न लक्ष्यं स्यात्।

उपनिषदः स्तुतेराराधनस्य वा न तावत् प्राधान्यं ददति। किन्तु आत्मानात्मविवेचनशक्तेः जिज्ञासायाश्चैव। विषयाणां वैचित्र्याभावात् आविष्करणरीतेः प्रायोऽविशेषाच्च कतिचिदेव जनास्तत्राकृष्टाः भवन्ति। तासु वैकारिकांशादधिकं विचारांशः प्रधानं दृश्यते।

वेदेषूपनिषत्सु च दृश्यमाना भाषैव संस्कृतस्य प्राचीनं रूपम्। पण्डिता अपि व्याख्याननिरपेक्षं तेषामर्थमवगन्तुं न शक्नुवन्ति। भाषायाः प्राचीनता आशयानां अतिसंक्षिप्तता अस्फुटता च तेषामर्थागमं क्लिष्टं तनोति।

In Vedas importance is given to the cult and the panegyric hymns related to deities of nature who bless the living beings in various ways and forms and stand beyond human powers. In them the manifestation of lives of various kinds or the stress on the spiritual aspect are very rarely available. Perhaps that was not the aim of such holy books.

Upanishads do not give importance to the cult or the panegyrics, but to the curiosity and power of discrimination of spirit and matter. Since their subject matter is the same and mode of presentation is more or less similar only a selected few are attracted by such works. They are more intellectual than emotional.

The language seen in Vedas and Upanishads is the ancient form of Sanskrit. Even the scholars are not able to comprehend their meaning without the help of their commentaries. The primitiveness of the language and the brevity and vagueness of ideas cause their comprehension much difficult. The works of these two-kinds are included in the vedic literature.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पुराणेतिहासनाटकादयः तथा अष्टांगहृदयमित्र कतिचन सांकेतिकविज्ञानप्रदायकाः ग्रन्थाश्च लौकिकसाहित्यविभागे अन्तर्भवन्ति । मानविकजीवितस्य यद्यदावश्यकं तस्मिन् जीविते यद्यद् प्रतिदिनं दृश्यते तत् सर्वमपि तत्र सफलतया वर्णितमास्ते । बहोः कालादारभ्य अस्माभिर्व्यवह्रियमाणायाः संस्कृतभाषायाः सुन्दरं शुद्धं च रूपं तेष्वेव दृश्यते । न केवलं मानवानां किन्तु जन्तुसाकल्यस्यापि बहुमुखानि जीवितानि बहुधा बहुशो तत्र वर्णितानि सन्ति । अतः ते भारतीयसाहित्यस्यात्मेति वक्तुं शक्यते । इदं खलु सत्यमेव यद् एकैकस्यापि भारतीयस्य स्वभावः वेदोपनिषदामात्मीयतांशादधिकं पुराणकथापात्रैरेव रूपवत्कृतः प्रभावितश्चेति । धर्माधर्मयोः संघट्टनानन्तरं धर्मस्य विजयः, मानविकजीवितं धन्यमाकलयितुमावश्यका अवसरोचिता उपदेशाः, किं बहुना, जीवितं वृद्धिसिद्धिसमृद्धमारचयितुमुपयुक्तानि सर्वाण्यपि तत्रोपलभ्यन्ते ।

Loukic literature contains the Puraanas Itihaasas Kaavyas Naatakas etc. and also certain works on some technical knowledge like Ashtaangahridayam. Whatever is necessary for human life and whatever is daily seen in it is effectively described in them. The real and beautiful form of Sanskrit, which we follow since years, is available in these works. Not only the lives of various types of human beings but also of all kinds of living things have been described in them in several contexts, in several times and in several ways. Hence they can be called the heart of Indian culture. It is only a fact that the character of each and every Indian is more influenced by the impression of the Puraanic characters and moulded after them than the spritual contributions of Vedas and Upanishads. The victory of virtue after its clashes with vices, occasional advice necessary to make one's life rich and prosperous and all that is essential to make ones life flourish in all aspects, are available with them.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वस्तुतः संस्कृतसाहित्ये मनुष्यजीवितस्य नियतमावश्यकैः सकलैरपि जीवितमूल्यैः सर्वथा समुष्टाः ग्रन्था वाल्मीकिव्यासादीनां कतिचन कृतय एव। तेषामवगाहः क्षीयमाणमस्माकं संस्कारं समुद्धर्तुमत्यावश्यक एव। शास्त्रीय ग्रन्थास्तु बुद्धिशक्ति वर्धयितुमेवालंभवन्ति। अस्माकं वैकारिकमण्डलं परिपोषयितुं ते न प्रयोजकीभवन्ति। पौराणिकसंस्कारविजयः मनोविशुद्ध्यर्थमावश्यकश्च। तादृशसाहित्याध्ययनं तु शास्त्राध्ययनादधिकफलं अल्पक्लेशं च भवति।

आधुनिकी शिक्षारीतिः प्रायः बुद्धिमतां विदुषां सृष्टौ व्यापृतेव प्रतिभाति, न तु वैकारिकमूल्यवतां विदुषाम्। सेयं रीतिः बुद्धिशक्तिं प्रबलां करोति, हृदयं सङ्कोचयति च। एतादृशी शिक्षायाः पुरोगतिः मनुष्यसंस्कारं क्रमशः क्षापयति। वयमेतत् अद्य तत्त्वतोऽनुभवामः।

In fact' in the Sanskrit literature, the works of Vaalmiki, Vyaasa and Kaalidaasa are full of virtues that one must possess for prosperity because they deal with all aspects of human life. To deeply enter into them is most necessary to uplift our decaying culture. The works on Shaastras cause only the improvement of intellectual power. They will scarcely be useful for the refinement of our emotional faculty. As regards the purification of mind it is necessary to absorb the Puranic culture. And also, to enter into that literatue is less difficult and more useful than into Shaastras.

Present system of Sanskrit education seems to be mainly intended to produce some kind of intellectual scholars, not the scholars of emotional virtues. It strengthens the power of intellect and shrinks the heart ie. **Hridaya**. Such a progress of education gradually deteriorates the standard of human culture. We really experience it today.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मानवसमाजस्य सुस्थित्यर्थं हृदयस्य विशुद्धिः संस्कारश्चास्माकमावश्यकः। अत्र तु हृदयमित्यस्य परविकार सात्मीकरणशक्तिरित्येव विवक्षितम्। न तु रक्तचङ्क्रमणावयवमात्रमित्यवधार्यम्। भारतीयसाहित्ये हृदयशब्दः द्रव्यविशेष इव गुणविशेषेऽपि प्रयुक्तो दृश्यते। अत एव सहृदय इत्यस्य परविकार-सात्मीकरणशक्तियुक्त इत्यर्थः युज्यते। "येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीय तन्मयीभवनयोग्यता त एव हृदयसंवादभाजः सहृदयाः" इति लोचनकारोऽपि सहृदयशब्दमेवमेव व्याचष्टे। एवमेतमर्थं व्यक्तीकर्तुम् बहून्युदाहरणानि दृश्यन्ते।

अन्येषां वैकारिकांशस्य आत्मसात्करणशक्तिं प्रबलां कर्तुम् हृदयसंस्करणमनिवार्यमेव। तदर्थं काव्यपुराणावगाह एवैकं शरणम्। उपनिषदामात्मीयचिन्ता वैदिकीनामृचां गानलयानुभूतिश्च इतिहासपुराणेभ्यः काव्येभ्यश्च

We need refinement and purification of our **'Hridaya'** for a comfortable existence of our society. Here the word **'Hridaya'** means the power to own other's feelings and emotions, not as we generally know, a part of the body for the circulation of blood According to the Indian literature **Hridaya** means a quality as well as the matter. That is why the **'Sahridaya'** means one who possesses the power to reciprocate the feelings of others. **Lochanakara** defines the word **Sahridaya** as follows- **Sahridaya** is one who can imbibe the feelings of others and whose mind, which becomes as clean as a mirror by continuous reading and appreciation or kaavyas, is ready to live the life of the characters depicted in Kaavyas We can see many similar examples which prove the fact.

To strengthen the power of assimilating others feelings which would develop our character we should, refine our heart and for that we must create a habit of reading Puraanas and 'Kavyaas'. The philosophical depth of Upanishads and the absorbing enjoyment of hymns are attained, through our mythological literature

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

लभ्यते । प्रायोगिकैरात्मीयतत्त्वैराकर्षकाणां एतेषां ग्रन्थानां पारायणं भाषायाः शुष्कताराहित्यात् व्याख्यानिरपेक्षितत्त्वाच्च नितरां सन्तुष्टिदायकं भवति ।

सामान्यजीवितात् सर्वथा विनाकृतानां आत्मीयतत्त्वानां आदर्शानां वा मानवमनसि हठात् संक्रामणाय क्रियमाणः प्रयत्नः न तावत् फलप्रदो न वा अभिलषणीयश्च । जीविते तेषां दहनं विलयनं, सात्मीकरणं चावश्यकम् । तदैव मानसमण्डलस्य पोषः यथायोग्यं संभवति । विविधजीवकांशयुक्ता पोषकाः स्वादिष्ठा आहाराः सर्वतोमुखमारोग्यं वर्धयन्ति, सन्तृप्तिं जनयन्ति च । यदि तेषामेकैकमंशं पृथक् पृथक् कृत्वा विटामिन् ए. बि. सी. आदिरूपेण गुडिकारूपमापाद्य खादामः तर्हि अन्नेन लभ्य आस्वादरसः कथं संभवेत् ?

अतः मानविकजीवितस्य सारांशभूतानां कालिदासादिकविविरचितानां काव्यानां तथा पुराणेतिहासानां च पठनाय जनान् प्रचोदयितुमस्माभिः रभिरुचिः प्रयत्नश्च करणीयः । तेषु प्रवेशं लब्धुं पाणिनीयादि शास्त्राणां

---

and the works of our great poets. Since there is no rigidity in language and no dependence on commentaries, reading such classics is enjoyable and edifying because of their practical philosophy.

Principles or philosophical dogmas, completely isolated from day- to- day life, are neither effective nor desirable. They must be digested, absorbed and assimilated with our life. Only then will the mental system get proper growth. Nutritious and tasty food containing different kinds of vitamines totally improves our health and gives us complete contentment. If we separate the same food and prepare pills as vitamin **A B C** etc. and take them as food, how can we get the normal enjoyment of taking food and properly effect the natural growth of our body?

So we must take interest and struggle to encourage the young generation in the mythological literature and the works of our great poets. To get a grip on it there is no need of learning Shaastras like **Paanineeya** and the like. On the contrary their study before getting

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अध्ययनस्यावश्यकता नास्ति । प्रत्युत भाषासामान्यपरिज्ञानात् पूर्वं पाणिनीयादि शास्त्रपठनं प्रतिकूलफलं च प्रदास्यति । अतः संस्कृतशिक्षा-विषये कालानुकूला काचित् नवीना रीतिरस्माभिराविष्करणीया ।

कथमेतत् ? एतदप्यत्र प्रस्तोतुमर्हति । भारतीयानां जनानां संस्कृता-ध्ययनं न खलु कदापि क्लेशकरम् । ततः भारतस्य विभिन्नेषु प्रान्तेषु निवसतां शिक्षितानां जनानां संस्कृतकाव्यपुराणादिषु प्रयुक्ता बहवः शब्दाः यथाकथञ्चित्त परिचिताः स्युः । अथ च अपरिचितानां शब्दानामर्थग्रहः संयोगसाहचर्यादिभिरपि जायते । अतः प्रायः भारतीयानां विषये शब्दकोश-संबन्धी प्रश्नः न समुदेष्यति । एवं च सुपां तिङां च सामान्यतः प्रयोग-रीतिः प्रचारे वर्तमानानां कृत् तद्धित प्रत्ययानां धातूनां उपसर्गाणां च सामान्यस्वभावः, सन्धिविकाराः इत्येते एव संस्कृते सामान्यव्युत्पत्त्यर्थमा-वश्यकाः सन्ति । एतेषां प्रवेशः पाणिनीयरीतिं विहाय कालानुकूलया अन्यतमया रीत्यैव कार्यः । तत्तद्विषयानधिकृत्य सामान्यपरिचय एवात्र प्रथममावश्यकः ।

---

a grip of the language will result in an adverse effect. So we have to evolve a new method of teaching Sanskrit which suits the modern age.

How can this be done? This needs explanation. For an Indian the study of Sanskrit is not difficult. The major portion of the vocabulary found in Puraanas and Kaavyas, is somehow familiar to the educated people belonging to the different parts of the country. Moreover even the unfamiliar words will be intelligible to us just because of their appropriate context. Therefore for an average Indian the vocabulary will not be a problem. To create a working knowledge in Sanskrit one has to learn the mode of derivation and the usage of verbs, formation of nouns, nature of deriving participles, mode of adding Upasargas and Sandhi rules. The approach to the subject matter must be entirely different from **Paanineeya**. Simply an acquaintance with this items is needed first.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सुबन्ततिङन्तेषु केवलं विंशतिः शब्दा एव क्रमशः कण्ठस्थीकरणीयाः। एवं च यदि संस्कृतशिक्षाविषये काचन नूतना सरणिः प्रचाल्येत तर्हि वैदेशिकभाषाध्ययनार्थमनुभूयमानस्य क्लेशस्य पादभागेनैव संस्कृते सामान्यव्युत्पत्तिसम्पादनं सुशकं स्यात् ।

शब्दशास्त्रविषये एतादृशं प्रकाशमसमभ्यं दत्तवतः प्राचीनाचार्यान् तथा अद्भुतधिषणासिद्धिसिद्धं पाणिनिं प्रति वा अनादरस्य लेशोऽप्यत्र नास्ति। यदि वयं संस्कृतं शास्त्रीयरीत्या पिपठिषामः तर्हि पाणिनीयमिव समग्रः शास्त्रग्रन्थः न कुत्राप्युपलभ्यते । किन्तु पुराणकाव्यादिभाषापरिज्ञानार्थं पाणिनीयाध्ययनस्यावश्यकता नास्त्येवेत्यत्र विवक्षितमस्ति ।

The forms of nearly 20 Sabdas including verbs are to be gradually got by-heart. If we evolve such a method in teaching Sanskrit, this will reduce the effort to a quarter of the actual effort required to study a foreign language for an Indian.

There is not even a hint of disregard or slight towards our great **Paanini** who gave us a profound insight into the linguistics. What I mean is only this. If we want to learn Sanskrit with a linguistic approach there is no work available more thoroughly scientific than Paanineeya. But if we want to learn Sanskrit so as to enable us to appreciate such classics, there is no need of studying Paanineeya.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सारः

को नाम धर्मः ? अस्य प्रश्नस्य उत्तरं दातुं व्यासोऽपि सन्दिहान इव लक्ष्यते। यथा धार्मिकाणि कर्माणि तथा अधार्मिकाणि कर्माणि च प्रपञ्चचलनार्थमावश्यकानि। प्रपञ्चस्यास्य स्वाभाविकी प्रगतिस्तु द्वन्द्वानां समतुलितावस्थायामेव संभवति। महर्षिः सन्यासी परमहंसश्च बाह्यतः समानधर्माणोऽपि तत्त्वतो विभिन्नाः। आद्यौ द्वन्द्वभावनावन्तौ। परमहंसस्तु तदतीतः। अयमेव विशेषः। तादृशानां दर्शनमपि आत्मप्रकाशकं भवति।

THE GIST

What is **Dharma**? Even **Vyaasa** seems to be doubtful to answer it. For the movement of universe both Dharma and Adharma are essential. The natural process of the universe depends on the equalibrium of pairs. **Maharshi** Sanyaasin and **Paramahamsa** appears alike to a common man; but the former ones deal with everything with a view of discrimination of pairs. But paramahamsa is above all these things. This much is the difference. Even a look of such great souls enlightens the mankind.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

द्वन्द्वानां प्राधान्यम्

अनेकैरनेकधा धर्मशब्दो निरुक्तो दृश्यते । तानि सर्वाण्यपि निर्वचनानि धर्मशब्दस्य व्यापकार्थप्रबोधने न खलु पर्याप्तानीति प्रतिभाति । भगवान् व्यासोऽपि "धर्मस्य तत्त्वं निहितं गुहायां" "धर्मस्य तत्त्वं पिहितं गुहायाम्" "धर्मस्य गहना गतिः" इत्येवं मुहुर्मुहुरुक्त्वा एतद्विषये स्वस्याशक्तिं अज्ञतां च प्रकटयति । तथापि 'धारणाद् धर्मं इत्याहुः' इति प्राचीनैः कृतं धर्मनिर्वचनं तेनाङ्गीकृतं दृश्यते । तदवलम्ब्यैव प्रपञ्चो द्वन्द्वाधिष्ठित इति तत्त्वस्याविष्कारस्तेन महर्षिणा कृत इत्यूहितुं शक्यते । अत्र विविच्यते ।

Importance of Pairs

The word **Dharma** is defined by many in many ways. But all these definitions seem so be inadequate to convey the comprehensive meaning of the word. Even **'Vyaasa'**, the great sage, expresses his inability and ignorance in the matter. He defines the word Dharma repeatedly as "the real truth of **Dharma** is hidden in cave" "The real truth of **Dharma** lies in cave– the unfathomable and imperceptible it is. 'The passage of **Dharma** is inaccessible" and so on. Nevertheless the definition of **Dharma** made by the ancient teachers that "it holds universe, hence **Darma**" seems to have been accepted by the sage. It can be inferred that his realisation of the fact that 'the universe runs on the pairs of opposite qualities, might be based on this definition. An explanaion is needed here.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अस्मिन् प्रपञ्चे सुखदु:खयो: मानापमानयो: जयापजययो: सिद्ध्यसिद्ध्योश्च रात्रिन्दिवस्येव ग्रीष्मवर्षयोरिव समानं प्राधान्यमस्ति । यद्यन्धकारो न स्यात् तर्हि किं नाम मूल्यं प्रकाशस्य ? यदि मृत्युर्न स्यात् तर्हि किं नाम प्राधान्यं जीवितस्य ? अत: एतेषां द्वन्द्वानां प्रपञ्चगतौ समानं स्थानमेव वर्तते । प्राणिनां सुखभोगासक्ति: दु:खविरक्तिवासना च एतयोरन्यतरस्मिन् आभिमुख्यं वैमुख्यं च जनयति । मधुरमन्नं समेषामपि प्रायोऽभीष्टमेव । किन्तु तदेव यदि भुज्यते तर्हि शरीरस्य समीचीना पुष्टिर्न भवत्येव । स्नेहानुकम्पादाक्षिण्यादि गुणानां रागद्वेषादिदोषाणां च प्रपञ्चपरिक्रमणविषये समानमेव स्थानमस्ति । "ज्ञानाय नम: अज्ञानाय नम:; धर्माय नम: अधर्माय नम:; वैराग्याय नम: अवैराग्याय नम:" इत्येवं समानभावेन द्वन्द्वानामाराधनरीतिरपि एतत्तत्वाधिष्ठितैव ।

In this universe there is equal importance for pleasure and pain, regard and disregard, success and failure, gain and loss etc., like the day and night and summer and winter. If darkness had not been there, what would be the value of light? In the absence of death what would be the importance of life? So in case of regular and systematic motion of the universe, these pairs have equal importance. The attraction towards pleasure and the tendency to get rid of misery of the living beings, engenders attachment and aversion towards either of these two. Generally all people like sweet food. But if one would eat only such food, it would not cause his proper physical growth. As regards the motion of the universe the bad qualities, like anger, hate, envy etc. and the good qualities like love, mercy, generosity etc. have their equal contribution. The system of worshipping these pairs with the same devotion and sentiment in rituals may be based on the very truth in **Mantras** as "Bow to the wisdom and bow to the ignorance; bow to the virtues and bow to the vices; bow to aversion and bow to the attachment, bow to the riches and bow to the poverty".

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यो नाम प्रपञ्चस्य एतत् तथ्यं सुस्पष्टं जानाति, यो नाम सुखस्य प्रलोभनशक्तेः दुःखस्य संशोषणशक्तेश्चातीतो वर्तते स एव ज्ञानी द्वन्द्वातीत इत्यभिधीयते। स महात्मैव स्थितप्रज्ञो भवति। सुखदुःखयोः मानापमानयोः सिद्ध्यसिद्ध्योश्च विषये स महात्मा अचञ्चलो वर्तते। अनेके साधवः अस्माभिः परिचिताः सन्ति। किन्तु के नाम तेषु ईदृशीं दशामापन्न इति पृच्छ्यते चेत् सहस्रेषु कश्चिदेव इत्युत्तरं दातुं शक्यते।

सर्वेऽपि सन्यासिनः प्रायः धर्मप्रचारका दृश्यन्ते। ते अधर्मात् जुगुप्सन्ते। दुःखहेतून् परिहरन्ति। लोकाः समस्ताः सुखिनो भवन्तु इति ते आशंसन्ते। ते लोकक्षेमार्थमात्मानमपि समर्पयितुं सन्नद्धा भवन्ति। तादृशाः साधवो लोकस्यावश्यका एव। ते सर्वथा समाराधनीयाश्च। किन्तु ते आत्माभिमानात् न सर्वथा मुक्ता भवन्ति। मात्रास्पर्शास्तान् इतस्ततो विक्षिपन्ति। तादृशा आचार्यशङ्करभगवत्पादानां पक्षे प्रवृत्तिलक्षणधर्माणः खलु। तेभ्योऽपि

The wise man who vividly sees the truth of the universe and who has reached above all the emaciating power of misery as well as the temptation towards merriment, is called **Dwandwateeta;** ie. One who stands beyond these pairs. Only he is known as **Sthitaprajna;** ie. steady-minded. Such a great man stands stern in mirth and misery, regard and disregard, gain and loss and so on. We are in touch with many ascetics. But if asked, how many have reached such a stage, the answer will be "only one among thousands'.

Ganerally all the ascetics are seen to be propagandists of **Dharma**. They hate **Adharma;** avoid the causes of misery and wish that all to be merry. They sacrifice themselves for the welfare of the universe. Of course such great ones are necessary for the world. No doubt, they are always adorable. But they are not completely free from ego. The contacts with the material aspects cast them here and there. Such people according to **Shankaracharya** are counted as **Pravrittilakshanas** ie. those whose virtues are attached with the worldly affairs. The **Paramahamsas** are in

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतितरामुच्चपदमाप्ताः किल द्वन्द्वातीताः परमहंसाः । ते किल निवृत्तिलक्षण-धर्माणः । व्यासस्य शुकस्य चान्तरमेतयोर्वयं पश्यामः ।

साधारणानां वीक्षणे महर्षिः, संन्यासी, परहंस इत्येते समाना एव । तथापि तेषां महदन्तरमस्ति । महर्षिः प्रपञ्चतत्त्ववेत्ता भवति । जगत्-तत्त्वज्ञानादुपरि सहजीविनां विकारसंवेदनक्षमता, तेषां क्लेशमपाकर्तुम् ईश्वरार्पणबुद्ध्या प्रयत्नश्च यस्यास्ति स सन्यासीत्युच्यते ।

एतयोर्द्वयोरप्युपरि सुखदुःखे मानापमानौ सिद्ध्यसिद्धी जीवितमरणे तथा लोके विद्यमानान् सर्वानपि द्वन्द्वभावान् यः समानभावनया स्वीकरोति अथवा संवेदनाधृष्यदशां प्रतिपन्नोऽस्ति स एव महात्मा परमहंसपदेनाभिधीयते । तादृशीं दशां प्रपन्नो महात्मा कोटिष्वेक एव दृश्यते ।

अत्र भौतिकवादिनामदीर्घदृशां कश्चित् प्रश्न आविर्भवति । "किं नाम प्रयोजनं तादृशैर्महात्मभिः ? लौकिककार्येष्वसंपृक्ताः सहजीविनां विषये

---

much more higher position than them, because they stand above all such pairs. They are called **Nivrittilakshanas** ie. Those who are completely detached from the worldly affairs. We see the difference between **Vyaasa** and **Shuka** in these two types of ascetics.

In view of commoners the words **Maharshi, sanyasin** and **Paramahamsa** are synonyms. But there is vast difference among them. **Maharshi** is such a saint who knows the universal truth. **Sanyasin** is the sage who possesses, apart from the universal knowledge, the power of assimilating the feelings of his fellow-creatutes and who helps to remove their sufferings with atomost dedication.

Paramahamsa is above these two categories. He likes alike the pairs in the world like pleasure and sorrow, hononr and dishonour, gain and loss, life, and death etc. and he stands in such a stage unassailable by all kinds of feelings. Such a greatman is seen only one among crores.

Here one question may arise from the short-sighted materialists. "What is the use of such great ones ? They have no contact

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

चिन्तारहिताः कुत्रापि कानने तिर्यक्सदृशं पर्यटन्तः ते कथं महात्मानो भवन्ति ?" इति ।

गणितशास्त्रप्रश्नानामिव अस्य प्रश्नस्योत्तरं सुशकं सुकरं च न भवति। परीक्षणैः प्रत्यक्षतः स्पष्टीकर्तुम् च न शक्यम् । कार्यकारणैः विशदीकरणं च न सुसाधम् । तदेतदनुभवादेव ज्ञातव्यम् । तादृशानां केवलसन्दर्शनमेव मनः प्रकाशयितुमलंभवति । मालिन्यं दूरीभवति । दुर्वासना उन्मूल्यन्ते । सर्वाण्यपि स्पर्शमात्रेण कनकीकुर्वन्तः स्पर्शमणय इवैते सर्वानप्युन्मीलयन्ति । तादृशानां वीक्षणमात्रेण अथवा प्रसादमात्रेण अस्माकं मनसि कानिचन प्रपञ्चतत्त्वानि समुन्मिषन्ति । आत्मविकासार्थमनुकूलाः परितःस्थितयः स्वयमभिमुखन गच्छन्ति । शुकब्रह्मर्षिः सनकादयः, श्रीरामकृष्णः, रमणमहर्षिः, स्वामि तपोवनं इत्यादयः कतिचन महात्मानः परमहंसविभागेऽन्तर्भवन्ति । तेषां केवलं स्मृतिरेव मनः पवित्रमातनुते । जीविते प्रकाशं वितरति च ।

---

with worldly affairs; no care for their fellow creatures and they wander some where in the forests like animals. How can they be counted as great ones?"

Like solution of a mathematical problem these questions cannot be answered so easily. To explain it with a demonstration or to clarify it showing cause and effect, is not possible. It can be known by direct experience. Simply by visiting such great souls, our mind becomes sanctified. Impurities get removed. Bad intentions are rooted out. Like a touching stone they awake all human beings. Only by their kind looks or blessings some universal truths spring up from our mind. Favorable environments for manifestation of ourselves unexpectedly come to us. Great souls like **Shuka, Sanaka. SreeRamakrishna, Ramana maharshi** and **Twami Tapovanam** can be counted in the category of **Paramahamsa**. Even their memory makes ones mind sanctified and life enlightened.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सार:

ब्रह्म सत्यं जगत् सत्यं
मिथ्या नैवास्ति किञ्चन ।
तयो: सन्तुलितावस्था
सन्धत्ते जगतीगतिम् ॥

THE GIST

The spirit is real and immortal and the matter also is real and immortal. Nothing is mortal and untrue. Their equilibrium controls the smooth movement of the universe.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्म सत्यं जगत् सत्यम्

भारतीयानां साहित्यं वेदेभ्यः समारभते। विशिष्य ऋग्वेदात्। याज्ञिकविधिप्रधानो यजुर्वेदः यज्ञशालासु गेयानां प्रायः ऋग्वेदादेवोद्धृतानां सूक्तानां समाहाररूपः सामवेदश्च ऋग्वेदापेक्षया अप्रधानौ। द्वयमपि ऋग्वेदस्यांगमित्येव सुवचम्। अत्युन्नतैः उदात्तभावैर्बहुभिर्मन्त्रैः सम्पन्नोऽपि अथर्ववेदः औषधमन्त्राभिचारादिप्रधान इत्यतः एतेभ्यः सर्वथा विलक्षणो दृश्यते।

The spirit is immortal; the matter also is immortal

Indian literature commences with Vedas, especially with RIGVEDA. The YAJURVEDA is in general concerned with the performance of YAAGAS. The SAAMAVEDA is a collection of Vedic SOOKTAS mainly from RIGVEDA. It is intended to sing on the occation of sacrificial performances. Both of them are not so important as RIGVEDA. Better to say, both are the parts of RIGVEDA. ATHARVA VEDA, though endowed with many MANTRAS consisting of high and noble thoughts, is entirely different from the other ones, because it gives importance to the medicine and spell.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ऋग्वेदः देवतास्तुतिमयः। देवता इत्यस्य प्रायः स्तुत्यो विषय इत्येवार्थः। यद्यद् जीवितायावश्यकं साहचर्यसम्पादकं न तत्तत् सर्वमपि प्राचीनानां ऋषीणां दृष्टौ देवताः किल। जीवसन्धारणार्थं सर्वदा ओजो ददानात् सवितुरारस्य अन्नपाचनार्थमावश्यकानि महानसोपकरणान्यपि उलूखलमुसलादयोऽपि तेषां दृष्टौ देवता आसन्। जीवितस्य सुखयापनाय यानि साधनान्यावश्यकानि, तानि आकाशे अथवा भूमौ वा सन्तु, तैः सह ते कृतज्ञतापूर्णा आसन्। तस्याः कृतज्ञताया वाङ्मयप्रकाशनमेव वेदसूक्तानि।

आन्तरबाह्यचैतन्याधायकः सविता, विश्रमसुखदात्री धरित्री, उन्मेषदायिनी उषा, आनन्दानुभूति प्रददानः सोमरसः, सोमलतां निष्पेष्टुमुपयुज्यमाना उलूखलमुसलादयः इत्येवं इन्द्रियगोचराः पदार्थाः, तथा यथासमयं मेघैः जलसेचनकृत्यं निर्वहन् इन्द्रः प्राणपञ्चकैः जीवितं संस्थापयन्तो मरुतः, अपामधिदेवता वरुणः इत्येवमिन्द्रियातीताः केवलसङ्कल्पगोचरा देवताश्च

RIGVEDA consists of hymns praising DEVATAAS. Here DEVATAA means the theme of hymns. Whatever be the thing, useful for our life to live in this world, are DEVATAAS in view of the ancient sages. From the sun giving energy for our sustenance, upto mortar and pestle which are useful for preparing food, are Devataas (gods) in their perspective. They were very grateful to all of them because, the Devataas, let them be in heaven or on earth, are most essential for peaceful sustenance of all living beings. Each stanza of Rigveda is a verbal expression of such gratitude.

The sun, who gives us external and internal enlightenment, the earth, who gives us peaceful environment, the dawn that supplies energy to us, the SOMA juice that affords us divine delight, the mortar and pestle useful for squeesing SOMA plants, all such things cognizable to our sense organs are the themes of their hymns. Likewise INDRA who blesses us by pouring down water in time, the MARUTS who sustain our life with five PRAANAS, VARUNA, the god of water, all such gods who

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेदेषु स्तुतिविषयाः । किन्तु इन्द्रियातीतः अस्माभिरनुभूयमानात् प्रपञ्चाद् अतिरिक्तः कोऽपि पदार्थः वर्तते इत्यस्य निर्णयः पुरुषसूक्तस्याविर्भावादेव रूढमूलः सञ्जातः । प्रत्यक्षं परोक्षं च तथा सत्यं साङ्कल्पिकं च यद्यदनुभूतं तत् सर्वमस्य पुरुषस्य पादोंऽश एव । शिष्टः त्रिपादंशः अस्मदिन्द्रियेभ्यः मानसिकसङ्कल्पेभ्यश्च बहिर्वर्तते इत्येतद् वस्तुतत्त्वं प्रथमंत एव नारायण ऋषिरेव पुरुषसूक्तद्वारा उच्चैस्तरमुदघोषयत् । तत् सूक्तमेव आत्मीयसाहित्यसञ्ज्ञयानां उपनिषदां बीजमित्यपि वक्तुं शक्यते ।

कालान्तरे स्वाभिरुचिमभिवीक्षणप्रकारं चानुसृत्य ऋषयः वेदसूक्तानि यज्ञादिकर्मपरतया आध्यात्मिकज्ञानपरतया च व्याख्यातुमारभन्त । ततः प्रभृति वेदः कर्मकाण्डः ज्ञानकाण्डः इति द्विशाखः परिणतः। यज्ञादिकर्मभिः स्वर्गप्राप्तिमुद्दिश्यद्भिः तदनुगुणमारचिता व्याख्या ब्राह्मणा इति प्रथिताः । आत्मतत्त्वान्वेषणरूपाः ज्ञानमार्गोपासनापराः व्याख्याः आरण्यका इति च

---

are alive in their conceptions are also seen as colourful themes in vedas. But, the belief in existence of a world beyond our sensory perception and a supreme soul that controls the whole of the universe, rooted among us whence the sage, NAARAAYANA popularised his PURUSHASOOKTA a strange invention in the philosophical field. He proclaimed that whatever we comprehend directly and indirectly whether it be sensible or imaginary is only quarter part of PURUSHA (the supreme spirit) and the other three parts remain beyond our perciptibility. we can claim this SOOKTA as the seed of the UPANISHADS, the great works on philosophy.

In course of time the sages began to interpret the Vedic SOOKTAS in two ways. One was to suit the sacrificial perfor mances and the other for realisation of the supreme spirit. Then onwards Vedic works were split into two branches as KARMA KAANDA and JNAANAKAANDA. The interpretations supporting those who wished to go to the heaven by performing YAAGAS were called BRAAHMANAS and those which were written in the quest for supreme power, were known as AARANYAKAS.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रथामवाप्ताः । प्रायः द्विजानामधिकारसीमनि नियन्त्रितानां यागशालानामन्तः प्रयुज्यमाना वेदसूक्तप्रयोगविधय एव ब्राह्मणानां विषयः । अरण्येषु उषित्वा आत्मतत्त्वान्वेषणप्रधानतया केचन ऋषयः वेदसूक्तानि आधारीकृत्य आत्मीयतत्त्वान्यन्विष्य व्याख्यां कृतवन्तः । तेषां समाहार एवारण्यकानि । अनन्तरकालीना उपनिषदः एतेभ्य आरण्यकेभ्य अङ्कुरिताः किल ।

आत्मानात्मविवेचनात्मिका उपनिषदः, इन्द्रियागोचरस्यात्मनः इन्द्रियगोचरात् भौतिकादप्यधिकं प्राधान्यं गौरवं च ददानाः बुद्धिजीविनां मध्ये प्रभावमविन्दन्त । इदमात्मनः प्राधान्यातिरेककल्पनं तत्फलतः भौतिकस्यावगणना चेति द्वयं तदानीन्तनान् बहून् विदुषः समाचकर्ष । ततः प्रायः सर्वेऽप्यात्मीयाचार्या उपनिषद्रचनायां व्यापृताः संवृताः । सर्वेषामपि प्रतिपाद्यः प्रमेयः एक एव । तथापि केचन व्यक्तित्वविशिष्टाः आचार्या एकमपि तमेव प्रमेयमाविष्कर्तुम् उद्युक्ता अभवन् । किन्तु अनेकेषामप्याविष्करणं गतानुगतिक-

---

The contents of BRAAHMANAS in general, are the system of application of the holy Mantras in YAAGASHAALAS by the Priests on suitable occasions. Some sages interpreted the Vedic Sooktas living in ARANYAS (forests) giving importance to the supreme spirit. Such works became popular as AARANYAKAS.

UPANISHADS are the trees full of fruits sprouted from AARANYAKAS. Such works on the topic of discrimination of spirit and matter gave more importance to the supernatural powr of extra sensory concept than to the material aspects for existence of human beings. So, they dominated all other branches of knowledge. The contemporary intelligentia was attracted by this new theory of giving more importance to the unknown spirit and less to the known material world. Then onwards all preceptors in spiritual field grew much more interested in writing a series of UPANISHADS. All of them dealt with the same theme. But a few of them gifted with resourcefulness presented the same theme in attractive manner.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वेन वैचित्र्यविहीनं विरसं च जातं इति शताधिकेभ्य उपनिषद्भ्यो 'वयं जानीमः। सर्वेषामपि प्रमेय एक एव। आत्मा अनश्वरः, शरीरं नश्वरं च. अनश्वरतैवास्माकं लक्ष्यं भवेत्" । एवमेकत्र ज्ञानकाण्डिनः आत्मनः सर्वोत्तमत्वं भौतिकस्य निस्सारतां च प्रख्यापयन्ति स्म । अन्यत्र तु हिंसादि-दूषिता यागशालाः, अर्थमबुध्वापि वेदोच्चारणं केवलमाभिजात्यलक्षणं मन्वाना ब्राह्मणाः तैः कृतं यज्ञादि फलस्वरूपं स्वर्गसुखप्रलोभनं च। एवं ज्ञानकाण्डिनः कर्मकाण्डिनश्च पार्श्वयोः स्थित्वा भौतिकजीवितं सारशून्यमकुर्वन् । कर्मकाण्डिनः कर्म, ज्ञानकाण्डिनः ज्ञानं च क्रमशः सङ्कुचितमतन्वन् । स्वर्ग-प्रलोभनेन धनदुर्व्ययः समाजचूषणं उच्चनीचता, हिंसा, ज्ञानस्य कर्मणश्च दूषणं इत्यादिभिः साधारणजनानां लौकिकजीवितं दुःसहं दुःखपूर्णम् च परिणतम् । आत्मीयतत्त्वप्रचारकाः ज्ञानिनः यागादिकर्मसु निरताः याज्ञिकाश्च समाजे

Now we have got Upanishads more than one hundered in number and we know that the presentation of most of them seems to be monotonous and insipid with imitation. "The spirit is immortal and the matter is mortal. The ultimate aim of mankind must be the deliverance through realisation of truth". All sages dealt with the same theme. On one side, JNAANAKAANDA was stressing on the supremacy and immortality of soul and feebleness and mortality of meterial aspects of life. On the other, KARMAKAANDA was insisting on erecting sacrificial halls being polluted by slaughters of innecent animals and encouraged Brahmins to recite hymns though ignorant of their meaning. They took it as a prestige of their caste and tempted the peop'e towards the heavenly enjoyment, the outcome of sacrifice. Thus JNAANAKAANDA and KARMAKAANDA attacked and slighted the worldly life from both sides. So, the life became cheap. In this manner JNAANAKAANDA made the wider scope of knowledge too narrow and KARMAKAANDA made the life of commoners full of misery due to the caste system. Dissipation of wealth in the name of heavenly enjoyment, exploitation of the society, difference in social status, slaughter of living beings, corruption in deeds and wisdom, all such things made

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उन्नतकुलेषु लब्धप्रतिष्ठाः बुद्धिजीविनः स्वकीयं जीवितं सुखमयमनुभूय भौतिकजीवितस्य क्षणिकतां सारशून्यतां दुःखमयतां चाधिकृत्य घोषणामकुर्वन् ।

अस्मिन् कालान्तरे श्रीबुद्धः समजनि । स्वार्थजटिलैः देवताराधनप्रकारैः स्वर्गीयसुखैश्च सामान्यजनान् प्रलोभ्य यागशालासु प्रवर्तमानानि विविधानि क्रूरकृत्यानि भगवते बुद्धाय नारोचत । स तान्यखण्डयच्च । तथैव भौतिकजीवितस्य सारशून्यतां उच्चैरुद्घोष्यमाणं औपनिषदिकं ज्ञानं स नागणयत् । भगवता बुद्धेन कृतस्य सन्देशस्यान्तस्सार इयानेव ।

"अस्माकमिन्द्रियाणामगोचर आत्मा अस्तु वा नास्तु वा । तदधिकृत्य वादकोलाहलेन किं नाम प्रयोजनम्? अत्र प्रपञ्चे अस्मदिन्द्रियगोचरा विविधाः पदार्थाः सन्ति खलु । तैः सह उषित्वा जीवितमानन्दमयं कर्तुम् अस्माभिः प्रयतितव्यम् । तदर्थं सर्वेभ्योऽप्यधिकं सारभूतः स्नेह एव । तस्माल्लोक-

---

the life of commoners miserable. Both these groups of intelligentia rose upto the top level of the society and lived in merriment and luxury proclaiming the mortality and fruitlessness of material life.

At this critical period there took place the incarnation of Sree Buddha. He did not like such cruel deeds and senseless utterings of a few religious preceptors in sacrificial halls and inciting temptation of commoners towards god and heavenly pleasure. He refused all such utterings of religious preceptors. Similarly he did not recognize the Upanishads, the essence of JNAANAKAANDA. The gist of the outlook of SRIBUDDHA is this much.

"Let the soul be or not be beyond our sensory perception. What is the use of argumentation on such things. We have in touch with many living beings sensible to our senses directly. We must try to make our life rich with peace and pleasure by smoothly and lovingly behaving with them. For that the most

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

उदेति। तस्मादेवाभिवृद्धिं प्राप्नोति च। नष्टे स्नेहे तैलशून्यो दीपनाल इव लोको नश्यति। स्नेहस्तु जीवकारुण्यात्मकः। तस्मिन्नेव जीवितस्य पूर्णता भवति। तदर्थं यागाग्निप्रज्वालनं अथवा अज्ञेयस्यात्मनः अन्वेषणं वा विफलमेव। अज्ञेयापेक्षया ज्ञातस्यैव प्राधान्यम् देयम्। अज्ञेयस्यात्मनोऽन्वेषणार्थं जीवितं मा विफलं कुरुत। ज्ञातमेतं लोकमानन्दमयं कुरुत। गवां पयः वत्सैः पेयमेव। तद्दुग्ध्वा शिलाबिम्बोपरि माऽभिषिञ्चतु"।

कर्मज्ञानमार्गमाश्रित्य क्रमशः क्षयमापद्यमानस्य स्वार्थजटिलस्य प्रलोभनात्मकस्य ब्राह्मणाधिपत्यस्य प्रभावेण क्षीणमनोभ्यः सामान्यजनेभ्यः भगवतो बुद्धस्य अयं सन्देशः अतितरामरोचत। अस्य सन्देशस्य परिवेषे तत्त्वात् बहुदूरमपसृतानि याज्ञिककर्माणि आत्मीयचिन्ताश्च निष्प्रभाः सञ्जाताः। भारते इव विदूरपौरस्त्यदेशेष्वपि चैतन्यरहिताः विविधाः पारविकसङ्कल्पाः

---

essential thing is love. The world flourishes with love. Whenever love lost the universe would cease to exist just like a lamp without oil. The real nature of love is mercy with all creatures. Life sprouts from it and flourishes in it. For that, to inflame the sacrificial fire or to resort to the forest in search of unknown soul is in vain. Therefore we must give more importance to the known than to the unknown. We should not attempt to make our life fruitless by seeking the unknown. Let us enjoy this world known to us. The milk is entitled to the nourishment of calves, not to pour it on the lifeless idols".

During this period, BRAAHMINS grew selfish and were consid.red themselves to be of high caste in the society. The branches of JNAANA and KARMA were gradually shrivelled up. People knew that all these things were fruitless and mere imaginary. They were easily attracted by the message of Buddha In the splendour of his words the spiritless thoughts and words of BRAAHMINS on the quest for soul and also on their sacrificial performances became dim. As in India, at that time, in far eastern

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

आध्यात्मिकाचार्यम्मन्यानां निरर्थकजल्पनानि च बहुविधान् क्लेशानावपन्ति स्म। तेषां सर्वेषामपि बुद्धदेवस्यायं सन्देशः आकर्षकोऽभूत्। सोऽयं जापान् द्वीपावधि झंझावात इव व्याप।

बुद्धदेवस्य निर्याणानन्तरं प्रायः अन्यमतेष्विव बुद्धमतेऽपि अन्धविश्वासाः दुराचाराश्च रूढमूला अभवन्। क्रमशः तन्मतमपि आन्तरचैतन्यविहीनं बाह्याचारमात्रप्रधानं पर्यवसितम्। तत्रापि मतशासकाः शासितुमारभन्त। ते आचार्यादपि किञ्चिदुन्नतं पदमारुह्य उच्चैस्तरमुदघोषयन्। "ब्रह्म मिथ्या जगत् सत्य" मिति। इत्थं औपनिषदिकज्ञानस्य आत्मीयदीपं ते निष्प्रभमकुर्वन्।

अस्मिन्नेव कालान्तरे अभूत् आध्यात्मिकरङ्गे श्रीशङ्करस्य जैत्रयात्रा। एकस्मिन् हस्ते कमण्डलुं अपरस्मिन् योगदण्डं च धृत्वा आसेतुहिमाचलं पाद-चारं चरित्वा स आत्मीयचक्रवर्ती प्रत्याचख्यौ "ब्रह्म सत्यं जगन्मिथ्या" इति।

---

countries also, various concepts related to the super natural world and prattling of priests were creating much trouble and confusion to the commoners. All of them whole-heartedly welcomed the message of Buddha. So it spread all over the eastern countries inclu-ding Japan.

After the age of Sree Buddha, just liKe other religions, Buddhism also had been polluted by the encroachment ot blind beliefs and bad practices. Gradually the Buddhism became spiritless and lasted in lifeless ritualism. The Buddhist monks and priests dominated on the common men. They rose up to the higher position than their Master sri Buddha and began to proclaim "Brahman is unreal, the Jagat is real." Thus the splendow or Upanishads became dim in such proclamation.

At that critical time, there happened the victorious march of SRI SANKARA in phylosophical field. Holding KAMANDALU in one hand and YOGADANDA in the other, the lord of philosophical world, proclaimed: "Brahman is real, the jagat is unreal", a slo-gan quite contrary to the Bhuddhism.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीशङ्करस्य एतद् वाक्यं आर्षसंस्कारसाकल्यमाक्रममाणं बुद्धियुक्तिरक्तिरहितं बुद्धमतमभिसंबोध्य कृतं प्रत्याख्यानरूपं मुद्रावाक्यमेव । तस्मिन् कालान्तरे तादृशं किञ्चन मुद्रावाक्यमावश्यकमासीत् । इदं वाक्यमाधारीकृत्य स भगवान् ब्रह्मसूत्रं उपनिषदः भगवद्गीतां च व्याचख्यौ । एवं कालान्तरे विविधकालुष्यदूषितस्य बुद्धमतस्य अन्धमाक्रमणं निरुद्धमासीत् । एवं ब्राह्मणानां याज्ञिकविधयः ज्ञानमार्गिणां आत्मीयविचाराश्च पुनरुज्जीविताः ।

अत्र ब्रह्मणः सत्यत्वे जगतो मिथ्यात्वे च श्रीशङ्करः कियन्मात्रं विश्वसिति स्मेत्येतं विषयमधिकृत्य अत्र किञ्चिद् वक्तव्यमास्ते । श्रीशङ्करस्य तदेतद् मुद्रावाक्यं तदाधारिताः व्याख्याः सर्वज्ञपीठारोहणं च बुद्धमतखण्डनार्थक सनातनधर्मसंस्थापनरूपं लक्ष्यमधिकृत्यैव कृतमिति मन्ये । श्रीशङ्करभगवत्पादकृतायाः सौन्दर्यलहर्याः प्रमेय एतां चिन्तामनुकूलयति ।

"शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि

It is very clear that this slogan of Srisankara was a refutation of Buddhism which almost lost its life by that time. During that period such a slogan was most essential. Based on this slogan, Srisankara wrote commentaries on the Bhagavad geeta, Upanishads and Brahmasutra. Thus the blind attack on. Upanishads by Buddhism that was polluted in many ways, was arrested and the Jnaanakaanda had been revived by Srisankara This is the march of philosophy in India.

It is clear that all these things - the slogan, the commentaries on the holy books, the ascent on Sarvajnapeetha - are aimed at the refutation of Buddhism. The contents of Soundaryalahari and some other works like "Bhaja govindam" by the same author are the proof of this fact. What Sresankara proclaims very strongly in Soundaryalahari is particularly noteworthy. See the very first stanza of the book.

"Lord Shiva, only if united with Shakti, will be able to discharge his duties. Otherwise, He will not be able even to move himself.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अतस्त्वामाराध्यां हरिहरविरिञ्चादिभिरपि
प्रणन्तुं स्तोतुं वा कथमकृतपुण्यः प्रभवति" ॥

इति श्रीशङ्करः तावत् युक्तिशक्ति युक्तं यत् प्रख्यापयति तदत्र विषये श्रद्धेय एव । सौन्दर्यलहर्यां निर्दिष्टौ शिवः शक्तिश्च आचार्यभाष्ये प्रतिपादितं ब्रह्म जगद् द्वयमेव खलु । तत्त्वतः इदं वीक्षणमेव सत्यम् । पञ्चभूतानां समाहाररूपस्य शरीरस्य साहाय्यं यदि न स्यात् तर्हि जीवस्यास्तित्वं कथं संभवति । भौमानां धातुलवणानां समाहारः खलु शरीरम् । तथैव प्रकृतौ दृश्यमानस्य जलस्य रूपान्तरं खलु स्वेदो रक्तं च । अन्तरिक्षे विद्यमानः पवनः यदा शरीरं प्रविश्य प्रवर्तनमारभते तदा स प्राणः परिणमति । बहिराकाशे विद्यमानं तेजः शरीरं प्रविश्य ऊष्मा परिणमति । एते सर्वेऽपि पदार्था अस्माकमिन्द्रियगोचराः । इन्द्रियागोचरः परमात्मा यदा शरीर प्रविश्य प्रवर्तनमारभते तदा स जीव इति व्यवह्रियते । एतेषु अमुकं

So, how can I, an inauspicious chap, bow to you or praise you adorable to Brahman Vishnu Shiva and so on.

Here Shiva and Sakti to whom referred by Srisankara, are nothing but Brahman and Maaya in his commentaries. In fact, this outlook of Srisankara is true and reasonable. Is there existence of jeeva without reliance of body, the combination of five elements? of course, it is a fact that the body is a mixed form of five elements. See, the blood and sweat are the part of water, one of the elements. The breath acting in the body is the part of air. The warmth is the part of sun. The cells that frame the body are the part of earth. All of them are directly perceived by our senses. Likewise when the part of Paramatman, imperceivable by our senses, acts in our body, it is called jeeva. How can we give prominence to one among them? If any one

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रधानं असुकमप्रधानमिति कथं निश्चीयते । एषु यद्येकं न स्यात् तर्हि तत्र जीविनः अस्तित्वं च न स्यात् । एवं सति सर्वेषामपि प्राधान्यं समानमेव ।

अस्मिन् प्रकरणे कश्चन प्रश्नः समुदीयेत । "किमर्थमिन्द्रियातीतः परमात्मा व्यर्थं कल्प्यते । शरीरसन्धारणविषये पञ्चभूतैरेवालम् । किमर्थमननुभूतस्यात्मनः पदार्थस्य कल्पन" मिति ।

साधु । अस्तु नाम । एवं चेत् मयापि पृच्छयते । मृत्कीटस्य केवलं स्पर्शेन्द्रियमेवास्ति । स्पर्शसंज्ञानक्षमो जीवश्च । दृश्यश्रव्यघ्रेयवस्तूनां संवेदनक्षमाणीन्द्रियाणि तेषां न सन्ति । तेषां विषये तेजो नास्ति, शब्दो नास्ति, गन्धश्च नास्ति । अतः ते पदार्था न सन्तीति किं वक्तुं शक्यते ? नैव । तथैव परमात्मनः संवेदनक्षममिन्द्रियमस्माकं शरीरे न संघटितमित्यतः तस्य प्रत्यक्षानुभवो नास्तीत्येवावधार्यम् । इन्द्रियाणामतीतमगोचरमित्यतः किमर्थमितरापेक्षया आत्मनः प्राधान्यं दीयते । अस्माकं शरीरे परमात्मनोंऽशः खलु

---

of them is lacking, there would be no existence of living beings. As such all of them are equally important for existence of creatures.

In this connection, there may arise a question: What' is the use of interpolation of such an imaginary soul which can not be comprehended by any of our senses? Only five elements are enough to constitute our body. What is a gain by mere concept of such a strange element?

Yes. I admit. But I ask you one question? An earthworm possesses only a sense of feeling and also a life which can experience it. It has no senses for smelling, seeing and hearing. According to its experience, there is no light, no smell, and no sound. As such can you say, there are no such things in this universe? Never. Likewise a sense organ, capable of comprehending paramatman has not been fixed on our body. It is why

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

जीवांशश्चेतना । अस्मच्छरीरघटकेषु एकस्यापि अंशे चेतनाया अस्तित्वं नैव संभवति । अतः जोविनामस्तित्वे बहुष्वनिवार्यघटकेष्वन्यतम एव जीवः । जीवस्यांगिभूतस्य परमात्मनः यदि प्राधान्यं दीयते तर्हि वायोः तेजसः आकाशस्य जलस्य मृदश्च तादृशमेव प्रधान्यं देयम् । वेदे एतेषां सर्वेषामपि प्राधान्यं सममेव दत्तम् । जीवितस्यास्तित्वाय यद्यदावश्यकं तत्तत् सर्वमपि देवतारूपेण ते स्तुवन्ति । वरुणः सविता अग्निः मरुतः पुरुषश्चेति भूतानां आत्मनश्च वेदे सङ्कल्प एक एव ।

अस्मिन् विषये कालिदासस्याभिप्रायः श्रद्धेय एव ।

मरणं प्रकृतिः शरीरिणां
विकृतिर्जीवितमुच्यते बुधैः

Aatman ie. the soul, is not comprehensible to our limited sense organs. That is all. considering this incomprehensibility of the soul, we need not give more importance to it than to the other elements. It is true that the Jeeva acting in our body is a particle of paramatman just like the other parts of other elements. If any one of them is lacking, jeeva will be no more. Therefore as regards the living beings among many unavoidable factors only one is Jeeva, a part of paramatman. If we give more importance to jeeva than to the other factors, all other things can claim the same importance. In Vedas, we see the similar Importance is given to all of them. Whatever be necessary for existence of living beings, all are considered as Devataas who always act to sustain this universe. Devataas, the gods of nature like Varuna, savitr, Agni, maruts prithvi and purusha are given the same status in Vedas.

Hare in this connection the perspective of our great poet, Kalidaasa is note worthy.

"The real nature of living beings is death. The state of living is only its change. In that state, if one could even breath

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्षणमप्यवतिष्ठते श्वसन्
ननु जन्तुः किल लाभवानसौ ।

मृद् जलं च यावदावश्यकं तावत् सङ्कलय्य सम्मर्द्य कुलालचक्रस्य गर्भ-पात्रद्वारा निर्गत्य ऊष्म संयोजनेन घटः सम्पद्यते । यदा स विघट्यते पुनरपि मृद्भूयमापद्यते । यद्येतेषु किमपि न स्यात् तत्र घटश्च न सम्पत्स्यते । तथैव यथा प्रमाणं पञ्चभूतानि परमात्मा च सम्मिलन्ति जन्तुः सम्पद्यते । यदा ते विघटन्ते तदा तत्र जन्तुर्नास्ति । दारुशिलासुधादयो यदा पृथक् पृथक् वर्तन्ते तत्र गृहं नास्ति । ते यदा यथा प्रमाणं यथोचितं च सम्मिलन्ति तदा गृहं जायते । यदा ते विघटन्ते तदा तत्र गृहमपि नास्ति । तद्वत् मरणं नामैतेषां घटकवस्तूनां विघटनमेव । शरीरं मृदि श्वासो वायौ ऊष्मा तेजसि च यथा विलीयन्ते तथैव जीवः परमात्मन्यपि विलयं प्राप्नोति । एषु एक-स्मादितरस्य कथं प्राधान्यं कल्प्यते ?

---

for a few minutes, it is a great achievement."

The component part of a pitcher is mud. When the mud transformed in the womb of workshop of potter adding necessary water and heat, it shapes into a pitcher. When it is broken, it again changes to the same mud. If any one of them is lacking there will be no pitcher. Likewise in a particular and specific manner and measure, when the elements and the Aatman join together tney are transformed into creature. The component parts of a building are stone, mud, wood, tiles etc. When they are properly assembled, they change into a building. When they are separated, there will be no building there. Similarly the death is mere, seperation of such component parts. Just like the body absorbs in mud; breath in the air, heat in the sun, jeeva absorbs in paramatman. As such how can we give more importance to only one among them ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदं तथ्यं श्रीशङ्करस्य न खलु न ज्ञातमेव । करतलामलकवत् सर्वमपि जानानस्य तस्यै तत् सुज्ञातमेव स्यात् । पुनः कुतः स 'ब्रह्म सत्यं जगन्मिथ्ये'ति मुद्रावाक्यमजूघुषत् ? तत् बुद्धमतखण्डनार्थमेव ।

एवं विचिन्त्यमाने अस्माकं विचारः अस्मिन् सिद्धान्ते पर्यवस्यति ।

Sree sankara, who could see every thing so minutely was fully aware of the fact. Still why did he proclaim "Only Brahma is true and the Jagat is untrue" ? Definitely we can persume that he did so for only refutation of Buddhism.

If we think in such a way, we will beach at such a conclusion.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अविरलतिमिराध्वन्यध्वनीनस्य दीपो
दृढतरतरणिर्यः क्लेशमग्नस्य पुंसः ।
भिषगखिलरुजां यः कामलोभादिकानां
तमहमनवलेपं वीतलेपं स्मरामि ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वेद्यान्तरं न कलयामि यतः परस्तात्
नाचार्यकं स्वितरतोऽभिलषामि यस्मात् ।
आलोकये न किमपीह यतः परं च
तं श्रीतपोवनमुनिं गुरुमानमामि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तपोवनमहर्षिणा सह मे सम्पर्कः

एकोनविंशे वयसीति मन्ये स्वामिनो विवेकानन्दस्य ज्ञानयोगः मलयाले अनूदितः कथं वा मम हस्तं प्राप । तावत्पर्यन्तं संस्कृते केषांचन काव्यानां अष्टांगहृदयस्य चाध्ययनमेव मया कृतम् । नान्यत् किमपि मे मनः प्रविष्टम् । ज्ञानयोगस्तु मयि कस्यापि आत्मीयप्रचोदनस्य कारणमभूत् । तद् मम कृते किमपि नूतनं लोकमुद्घाटयामास । तस्मिन् काले मम पितृपादा अन्तरिताः । तद् मम जीविते किमपि वैराग्यमजनयत् ।

अत्रान्तरे एकस्मिन् दिने कश्चित् सन्यासी मम गृहमागतः । यदा स पूर्वं अस्मद्ग्रामे अध्यापक आसीत् तदा अस्मद्गृहे वसन्नवर्तत । स सगर्वं मामवदत् ।

My contact with Swami Tapovanam

I think it happened in my nineteenth year. By chance, I got a Malayalam version of Gnanayoga of Swami Vivekananda. Till then I had studied only some sanskrit Kavyas and Ashtanga-hridaya. Nothing else entered my mind. Gnanayoga left some kind of spiritual incitement within me. It opened a new world to me. During those days my father died. It created some sort of asceticism in my life.

One day a Sanyasin came to my house. He had lived as a guest in our family when he was a teacher in our village. He told me proudly.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

"अहं हिमालये वसामि । ईश्वरस्तत्र वसति । अहं तं असकृत् दृष्टवान् । अधुना अहं हिमालयमेव प्रतिनिवर्ते । एवम् ...."

अहं तैर्वचनैः आकृष्टोऽभूवम् । ईश्वरं द्रष्टुं मे अतीव वाञ्छा आसीत् । अहमपृच्छम् ।

"स्वामिन्, अहं भवता साकमागच्छेयम्" ।

'तथास्तु' । स अभ्यजानात् । अपरेद्युः तेन सह अहं प्रातिष्ठे । तस्य संरक्षकत्वे गन्तुं माता मे कथमपि सम्मतिमदात् ।

इतस्ततः पर्यटन्तौ आवां द्वित्रैः दिनैः कोयम्पत्तूर नगरं प्राप्तौ । मध्येमार्गम् कतिचन अनाशास्याः व्यवहाराः तस्मिन् मे सन्देहमजनयन् । तत्र कस्मिंश्चित् मठे यदा आवां उषितौ तदा स सन्देहः स्थिरीभूतः । तेन सह यात्रा न शोभनायेति मे प्रतिभाति स्म । अपरेद्युरेव तमहं व्यसृजम् ।

"I am living in Himalayas. God lives there. I have seen him many times. I am now going back to Himalayas" And so on.

I was moved with those words. I grew much eager to see God. I asked.

"May I come along with you, swamiji ?"

'Yes', he agreed. Next day I started with him. Mother, somehow, allowed me to go under his care.

Wandering here and there we reached Coimbatore within two or three days. On the way some unworthy behaviour made me suspicious about him. This was confirmed when we halted in a Matha in Coimbatore. I felt, it would not be desirable to follow him. I left him on the next day itself.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

न मे हस्ते वित्तं विद्यते स्म । मलयालं संस्कृतं च विना भाषापरिचयोऽपि नासीत् । दिशापरिज्ञानं न मे अवर्तत । तथापि एकाकी भूत्वा उत्तरस्यां दिशि हिमालयं लक्ष्यीकृत्य प्रस्थितः । अन्ते पलनीं प्राप ।

दिनद्वयमाहारो न लब्धः । याचनविषये अहमनितरां भीरुः लज्जालुश्चासम् । क्रमशः तस्मिन् ममाभ्यासः समजायत । पलनीतः चारं चारं पुनरपि केरलेषु कोल्लङ्कोट्ग्रामं प्राप्तः । अहं मम प्रमादमजानाम् ।

"अतः परं प्रमादो माभूत्" । तदर्थं अहं कमपि मार्गमुद्भावितवान् । ततः रेलमार्गमवलम्ब्यैव चरितुमारभे । एवं सेलं प्राप ।

मध्येमार्गं इतस्ततः केचन केरलयाः परिचिता जाताः । ते मां केरलं गन्तुं उपदिदिशुः निरबध्नन् च । किन्तु अहं निश्चयात् न व्यत्यचलम् । मम निश्चयदार्ढ्यं मवबुध्य ते मां सानुकम्पं परिचेरुः । बहुधा ते मम साहाय्यं चक्रुश्च । एवं कथमपि मद्रास् नगरं प्राप्तः ।

I had no money with me. I had little touch with languages other than Malayalam and Sanskrit. I had also no idea about the directions. Still, being alone aiming Himalayas in the north, I walked, but reached Palani.

No food I had, for two days. I was very timid and reluctant to beg. But gradually I got acquainted with it. From Palani I walked and reached Kollangode in Kerala again. I realised my mistake.

Not to repeat such mistakes, I found out a way. I resorted to the rail route and began to walk by rail only. Thus I reached Salem.

On the way here and there, I came across some Malayalees. They advised me, rather compelled me, to turn back to Kerala. But I was firm in my decision. Realising my firmness, they sympapathatically treated me and helped me in many ways. Somehow I reached Madras.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ततोऽहं कल्कत्तामार्गमवाललम्बे । विशाखपट्टणात् भुवनेश्वरपर्यन्तं पादचारमचरमिति यद् तदहं अधुनापि व्यक्तं स्मरामि । वीतलक्ष्यं पर्यटन्तः केचन साधवो मे मार्गे सहाया आसन् ।

ते मां भुवनेश्वरे व्यसृजन् । ततो मम अन्यैः कैश्चन साधुभिः सह सम्पर्को लब्धः । निश्शुल्कशकटयात्रामधिकृत्य कतिचन पाठान् ते मामध्यापयामासुः । मद्विषये अयमतिमहाननुग्रह एव संवृत्तः यतः तावता कालेन द्वित्रान् क्रोशानपि सञ्चरितुं अहमसमर्थः आसम् । कतिचन स्टेशन् यावत् अहं तान् गुरुणादान् अन्वसरम् । ततोऽहं तान् व्यसृजम् । यद्यपि ते पाठाः सम्यक् पठिताः परीक्षायामुत्तमश्रेण्यामुत्तीर्णश्च तथापि श्यामलोष्णीषकञ्चुकानां रेलवेकर्मचारिणां दर्शने अहं भीतः कातरश्चाभूवम् । अतः कदाचित् पादचारं कदाचित् शाकटायनो भूत्वा च केवलं वस्त्रद्वयं वसानोऽहं कस्मिंश्चन शीतले निशीथे कल्कत्तां प्राप्तवान् ।

कल्कत्तायां कतिचन दिनान्यवसम् । कश्चित् उदारः केरलीयः मां सानुकम्पं स्वीकृतवान् । केरलदेशं प्रति निवर्तितुं मां उपदिष्टवान् च । किन्तु

From Madras I took the Calcutta route. I clearly remmber that from Vishakhpatanam up to Bhuvaneswar I walked along with two or three Sadhus who were wandering without any particular aim.

They left me at Bhuvaneshwar. There I contacted some other Sadhus. They taught me some lessons to travel in train without ticket. It was a bliss to me because by that time I was too weak to walk even four or five miles a day. I followed my 'gurus' upto some stations. Then I left them. Though the lessons were seriously learnt and got rank in tests, I was very timid and afraid at the sight of the railway employees with black cap and coat. So, partly by foot and partly by train reached Calcutta in a chill night wearing a couple of small saffron clothes.

In Calcutta I stayed for a few days. One Malayalee gentleman received me sympathatically and forced me to return to Kerala. But I stood adamant in my aim. At last he became pleased

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मम लक्ष्ये अहमचञ्चल इति अवबुध्य स मह्यं किमपि कम्बलं वसनादिकं च प्रायच्छत् । स कियन्मात्रमुदारः संस्कृतचित्तश्चासीत् ! स षोरणूर कल्लिप्पाटनामके ग्रामे जातः कश्चिद् एषुत्तच्छन् आसीदिति कालान्तरे मया ज्ञातम् । अधुना तस्य स्मारकरूपः कश्चिद् ग्रन्थालयोऽस्ति तत्र यतः त्रिंशद्-वर्षानन्तरं चतुर्णां वेदानां दुर्लभानां केषांचन ग्रन्थानां च अध्ययनस्यावसरो मे लब्धः ।

कल्कत्तानिवासकाले अहं शान्तिनिकेतनं गत्वा शय्यावलंबिनं महाकविं प्राणमम् । तत्रैव सुबाष्चन्द्रबोस महाशयमपि सन्द्रष्टुं तेन सह संस्कृते कतिचन निमिषान् भाषितुमपि अवसरो मे लब्धः ।

शान्तिनिकेतनात् कल्कत्तां प्रतिनिवृत्तोऽहं प्रायः पादचारमेव गयां ततः शकटेन काशीं च प्राप । कदाचित् मम दीनं निष्कपटं च मुखभावमालक्ष्यैव रेलवे कर्मचारिणः मत्कृतानपराधान् सगौरवं न गणयामासुः । तैः शकटे महचम् सर्वथा स्वातन्त्र्यं दत्तमिति मन्ये ।

---

with me and gave me a blanket and some other clothings. How cultured and noble was he! Later I came to know that the gentleman was an Ezhuthassan from Kallippadam, Shoranur from whose memorial library I read four Vedas and some other rare classic works after about thirty years.

During my stay in Calcutta I visited Shantiniketan and greeted our Mahakavi who had become almost bed- ridden by that time. I had a chance to meet Subhash chandra Bose there itself and to talk with him in Sanskrit for a few minutes.

From Shantiniketan I came back to Calcutta and then started for Gaya more or less by foot and then for Kashi by train. Perhaps, because of my pitiable and innocent apperance the railway officers did not bother about my offences and it seemed to me that they indirectly gave me full freedom to travel in trains.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एतदन्तरा मे अन्यभाषानभिज्ञतया संस्कृते प्रायः अनायासं भाषितुं परिचयः सञ्जातः। मध्येमार्गं संस्कृतपण्डितान् मिलितुमहं प्रयतमान आसम्। तैः सह संस्कृत एव भाषणं कृतम्। ते विद्वांसोऽपि बहुधा मे साहाय्यं कृतवन्तः। काश्यां केषुचिदाश्रमेषु परिगणनं लब्धुं स परिचयः उपाकरोत्। तत्राहं सप्ताहद्वयं यावत् ससुखमवसम्।

परन्तु मम लक्ष्यं ईश्वरदर्शनमेव। स हिमालये वसति खलु। अहं काशीं विहाय हिमालयं प्रति प्रतस्थे। लखनो पर्यन्तं कश्चित् सज्जनः मम यात्रायां सहायो बभूव। स मां तत्र व्यजहात्। ततः बहूनि दिनान्यहं पादचारमचरम्। अन्तेऽहं हरिद्वारं प्राप्य हिमालयस्य पादं दृष्टवान्।

हरिद्वारे कैलासाश्रमे कतिचित् सप्ताहानहमवसम्। तत्र विज्ञानानन्द-सरस्वती मां स्वीचकार। स महात्मा हृषीकेशस्य कैलासाश्रमस्य सर्वोन्नतं परमगुरुं विष्णुदेवानन्दमहाराजं मां परिचाययामास। अहं हृषीकेशमगच्छम्। तत्र कतिचन मासानहं सुखमवसम्।

By this time I got experience to talk in Sanskrit more or less fluently because of my ignorance of other languages. On the way I tried to meet Sanskrit scholars and used to talk with them in Sanskrit. Such scholars also helped me in many ways. In Kashi that experience halped me very much to obtain accommodation in some Ashramas. I spent there about two weeks much happily.

But my aim was to see God. He lives in Himalaya. I left Kashi and started to Himalayas. One sajjan helped me to travel upto Lucknow and left me there. Then I walked several days. At last I reached Hardwar and saw the holy foot of Himalayas.

At Hardwar I stayed for a few weeks in Kailasashrama H. H. Vijnanananda Saraswati welcomed me there. He introduced me to H. H. Vishnudevanandaji the seniormost in the Kailasashrama at Hrishikesh. I went to HrishiKesh and lived comfortably for a few months in the Ashrama there.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

हृषीकेशनिवासकाले त्रयो महात्मानस्तत्र निवसन्ति स्म, विष्णुदेवानन्दपादाः शिवानन्दसरस्वतीपादाः तपोवनपादाश्च। हिमालयसञ्चाररसिकः तपोवनस्वामी तु कैलासाश्रमस्य पश्चात् अतिसरले कस्मिश्चित् कुटीरे निवसति स्म।

श्रीतपोवनस्वामिनं प्रणन्तुं तत्कुटीरे गमनं मम दिनचर्यास्वन्यतममासीत्। सरलस्य तस्य कुटीरकस्य चन्द्रशालायां कुथे आसीनः स तपोनिधिः प्रायः सायं भक्तजनैः सह भाषणं कुर्वन्नवर्तत। तत्भाषणं तु सरलमकृत्रिमं विज्ञानोत्तेजकं चासीत्। भाषणमन्तरा प्रासंगिकेन हर्षेण यदा यदा स महात्मा उच्चैः हसति तदा दोलायमानैः अवशिष्टैः दन्तैः सहितं तद्वदनमधुनाप्यहं सुस्पष्टं स्मरामि। कण्ठात् प्रभृति पादतलं यावत् दीर्घेण काषायकञ्चुकेनाच्छादितं शान्तं गभीरं च तदीयमाकारमहं निस्संगताया अवतारमिव अधुनापि भावयामि।

During my stay at Hrishikesh there were three great saints there. H. H. Vishnudevananda, H. H. Shivananda Saraswati and H. H. Swami Tapovanam. Swami Tapovanam, the wanderer in the Himalayas, was staying in a very simple Kuteer behind Kailasashrama.

I used to go to the Kuteer of Swami Tapovanam to greet him almost every day. Seated in a carpet in the terrace of his small Kuteer he used to talk with his devotees. His talks were very simple, artless and enlightening. I still remember his face with a few remaining teeth swinging in his mouth when he would laugh with occasional merriment. I see in my mind even now his calm and majestic figure clad in a single saffron garment from neck to foot seated in loose Padmasana in the carpet as if an incarnation of ditachment.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एवं कतिचन मासा गताः। एकस्मिन् दिने सायं यदाहं तत्कुटीरं प्राप तदा कोऽपि तत्र नासीत्। सर्वेऽपि भक्ता दर्शनं कृत्वा निवृत्ताः। तत्र स महात्मा एकाकी आसीनोऽदृश्यत। अहं तं गुरुपादमुपगम्य यथाविधि प्रणामं चकार। अथ किञ्चिदुपसृत्य तदन्तिके उपाविशम्। स्वैरं भाषितुं तदा मे अवसरो लब्धः। मम तीर्थयात्रायाः तथा कौमार एव सन्यासं स्वीकर्तुम् सन्यासजीवितं नेतुं च मदीयं निश्चयं अहं तस्मै न्यवेदयम्।

स महात्मा मामैक्षत। ततः कतिपयनिमिषान् किञ्चिद् ध्यात्वेव सस्मितमपृच्छत् –

अपि ते पिता जीवति ?

'न। स उपरतः'। अहं प्रत्यवदम्।

"अपि तव माता ?"। स पुनरप्यपृच्छत्।

"अस्ति। सा जीवति।" अहमुत्तरमदाम्।

एवं तर्हि मातुर्मरणानन्तरमेव संन्यासः स्वीकरणीयः।"

A few months passed like this. One day when I reached the Kuteer there was none there. It was a bit late that all had returned after his Darshan. The great soul looked sitting alone there. I approached him and offered him my usual pranam. I sat in front of him rather closely. I could get a chance for a free talk with him. I expressed all details regarding my pilgrimage and taking up of asceticism in my teenage and the decision to lead such a life.

The great soul looked me and after a deep contemplation, so seemed to me, asked me with a smile:-

"Is your father alive?"

'No. He is no more.' I replied.

"Is your mother ?" He asked me again.

"Yes. She is still alive"

"Is it? If so, better to take up Sanyasa after your mother's demise."

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वा स किञ्चित् सगौरवं मामैक्षत। झटित्येव मम मनः कैश्चन विलक्षणैर्विकारैः पूरितमिवासीत्।

गृहात् प्रस्थाय तावत्क्षणपर्यन्तं गृहचिन्तया मातृचिन्तया वा मम हृदयं न व्याकुलमासीत्। सर्वेऽपि विस्मृतप्रायाः आसन्। यदा स महात्मा तानि वचांस्युदीरितवान् ततः प्रभृति मम मनः माता पूरितमिवासीत्। अविलंबितमेव कैलासाश्रमे मम कक्षं प्रतिनिवृत्य क्रन्दितुमारेभे। सकलैव सा रात्रिः क्रन्दनेनैव पर्यवसिता। अहं स्वयं नियन्त्रितुं नाशकम्। सर्वत्रापि मे माता तिष्ठतीति मां प्रतिभाति स्म। सर्वत्रापि मे बान्धवाः। प्रभातात् पूर्वमेव मया हृषीकेशात् प्रतिनिवृत्तम्। कापि सूचना कस्मै अपि न दत्ता।

कैश्चिद् दिनैः चरणं शकटं चाश्रित्य दिल्लीं प्राप। ततः मध्येमार्गं अहं मथुरां वृन्दावनं च संददर्श। गोवर्धनं दृष्ट्वा यदाहं प्रतिनिवृत्तः तदा विषमज्वरबाधया अहमतितरां पीडितोऽभूवम्। केचन परिचितपूर्वा संस्कृत-

---

Saying so he looked at me a little seriously. Suddenly my mind seemed to be filled with some strange feelings.

Till that movement after I left home, thoughts about my mother or home had never worried me. All were almost forgotten. when Swamiji uttered those words, my mind became as if filled with my mother. I returned to my room in Kailasashrama and began to weep. The whole night passed in weeping. I could not control myself. It seemed that everywhere there was my mother. Every were there were my kins. Before the day downed I left Hrishikesh without giving any hint to anybody.

I reached Delhi by train and foot within a few days. Then on the way I visited Mathura and Vrindavanam. Returning from Govardhana I was severely affected by typhoid and when I reached Mathura some students of Sanskrit Pathashala there, took me

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पाठालयच्छात्रा मथुरायां आतुरशालायां मां प्रावेशयन् । सप्ताहद्वयानन्तरं यदाहं सञ्चारयोग्यो जातः तदा आतुरशालां उत्सृज्य आग्रां प्राप । अतितरां क्लान्तोऽप्यहं दण्डमवलम्ब्य चरित्वा ताजमहलं दृष्टवान् । अथाविलम्बितं प्रतिनिवर्तमानः पुनरपि कल्कत्तां प्राप ।

मार्गे तत्र तत्र अवतीर्य अहं कथमपि कल्कत्तातो मद्रासं प्राप । एवं क्रमात् केरलमागतः । गृहमागत्य यदाहं मातरमद्राक्षं तदा उच्चैः क्रन्दितवान् । हर्षातिरेकेण क्रन्दनानुभवः मद्विषये स इदंप्रथम एव ।

ततः किमपि लक्ष्यं विना अहं वत्सरमेकं गृहे नीतवान् । परन्तु तावता कालेन अनेके मलयाल - संस्कृत ग्रन्थाः अधीताः । पत्रिकाभ्यः अनेकाः कविताः रचिताश्च ।

ततः स्वयं पठित्वा परीक्षाः उत्तीर्णाः । संस्कृताध्यापकः संवृत्तः । अध्यापिकां परिणीतवान् । गृहभारानुदवहम् । एवं सर्वथा सांसारिकः परिणतः । तथापि

---

and admitted me in the hospital. I left the hospital after two weeks when I recovered my health to walk and started to Agra. Though I was too weak I visited Tajmahal by walking with the help of a stick. Then I was eagerly returning to Kerala, but reached again Calcutta.

Somehow I returned from Calcutta to Madras with some breaks of journey on the way. When I reached home in Kerala and saw my mother I burst out into tears, It was my first experience that I wept with delight.

At home I spent one year without any specific aim. But I read many books in Sanskrit and Malayalam and wrote several poems for Periodicals.

As a private candidate I passed examinations and started my career as a sanskrit teacher; married a teacher; undertook family burden and became Saamsaarika by all means. But even then I could

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शारीरिकावश्यकानां सन्तर्पणादतिरिच्य किमपि गुरुतरं कर्मारचितुमनुभूयमानां तृष्णां शमयितुं नाहमशकम् । अभिलाषास्तु मम शक्तेरविषया आसन् । या नाम मानवस्यात्मीयवीर्यं निष्प्रभं दुर्बलं सङ्कुचितं च कुर्वन्ति तादृशीः कठिनयातना अनुभूय विविधान् क्लेशानभिमुखीकृत्य अहं कथञ्चिदपि चत्वारिंश-वयःपर्यन्तं आत्मानं नीतवान् । तावता कालेन साहित्यस्य विविधासु शाखासु प्रायः पञ्चदशग्रन्थाः प्रकाशिताश्च ।

अत्रान्तरे दैववशात् संस्कृतप्रचारणविषये अहं तत्परो जातः । कामधेनुपद्धतिराविष्कृता च । संस्कृतप्रचारणाद् हेतोः अहं वृत्तेर्निष्कासितोऽभूवम् । अहमति महत्यग्निकुण्डे पतितः । "आत्महत्यैव वरं; किमेतादृशेन जीवितेन?" असकृदेवमहं चिन्तितवान् । अस्यामवस्थायां वाल्मीकिः सीतामिव मां रक्षितुं श्रीमदभेदानन्दगुरुदेवः सन्नद्धो बभूव । तद्दर्शनस्य यदा मे भाग्यं लब्धं तस्माद् निमिषादारभ्य अहं पुनरुज्जीवित इवासम् । मम निष्प्रभा अभिलाषाः

---

not quench my severe thirst to do something substantial work apart from the fulfilment of my bodily requirements. My ambitions were beyond my reach. Facing various kinds of difficulties and experience of tortures which shrink, weaken and dim one's spiritual strength I pulled on myself upto my fortieth year. I wrote about fifteen books in different branches of literature by that time

Meanwhile by chance I turned to the field of sanskrit propagation and evolved Kamadhenu puddhati. I was removed from my job because of my ardent longing for my service chosen by me. I fell down in a greater fire-vessel. "Better to commit suicide; what for such a life?" I thought several times. In such a position Swami Abhedanandaji came forward to rescue me as Valmiki came to seeta. Since the moment that I got a chance for his Darshan, i felt enlived. My faded ambitions began to blossom. All favourable environments came to me one after another. Meanwhile I came free from all family burdens. My mother bre-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विकसितुमारभन्त । सर्वा अप्यनुकूलाः परिसराः एकैकशः मामभिपेतुः । तदन्तरा गार्हिकभारेभ्यः सर्वथाहं विमुक्तोऽभूवम् । माता उपरता । मम पुत्राः तत्तदुचितासु वृत्तिषु नियुक्ताः । एवं च अभिवाञ्छितानि कर्माणि निर्वोढु-महं सर्वथा स्वतन्त्रो जातः । सन्यासार्थमावश्यकाः सर्वा अपि परितस्थि तथः अप्रतीक्षितं मामुपगताः । मम जीविते भविष्यति काले यद् भवितव्यं तत् सर्वं पञ्चत्रिंशद्वर्षेभ्यः पूर्वं एकस्मिन् दिने कथं स महात्मा निरैक्षतेति अधुनापि मया साश्चर्यं स्मर्यते ।

"तर्हि मातुर्मरणानन्तरमेव सन्यासः स्वीकरणीयः"।

तस्मिन्नपराह्णे तस्यां चन्द्रशालायामासीनस्य तस्य महात्मनः ता वाचः अद्यापि मम मनसि प्रतिध्वनन्ति ।

"हिमालयेऽहमीश्वरं दृष्टवान्" इति कथयित्वा मां प्रलोभ्य तादृश-तीर्थयात्रार्थं यः प्रचोदितवान् तस्मै कुहनामस्करिणे तत्त्वतोऽहमृणी भवामि ।

---

athed her last. My sons got employed. I became completely free to go on with my service. All environments essential for a Sanyasin unexpectedly came to me. I wonder how could the Mahatma Tapovanam foresee all future happenings in my life on that day about 35 years back.

"Better to take up Sanyasa after mother's. demise"

The words of Swamiji seated in that terrace in that evening echo in my mind even now.

Now I feel very much indebted to the hypocrite Swami who infatuated me by saying that he had seen God in Himalayas and induced me for such a Teertha Yatra.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तथ्यतोऽहं हिमालये ईश्वरं दृष्टवान् ।

सर्वमपि ईश्वरेणासूत्रितम् । कुतः कथमित्यस्य स एवोत्तरं दातुं शक्नोति ।

अधुना तु यानि सर्वानपि क्लेशान् शाश्वतानन्दरूपेण परिवर्तयन्ते यत्र मे अहंकारः साकल्येन प्रणश्यति तादृशानि मानवक्षेमोन्मुखानि कर्माणि कर्तुमावश्यकमात्मबलं मे प्रदातुं प्रत्यक्षलक्षितं तमेवेश्वरमहं प्रार्थये ।

Really I saw God in Himalayas.

All is planned by HIM. He only can answer all the 'hows" and 'whys'.

Now I pray to HIM to give me such a spiritual strangt to render more service which would prove good for the mankindh which could turn all sufferings into perpetual delight and where my ego would completely cease to exist.

गात्रं शीर्यति मे चिरादनुदिनं, प्राप्नोति चौजः क्षयम्
वार्धक्याभिभवात्, बहूनि विवशं कृत्यानि मां तन्वते ।
शक्तिर्मेऽस्तु भवन्निदेशपरिपूर्त्यर्था सदाऽऽत्मिकी,
क्लिष्टं देव ममान्तिमश्वसितमप्यास्तां भवत्प्रीतये ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यत् करोमि यदश्नामि
यज्जुहोमि ददामि यत् ।
यत् तपस्यामि सर्वात्मन्
तत्तदस्तु त्वदर्पणम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

BHARATAVIDYAPEETHAM

is rendering service in the field of propagation of Sanskrit – study adopting various methods suited to the modern age.

*

It conducts a Sanskrit correspondence course of forty self contained lessons based on the **KAMADHENU PADDHATI** of the **Vidyapeetham** through the medium of English, Malayalam, Hindi and Tamil in international level.

*

It publishes books for children and other literature intended to enliven the interest in Sanskrit studies in the common man and enrich his understanding of this vast store-house of the Indian culture.

*

It has brought out 41 recorded cassettes containing 41 Sanskrit lessons which would help the desirous ones to learn Sanskirt at home in any corner of the world.

*

Kirtikant Sharma Collection, Najafgarh